Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यमोहनप्रणीतं दार्शनिकं नाटकम्

महर्षियाज्ञवल्क्यः

पत्युः कामाय नह्यत्र
पतेः प्रियत्वमीक्ष्यते ।
जायायाञ्च पतिप्रेम
जायायै नहि वीक्ष्यते ॥
मा गमः संरभं क्षिप्रं
गाम्भीर्येण विचिन्तय ।
कस्यचिन्नहि कामाय
प्रियो भवति. . .

अनुवादकः
रोहिणीराजः तिमिल्सिना

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महर्षि-याज्ञवल्क्यः

दार्शनिकं नाटकम्

नेपालीमूलम्

सत्यमोहन–जोशी

संस्कृतानुवादः

रोहिणीराजः तिमिल्सिना

नेपाल–प्रज्ञा–प्रतिष्ठानम्

कमलादी, काष्ठमण्डपः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महर्षि-याज्ञवल्क्यः

रचयिता — सत्यमोहन–जोशी

Author — Satya Mohan Joshi

अनुवादकः — रोहिणीराजः तिमिल्सिना,
त्रि. वि., संस्कृत–केन्द्रीय–विभागः, कीर्तिपुरम्, नेपालः

Translator — Rohini Raj Timilsina,
rrtimilsina@gmail.com
T. U., Central Department of SANSKRIT,
Kirtipur, Nepal

प्रकाशकः — नेपाल–प्रज्ञा–प्रतिष्ठानम्, कमलादी, काष्ठमण्डपः

संस्करणम् — २०७६ वैशाखः ३० (संस्कृतानुवादः)
लेखकस्य शततमो जन्मदिवसः

सर्वाधिकारः © — प्रकाशकाधीनः

प्रतिकृतयः — ११००

आवरणसज्जा — सानुबाबु आचार्यः

अन्तःसज्जा — पर्वतराजः घिमिरे

अक्षरविन्यासः — यमुना न्यौपाने

मूल्यम् — ३१२ रूप्यकाणि

ISBN — **978-9937-723-17-6**

संस्कृति-पर्यटन-नागरिकोड्डयन-मन्त्रालयस्य वित्तीयाऽनुदानेन मुद्रितम्

MAHARSHI-YAJNAVALKYAH

(A Philosophical Drama, translated by Rohini Raj Timilsina)

All rights are reserved. No any part of this publication can be reproduced in any form without our permission. Those who will be interested in staging this drama may kindly contact the author or translator.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मदीय कथनम्

नेपालस्य भाषा–साहित्ययोः, कला–संस्कृत्योः, ज्ञान–विज्ञानयोश्च नैकविधपक्षाणामध्ययनाऽनुसन्धान–प्रवर्धनकार्येण उत्कृष्टानां ग्रन्थानां प्रकाशनं लक्ष्यीकृत्य २०१४ वैक्रमाब्दे नेपाल–प्रज्ञा–प्रतिष्ठानं संस्थापितमासीत् । कालक्रमेण राजकीय–नेपाल–प्रज्ञाप्रतिष्ठानम्, नेपाल–राजकीय–प्रज्ञाप्रतिष्ठानञ्चेति नामपरिवर्तनेन सह नेपाल–प्रज्ञा–प्रतिष्ठानेन राज्यात् प्राप्तस्योत्तरदायित्वस्य सम्यग् निर्वहनं क्रियमाणमस्तीति नाविदितं प्रज्ञावताम् । २०६२/०६३ वैक्रमाब्दस्य जनान्दोलनस्याऽनन्तरं नेपाल–राजकीय–प्रज्ञाप्रतिष्ठानाद् ललितकलां नाट्यसङ्गीतञ्च पृथक्कृत्य पृथक् पृथक् प्रज्ञा–प्रतिष्ठानं सङगठितम् । तदनु नेपालस्य भाषा–साहित्ययोः, संस्कृतेः, समाजशास्त्रस्य, दर्शनस्य च अध्ययनाऽनुसन्धानद्वारा तत्प्रवर्धनस्य दायित्वं वर्तमानस्य नेपाल–प्रज्ञा–प्रतिष्ठानान्तर्गतं वर्तते । एतदर्थे नेपाल–प्रज्ञा–प्रतिष्ठानस्य सङ्गठनकालादेव स्वकीयकार्यक्षेत्रे प्रतिष्ठानमिदं कार्यरतमस्ति । भाषा–धर्म–संस्कृति–दर्शनादिक्षेत्रेषु विद्यमानां विविधतां सम्बोध्य विविधताऽन्तर्वर्तिन्या एकतायाः समृद्धये नेपालस्य प्राज्ञिकजगतः समेषां विज्ञानां सङ्गठनेन कार्यक्षेत्रे प्रवर्तनाय वयं सन्नद्धाः स्मः । देशस्याऽन्तर्बहिश्च स्थितानां नेपालिस्रष्टानां छत्ररूपेण स्थितं प्रतिष्ठानमिदं तेषां ज्ञान–शिल्पयोरधिकतमप्रयोगेण तेभ्यः प्राज्ञिकं स्थानं प्रदातुं सततं निरतं वर्तते । एवम्प्रकारेण समग्राणां नेपालिनामेतद् राष्ट्रियं प्राज्ञिकं स्थलं भवत्विति लक्ष्यमेकमवलम्ब्य प्रतिष्ठानस्य कार्यनीतिः, कार्यक्रमाश्च निर्धारिताः सन्ति । एवञ्च अन्तरराष्ट्रियजगतः प्राज्ञिकसंस्थाभिश्च सह समन्वयेन प्राज्ञिकाऽऽदानप्रदानद्वारा नेपाल–प्रज्ञा–प्रतिष्ठानस्य अन्तरराष्ट्रियच्छविनिर्माणाय वयं प्रविबद्धाः स्मः । एवंरीत्या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राष्ट्रियमन्तरराष्ट्रियञ्च छविं निर्मितवत्याः संस्थायाः स्वरूपेण अस्याः संस्थायाः समुन्नयनस्य अस्मत्प्रयासं सफलीकर्तुमेतत्क्षेत्रसम्बद्धानां समेषां प्राज्ञानां साहाय्यापेक्षास्माभिरनुभूता वर्तते । एवमेव नेपालस्य अन्तर्बहिश्च सभा–सम्मेलनाऽध्ययनाऽनुसन्धान–ग्रन्थप्रकाशनादिना अनुवादमाध्यमेन च ज्ञान–सर्जनयोरादानप्रदानकर्मणि नेपाल–प्रज्ञा–प्रतिष्ठानं खलु सदा सक्रियमस्तीति अस्माकं प्रतिबद्धता ।

सत्यमोहन-जोशीवर्येण वयसः शताब्दीं यावद् भाषासंस्कृत्योः समुन्नयनाय यदवदानं कृतम्, तदर्थं तत्सम्मानरूपेण नाट्यकाव्यमिदं नेपालसर्वकारस्य संस्कृति-पर्यटन-नागरिकोड्डयन-मन्त्रालयस्य एवञ्च नेपाल-प्रज्ञा-प्रतिष्ठानस्य पक्षतः प्रकाशितं वर्तते । अतः संस्कृतेनाऽनूदितमिदं तन्नाट्यकाव्यं रचयित्रे तस्मै खलु समर्पितमिति च निवेदयामः ।

गङ्गाप्रसाद उप्रेती
कुलपतिः
नेपाल-प्रज्ञा-प्रतिष्ठानम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकाशकस्य वक्तव्यम्

वाङ्मयशताब्दीपुरुषस्य वरिष्ठसंस्कृतिविदो जोश्युपनामधेयस्य श्रीसत्यमोहनस्य नेपालस्य संस्कृतेरनुसन्धाने महत्त्वपूर्णमवदानं वर्तते। नेपाल–प्रज्ञा–प्रतिष्ठानस्य सदस्यसचिवचरस्य जोशीमहोदयस्य लेखनी कविता–कथा–निबन्ध–नाटकेषु समानगत्या प्रचलति। एतेनैव विदुषा बहुकालपूर्वं नेपालीभाषायां प्रकाशितस्य महर्षियाज्ञवल्क्याख्यस्य नाटकस्योपप्राध्यापकेन **तिमिल्सिनोपाह्वेन श्रीरोहिणीराजेन** संस्कृतभाषया विहितोऽनुवादोऽधुना प्रकाश्यमानो वर्तते।

अस्माकं पौरस्त्यवाङ्मयपरम्परायां महर्षेर्याज्ञवल्क्यस्याऽवदानविषये तु विदन्त्येव विद्वांसः। एतादृशं महत्त्वाऽऽधायकं विषयमधिकृत्य यन्नाट्यकाव्यप्रणयनकार्यं **सत्यमोहनजोशीमहोदयेन** सम्पादितं तदतीव समीचीनमिति निश्चप्रचम्। अतोऽस्य नाटकस्य रचयिताऽनुवादकश्च उभावेव धन्यवादार्हौ। सुरभारत्यां प्रकाश्यमानमिदं नाट्यकाव्यं विदुषां मोदाय स्यादिति वयं कामयामहे। नेपाल–शासनस्य संस्कृति–पर्यटन–नागरिकोड्डयनमन्त्रालयस्य साहाय्ये प्रकाशितस्याऽस्य नाट्यकाव्यस्य गुणदोषविषये नीरक्षीरविवेकिराजहंसोपमेयाः पण्डिता अवश्यमेव स्वाभिमतं प्रकटयिष्यन्तीति नेपाल–प्रज्ञा–प्रतिष्ठानमाशासत इति शम्।

डा. जगमान गुरुङः
उपकुलपतिः
नेपाल-प्रज्ञा-प्रतिष्ठानम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्पये

२०२८ वैक्रमाब्दस्य सन्दर्भो वर्तते । काष्ठमण्डपस्य वाग्वतीतटे पचलीघट्टनिकटवर्तिनि 'भगवतेश्वर' इत्यपराभिधेये काजीघट्टे सरदारोपनामधेयस्य काजी-हंसमान-सिंहस्य समुपस्थितौ दार्शनिकं प्रवचनं प्रचलति स्म । पण्डित-जयदेव-पौड्यालविहिते आत्मपुराणविषयकप्रवचने महर्षेर्याज्ञवल्क्यस्य जीवनचरितस्य दार्शनिकविचाराणाञ्च श्रवणमननयोः सौभाग्यमहं लब्धवान् । ततः खलु प्रेरणामवाप्य अहं 'दैलाको बत्ती' इति शीर्षकयुतं पूर्णाङ्किनाटकं विरचय्य प्रकाशितवान् । तस्यैव नाटकस्य परिवर्धितं परिशोधितञ्च रूपमस्ति 'महर्षि-याज्ञवल्क्यः' ।

सगरमाथेति विश्वस्य सर्वोच्चहिमशिखरस्याङ्केऽवस्थितेयं नेपालभूः । प्राचीनकालेऽत्र विलक्षणसर्जनप्रतिभासम्पन्नौ द्वौ दार्शनिकौ जातौ । तावास्ताम्- देशस्यास्य पश्चिमाञ्चलक्षेत्रे लब्धजन्माः सिद्धार्थगौतमः, पूर्वाञ्चलक्षेत्रे समुत्पन्नो महर्षिर्याज्ञवल्क्यश्च ।

लुम्बिनीप्रदेशे जनिं लब्धवान् सिद्धार्थगौतम एकोनत्रिंशत्तमे वयसि विरक्तः सन् गार्हस्थ्यं परित्यज्य पत्नीपुत्रौ च असंसूच्य राजप्रासादान्निर्गतः । सत्यान्वेषणाय शान्तिसरण्यां भ्रामं भ्रामम् अन्त्ये गयाक्षेत्रं सम्प्राप्य तत्रत्ये पिप्पलतरुमूले एकाग्रचेतसा ध्यानस्थः सन् एकोनपञ्चाशत्तमे दिवसे तत्त्वज्ञानमधिगम्य बुद्धो बभूव । तेनैव प्रतिपादितं बौद्धदर्शनं निर्वाणावाप्तेरेको विशिष्टालोको समपद्यत ।

मिथिलायां जातो याज्ञवल्क्यस्तु गृहस्थजीवने ह्यरमत । द्वे भार्ये तस्यास्ताम्— मैत्रेयी कात्यायनी च । विद्यार्थिजीवने गुरोर्वैशम्पायनादपि अधिकज्ञानगर्वरूपदोषारोपानन्तरं गुरोरादेशेन तेन तदध्यापितानां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समग्रविद्यानां वमनं विहितम् । पश्चात् सूर्यदेवोपासनया लब्धविद्यः स विलक्षणप्रतिभासम्पन्नः सुधीः बभूव । ततश्च मिथिलायां राजर्षेर्जनकस्य ब्रह्मसभायां सर्वान् विदुषो विजित्य स ब्रह्मविदित्युपाधिना विभूषितश्चासीत् । जीवनस्य परार्धान्ते स गार्हस्थ्यञ्च विसृज्य संन्यस्तः सन्नेव दैहिकं स्वरूपं विसृष्टवान् आसीत् ।

कालगत्या सहैव नैके कालखण्डा व्यतीताः । नेपालस्य पश्चिमाञ्चले जातस्य सिद्धार्थगौतमस्य नाम न केवलम् एशियामहाद्वीपेऽपितु समग्रेऽस्मिन् संसारे विश्वबन्धुत्वस्य विश्वशान्तेश्च प्रतीकरूपेण प्रख्यातिं समर्जितवदधिगम्यते परन्तु पूर्वाञ्चले लब्धजन्मनो ब्रह्मविदो महर्षेर्याज्ञवल्क्यस्य नाम केवलं याज्ञवल्क्यस्मृति-बृहदारण्यकोपनिषच्चेति ग्रन्थद्वये सीमबद्धं वर्तते ।

साम्प्रतं वेत्ति विश्वं गौतमबुद्धम्, न तु महर्षिं याज्ञवल्क्यम् । तस्यैव जन्मकर्मभुवोबहुशोबन्धुजनाःपरिचितवन्तोऽपितमपरिचितवन्तइवव्यवहरन्ति। एतादृशं ब्रह्मवेत्तारं महर्षिं याज्ञवल्क्यं तद्दार्शनिकीं विचारधाराञ्च अधिकृत्य विरचितमिदं नाटकं सम्यगधीतवेदान्तेन गुरुकुलीयच्छात्रेण **रोहिणीराज–तिमिल्सिना**महोदयेन सुरगिरानूदित इति महतः प्रसादस्य विषयः । न केवलं तावदेव, अपितु नान्दीपाठादिपद्यानि विरचय्य नाटकारम्भे निवेशनपुरःसरं नाट्यकाव्यान्तर्वर्तिषु सन्दर्भविशेषेषु गद्यानाञ्च पद्यानुवादसरणिमूरीकृत्य अनुवादकेनामुना यन्नाट्यशास्त्रीयं वैशिष्ट्यमिह आधापितम्, तत्तु ततोऽपि श्लाघनीयमाचरितमिति एतस्मै शतशः साधुवादान् प्रयच्छामि ।

द्वैतं न वर्तते यत्र तदद्वैतमिति सिद्धान्तः । एतादृशस्य अद्वैतब्रह्मणो ज्ञानं गुरुं विना न भवति । शृङ्गग्रहणेन गोदर्शनमिव अस्य निर्देशश्च न सम्भवति । श्रीयन्त्रमिव रङ्गवल्लीरचनयापि एतद्दर्शयितुं न शक्यते । जल–तत्तरङ्गयोरैक्यमिव जीवात्मनोरैक्यज्ञानेन आत्मबोधो जायते । तदर्थं देहस्य नाशवत्त्वम् आत्मनो नित्यत्वञ्च बोद्धव्यं भवति । यथा चित्रसर्जनाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वस्त्रमाधारीक्रियते, श्रीखण्डलेपरचनायै घर्षणशिलापेक्ष्यते, तथैव प्राणसन्धारणाय ब्रह्माधारोऽपेक्ष्यते।

चिन्तनेन सगुणं निर्गुणं निर्गुणञ्च सगुणं भवति। मायाया आवरणं नारिकेलजटेव अस्ति। तेन च भ्रान्तिर्जायते रज्जौ सर्प इव। गुरूपदिष्टं ज्ञानं मुक्तिसोपानस्य निःश्रेणिप्रदर्शको मोक्षदेहलीस्थो दीपक इव अस्ति। तादृशानामेव गुरुवर्याणां करकमलयोः समर्प्यते नाटकमिदम्।

बखुंबहालः, ललितपुरम् — **विनीतः**

५ भाद्रः २०६९ वैक्रमाब्दः — सत्यमोहन-जोशी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुभाशया:

शताब्दीपुरुषेण सत्यमोहन–जोशीवर्येण विरचितमिदं नाट्यकाव्यं संस्कृतभाषयानूद्य प्रकाश्यमानं वर्तत इति महतो हर्षस्य विषयः । एतेन विलक्षण–प्रतिभा–सम्पन्नस्य महर्षेर्याज्ञवल्क्यस्य विषये विश्वस्मिन् विश्वे यत्र तत्र स्थितानां संस्कृतभाषाविदां साधारणजनानां कृतेऽपि बोधावसरः सृज्यत इति प्रकाशनस्यास्य प्रयोजनम् ।

विदेहराज–जनकस्य प्राचीने मिथिलाराज्ये प्रथितानां गार्गी–मैत्रेय्यादि–विदुषीनाञ्च विषये ज्ञानसञ्चारस्य सुमहद् उपयोगित्वञ्च अस्य प्रकाशनस्य सेत्स्यतीति मम विचारः । जनकस्य राजसभायां धर्म–दर्शनसन्दर्भे प्रकटितानां विद्वत्ता–बौद्धिकता–तर्कशीलतानां विषयेऽपि अस्माद् नाट्यकाव्याद् रसास्वादनं भवतीति अनुभूतिविषयः ।

अस्य ग्रन्थस्य प्रकाशनेन नाट्यसाहित्यविधायां वर्तमानसमये संस्कृतभाषायाः काव्यस्रष्टॄणाञ्च प्रोत्साहवर्धनं नूनं भविष्यति । शताब्दीपुरुषेण **सत्यमोहन–जोशी**–महाभागेन प्रणीतस्य अस्य नाट्यकाव्यस्यानुवादकः संस्कृतसेवी **रोहिणीराज–तिमिल्सिना**वर्यः धन्यवादस्य पात्रमस्ति । एवमेव भाषा–साहित्य–दर्शनदृशा उत्कृष्टाया अस्याः कृतेः प्रकाशनस्य उत्तरदायित्वं स्वीकृतवद् नेपाल–प्रज्ञा–प्रतिष्ठानमपि धन्यवादार्हं मन्ये । प्रकाशनेऽस्मिन् संस्कृति–मन्त्रालयेन प्राप्तस्य अवदानावसरस्य कृते च लेखकानुवादक–प्रकाशकेभ्यो हार्दिकमाभारमभिव्यनज्मि ।

२०७६ आद्यसङ्क्रान्तिः

मोहनकृष्णः सापकोटा
सचिवः
संस्कृति–पर्यटन–नागरिकोड्डयन–मन्त्रालयः, नेपाल-सर्वकारः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मङ्गलकामना

सर्वेषामपि कृते प्रेरकव्यक्तित्वं खलु **सत्यमोहन–जोशी**वर्यः। स्वराष्ट्रं स्वसंस्कृतिञ्च प्रति समर्पणभावोद्भावनाय निरन्तरं प्रेरयति एतज्जीवनचरितम्। सत्कर्मनिष्ठया समर्जितां सामाजिकीं प्रतिष्ठां प्रति प्रोत्साहयति तत्। सदा हि कर्मशीलत्वमङ्गीकृत्य स्वसंस्कृतेरनुसन्धानाय च सङ्केतयति एतदीया जीवनचर्या । एतेन विरचितं नाटकमिदमस्माकं देशस्यैव पुरातनस्य मिथिलाराज्यस्य महाराज–जनक–गुरोर्महर्षेर्याज्ञवल्क्यस्य जीवनचरितं विषयीकरोति।

काष्ठमण्डपस्य पचलीघट्टनिकटस्थे भागवतेश्वरघट्टे पण्डित–जयदेव–पौड्यालविदुषा कृतमात्मपुराणविषयकं प्रवचनं श्रुत्वा तेनैवाभिप्रेरितः सन् जोशीवर्यो नाटकमिदं रचितवान् इति नाटकरचनाया ऐतिहासिकी कथा। महर्षेर्याज्ञवल्क्यस्य जीवनचरितेन सह राजसभायाः शास्त्रार्थपरम्पराया गभीरः सन्दर्भश्च इह प्रस्तुतोऽस्ति। आत्म–देह–परमात्मादिविषयेषु नाटकेऽस्मिन् तर्कप्रयुक्तं दार्शनिकं चिन्तनं प्राप्यते।

मिथिलाक्षेत्रस्य गौरवपूर्णस्य इतिहासस्य विषये संस्कृतेनानूदितेनानेन नाटकेन विश्वव्यापी प्रचारः सम्भविष्यतीति विश्वसितुं शक्यते। लेखकस्य विद्वत्तापूर्णायाः प्रस्तुतेरस्या नाट्यकृतेर्योऽनुवादः संस्कृतकर्मिणा **रोहिणीराज**वर्येण प्रस्तुतः, एतेन संसारस्य अनेकेषु देशेषु एतन्नाट्यकाव्यान्तर्गतस्य अस्मद्देशगौरवस्य प्रचारः सुकरो सम्भूयादिति मङ्गलकामनया सहैव लेखकाय, अनुवादकाय, प्रकाशकाय च साधुवादान् प्रयच्छामि।

भरतमणिः सुवेदी
सहसचिवः
संस्कृति–पर्यटन–नागरिकोड्डयन–
मन्त्रालयः, नेपाल-सर्वकारः

२०७६ प्रथमदिवसः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका

१. विषयप्रवेशः

साम्प्रतं मम सन्निधौ स्वसंस्कृतिसमाराधनसमर्पितान्तःकरणेन शतायुषा श्रीसत्यमोहन–जोशीमहोदयेन विरचितः तिमिल्सिनोपाह्व–रोहिणीराजमहोदयेन संस्कृतेऽनूदितश्च महर्षियाज्ञवल्क्यनामको नाट्यग्रन्थो वर्तते । ग्रन्थमिमं समनोयोगं सहर्षमहमध्यैषि । तदनु ग्रन्थस्यास्यावतरणभूमिमन्वेष्टुमहं प्रावर्तिषि । ग्रन्थस्यास्यानुवादको रोहिणीराजस्तदीया संस्कृतिनिष्ठा च प्रकृते कर्मणि मत्प्रवृत्ति-बीजम् । अतोऽहं साम्प्रतं संस्कृतनाट्यपरम्परायां नैरन्तर्यमादधानस्य पौरस्त्यदर्शनाकाशे समुदीयमानस्यास्य नाट्यग्रन्थस्य दार्शनिकं स्थानं महत्त्व_ञ्चान्वेष्टुकामोऽस्मि ।

२. संस्कृतकाव्यपरम्परा

कविकर्म काव्यमित्युच्यते । कोऽयं कविरिति विचिकित्सायां कवते, कौति, कुवते वा कविरिति शाब्दिकसरणिः । **कवते** सर्वं जानाति, सर्वं वर्णयति, सर्वतो गच्छति वेति तत्तात्पर्यम् । श्रूयते च श्रुतिषु– **कविर्मनीषी परिभूः स्वयम्भू**रिति । तथा च **वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः, कविः पुराणमनुशासितारम**ित्याद्यपि स्मर्यते । तत्र भ्रमप्रमादविप्रलि-प्सादिस्वाभाविकपुंदोषविरहितत्वेन ईश्वरनिःश्वासभूतस्य अपौरुषेयस्य आम्नायाख्यस्य नित्यज्ञानस्य आम्नातुः परमेश्वरस्य कविरित्यभिधानं स्थाने । कविकर्मतया प्रधानवृत्त्या वेदस्यैव काव्यत्वमवगन्तव्यम् । परिवर्तमानेऽनेहसि वेदोपबृंहणरूपाणामितिहासपुराणादीनाञ्च प्रादुर्भावः । इतिहासपदेन

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रामायणमहाभारतयोः, पुराणपदेन च अष्टादशपुराणानां बोधः। तत्प्रणेतृत्वेन प्रसिद्धौ च व्यास–वाल्मीकी कविपदवाच्यतामवाप्तवन्तौ। तदनन्तरमितरेषां कविरित्यभिधानमिति दण्डिनः प्रशस्तिप्रकरणे प्रसिद्धमेव-

जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥

वस्तुतस्तु इदानीन्तनाः सर्वेऽपि कविपदाभिधेया जनाः प्रजापतेरेव कृत्यमनुकुर्वन्ति। अतः स एव कविः, स एव आदिकविः, **अपारे काव्यसंसारे कविरेकः प्रजापतिः**। अन्ये तु तदनुजीविनः। यथाह क्षेमेन्द्रः —

छायोपजीवी पदकोपजीवी पादोपजीवी सकलोपजीवी।
भवेदथ प्राप्तकवित्वजीवी स्वोन्मेषतो वा भुवनोपजीव्यः ॥

अतः कविकर्मत्वेऽपि काव्यं मानवहितावहं शाश्वतं ज्ञानम्। वेदा यथाभ्युदयनिःश्रेयसं साधयन्ति, तथैव काव्यमपि प्रवृत्तिनिवृत्ती साधयतीति काव्येषु शास्त्रत्वं सुस्थिरम्। कुमारिलश्चाह—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन च।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥

वेदाः प्रभुसम्मितया गिरा हितमनुशासति चेत् साहित्यापरपर्यायं काव्यं कान्तासम्मितगिरा हितानुशासनं विधत्ते इत्युभयोर्भेदः। **वाक्यं रसात्मकं काव्यम्, तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि, रमणीयार्थप्रतिपादकः शब्दः काव्यम्**इत्यादि काव्यलक्षणानि प्राचीनाचार्यैर्निगदितानि। तेषामेव सन्निवेशाद् नाटकेऽपि काव्यत्वव्यवहारः।

३. नाट्यशास्त्रं तत्परम्परा च

काव्यानुभवकाले इन्द्रियार्थसन्निकर्षभेदात् काव्यं श्रव्यं दृश्यञ्चेति द्विधा विभज्यते। श्रव्यं काव्यं पठनार्हं श्रोत्रसमवायजन्यत्वात् श्रवणार्हञ्च।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यन्तु चाक्षुषप्रत्यक्षविषयं संयुक्तसमवायजं संयुक्तसमवेतसमवायजं वा। तदुक्तं साहित्यदर्पणे–

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमिति । एतेन सद्यः परनिर्वृतिः, परमानन्दावाप्तिर्वेति वैशिष्ट्यमेतस्य।

नाट्यस्य स्वरूपं तद्भेदाश्च शास्त्रे बहुधा वर्णिताः सन्ति। यथा-

देवतानामृषीणाञ्च राज्ञामथ कुटुम्बिनाम् ।
कृतानुकरणं लोके नाट्यमित्यभिधीयते ॥

- नाट्यशास्त्रम्

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।

- विश्वनाथः

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपाद्दशधैव रसाश्रयम् ॥

- दशरूपकम्

नाटकं सप्रकरणमङ्को व्यायोग एव च ।
भाणः समवकारश्च वीथिः प्रहसनं डिमः ॥
ईहामृगञ्च विज्ञेयं दशकं नाट्यलक्षणम् ॥

- भरतमुनिः

नाट्यस्य प्रारम्भो मानवसभ्यतायाः समुद्गमेन साकमेव बभूवेति सङ्ख्यावन्तः समामनन्ति । मानवीयव्यवहारक्रमे भाषणात्मकभाषाया आविर्भावात्पूर्वमपि अभिनयात्मकं भाषणमासीत् । तदेव नाटकपरम्पराया बीजम्।

ऋग्वेदे समुपलभ्यमाना यमयमीसंवाद-उर्वशीपुरूरवसंवाद-पणिसरमासंवादप्रभृतयः संवादात्मकाः प्रसङ्गा वेदेऽपि नाटकस्य स्वरूपं प्रदर्शयन्ति । रामायण–महाभारतादिषु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्येतिहासग्रन्थेषु पुराणादौ च तत्तत्प्रसङ्गे रङ्गशालावर्णनेन सूतमागधादीनां प्रसङ्गेन च तदानीं नाटकस्यास्तित्वं द्योतयन्ति । भरतोक्तनाट्यशास्त्रे तु वेदादेव नाट्यपरम्परायाः प्रादुर्भाव इत्युक्तम् । त्रेतायुगे दुःखाग्निना दन्दह्यमाना देवासुराः प्रजापतिमुपसमेत्य तन्निराकरणोपायं पप्रच्छुः । तदर्थं चतुर्वेदतात्पर्यं ध्यायमानः प्रजापतिर्नाट्यवेदं पञ्चममाविश्चकार इति । वस्तुतो नाटकं खलु समग्रज्ञानविज्ञानयोः कलायाः शिल्पस्य च प्रदर्शनभूमिः। अत आह भरतः —

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न तद्योगो न तत्कर्म नाटके यन्न विद्यते ।।

साम्प्रतं भासकालिदासादीनां नाटकग्रन्थाः प्रसिद्धाः सन्ति । जयदेवस्तु—

यस्याश्चौरश्चिकुरनिकुरो कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः,
केषां नैषा कथय कविताकामिनी कौतुकाय ।।

इत्याद्युक्त्या कवितावनिताया अलङ्करणानेतानाह ।

संस्कृतवाङ्मये प्रसिद्धेषु नाटकेषु जयदेवस्य प्रसन्नराघवः, शूद्रकस्य मृच्छकटिकम्, भट्टनारायणस्य वेणीसंहारनाटकम् (वीररसोपेतम्), भवभूतेरुत्तररामचरितम् (करुणरसोपेतम्), कालिदासप्रणीतानि शृङ्गार–प्रधानानि मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्चेति नाटकानि, भासप्रणीतानि स्वप्नवासवदत्तप्रभृतीनि त्रयोदश नाटकानि, हर्षदेवस्य नागानन्दः, प्रियदर्शिका, रत्नावली च नाट्यपरम्परायां महत्त्वपूर्णं स्थानं बिभ्रति । श्रीकृष्णमिश्रयतिना निर्मितं प्रबोधचन्द्रोदयनाटकं दार्शनि_कवेदान्तसम्बद्धविषयमाश्रित्य प्रसिद्धमस्ति । मध्ये लुप्तप्रायामिमां प्राचीनतमनाटकपरम्परां पुनरुद्बोधयन्निव सम्प्रति समुदितोऽयं महर्षियाज्ञवल्क्यनामको दार्शनिकनाट्यग्रन्थ इति महद्धर्षप्रकर्षं जनयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४. प्रकृतनाटकपरिचयः

प्रारम्भिकप्रस्तावनया विविधशीर्षकसमन्वितैः सप्तभिर्दृश्यैरूपसंहारप्रकरणेन च समन्वितेऽस्मिन् नाटके याज्ञवल्क्यस्य जीवनसम्बद्धाः कतिपये प्रसङ्गाः समुपस्थापिताः सन्ति। भावगाम्भीर्यभरितया सरलभाषया समुपनिबद्धेऽस्मिन् नाटके नान्दीपाठे तत्रत्य-प्रसङ्गोपयोगिस्थलेषु सरलपद्यानामपि समावेशो विहितोऽस्ति। संस्कतनाट्यपरम्परायां केचन नियमा निर्धारिता दृश्यन्ते। **नाटकं ख्यातवृत्तं स्याद**ित्यादिप्रसङ्गैर्विश्वनाथेन तेषां सङ्केतो विहितोऽस्ति । तदनुसारं कथावस्तु प्रसिद्धं स्यात् । मुखप्रतिमुखादिपञ्चसन्धयः स्युः । धीरोदात्तः प्रतापी नायकः स्यात्। शृङ्गारवीरयोरेको रसोऽङ्गी स्यादन्ये रसा अङ्गरूपेणोपनिबद्धा भवेयुरित्यादि । प्रकृतनाटकेऽपि एते नियमा अंशतः समादृता दृश्यन्ते । यद्यपि रसविधाने तावत्साफल्यमत्र न दृश्यते, तथापि विषयगाम्भीर्यमत्रत्यं वैशिष्ट्यमेव।

५. याज्ञवल्क्यः

प्रकृतनाटकस्य मुख्यं पात्रं याज्ञवल्क्यः। 'कोऽयं याज्ञवल्क्यः?' इत्यपि विचिकित्साविषयः । ब्राह्मणग्रन्थे विद्यावंशावतरणक्रमे याज्ञवल्क्यः श्रूयते– **आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालक** इत्यादि । एतेन उद्दालको याज्ञवल्क्यस्य विद्यासम्बन्धेन पूर्वजो दृश्यते। बृहदारण्यकोपनिषदि विदेहाधिपतेर्जनकस्य यज्ञे सम्प्राप्तोऽयं याज्ञवल्क्यः 'तदीयाः सुवर्णालङ्कृताः गा निनाय' इत्युक्तमस्ति। तस्मिन् प्रसङ्गे ब्रह्मिष्ठोऽयं याज्ञवल्क्योऽश्वलार्तभाग–भुज्यूषस्त–कहोलारुणिशाकल्यप्रभृतिभिर्विद्वद्भिर्ब्रह्मवादिन्या गार्ग्या च साकं ब्रह्मविद्याविषयकं शास्त्रार्थमाचचार । तदनु सर्वान् विजितवतो याज्ञवल्क्यस्य पुरतः तदीयवैदुष्यप्रभावितः विदेहाधिपतिर्जनकः स्वयमपि तच्छिष्यत्वमङ्गीचकार। **(बृहदारण्यकोपनिषद् ३/१–४/५)**

याज्ञवल्क्यस्य पत्नीद्वयमासीत् । तयोर्मैत्रेयी ब्रह्मवादिनी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बभूव । कात्यायनी तु स्त्रीप्रज्ञेवासीदिति च बृहदारण्यके श्रूयते । व्यासशिष्याद् वैशम्पायनादधीतवेदविद्योऽयं कालान्तरे गुरुणा साकं वैमनस्यवशात्तां वैशम्पायनादवाप्तां सकलां विद्यां विहाय तदनन्तरं वाजिरूपधराद् भास्करान्मध्यन्दिने वाजसनेयाख्यं मान्ध्यन्दिनीयनामकं वेदज्ञानमवाप इति पौराणिकी प्रसिद्धिः । एतेन वाजसनेयाख्यसंहिताया माध्यन्दिनशाखाया प्रथमोऽध्येता याज्ञवल्क्य एवेति सिद्धम् । **याज्ञवल्क्यशिक्षे**ति वेदाध्ययनविध्युपकारकः शिक्षाग्रन्थो **याज्ञवल्क्यस्मृति**श्चेति धर्मशास्त्रग्रन्थश्च साम्प्रतमुपलभ्येते । प्रयागक्षेत्रे भारद्वाजाय रामचरितमेतेनैवोपदिष्टमिति रामायणी परम्पराऽस्ति । इतोऽन्यद् याज्ञवल्क्यवृत्तान्तोऽन्यत्र नैवोपलभ्यते तथापि बृहदारण्यके विदेहजनकसम्बन्धश्रवणाद् विदेहक्षेत्रस्य परित एव एतज्जनिभूरिति निश्चीयते । एवं तत्रत्यदर्शनविषयकशास्त्रार्थप्रसङ्गाद् विख्यातकीर्तिरियं याज्ञवल्क्योऽनुपमो मनीषी आसीदिति स्फुटमवगन्तुं शक्यते ।

याज्ञवल्क्यप्रणीतत्वेन प्रसिद्धो याज्ञवल्क्यस्मृतिर्यद्यपि धर्माधर्मनिर्णायकः स्मृतिग्रन्थः तथापि तत्र इज्याचारादिकर्मभिरवाप्यः परमो धर्म आत्मदर्शनमेवेत्युक्तम् । वेदधर्मज्ञैर्बहुभिर्यन्निर्णीयते तदपेक्षया एकोऽपि अध्यात्मविद्यानिपुणः श्रेयान् इत्युक्त्या स्मृतिकृद्याज्ञवल्क्योऽपि अध्यात्मविद्यानिष्णात इति प्रतीयते । तेन उभयोरैक्यञ्च अनुमातुं शक्यते ।

६. नाट्यपरम्परायां महर्षियाज्ञवल्क्यनाटकम्

संस्कृतवाङ्मये नाट्यपरम्परा समृद्धा विकसिता च दृश्यते परन्तु नाटकप्रदर्शने प्रायः प्रसिद्धा लौकिकाः सामाजिकाश्च विषयाः समाश्रीयन्ते । नाट्यविषयः सरलो बोधगम्यश्च भवेदिति प्रसिद्धं परन्तु गम्भीरभावपूर्णाः सहसानवगम्या दार्शनिकविषया नाट्यमञ्चे प्रायो नैव प्रविशन्ति । ईदृशा विषया दृश्यकाव्ये दुर्लभप्राया एव । यद्यपि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीमद्भागवतमहापुराणे पुरञ्जनोपाख्यान-भवाटवीवर्णनादिप्रसङ्गैरयं विषयः प्रदर्शितः परं दर्शनशास्त्रगम्यानाममूर्तविषयाणां मानवीकरणे नाट्यविषयस्य दर्शकसाधारणीकरणं व्याहन्यत इति सत्यम् । श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयनामकं दार्शनिकनाटकमेतस्य निदर्शनम् । तत्र तु विवेकविचारज्ञानवैराग्यादीनि श्रद्धा-मति-शान्ति-करुणोपनिषदादीनि च पात्राणि ब्रह्मानन्दैकरसाप्तिमभिनयन्ति परं तादृशनाटकप्रदर्शने दर्शकानां दृष्टौ साधारणीकरणं दुर्लभमिति रसनिष्पत्तौ नैयून्यदोषः । प्रकृते महर्षियाज्ञवल्क्यनामके नाटके तु दार्शनिका गूढतमा अपि विषयाः संवादद्वारैव सोदाहरणं स्फुटीकृताः सन्ति। एतेन प्राचीनतमनाट्यपरम्परायामभिनवमवदानं प्रदत्तं दृश्यते।

उपनिषत्सु पौराणिकसाहित्ये च लब्धप्रतिष्ठस्य विख्यातयशसो महर्षेर्याज्ञवल्क्यस्य चरितमाश्रित्य विरचितमिदं नाटकं प्राच्यावाच्यनाट्यकौशलयोः समन्वयस्य निदर्शनञ्चास्ति । ऐतिहासिकी कथा, दार्शनिको विषयः, स्वदेशगौरवसम्बर्द्धनमभिप्रायः, स्वसंस्कृतिसंरक्षणं तात्पर्यविषया नाटकस्यास्य महन्महत्त्वाधायकाः पक्षाः।

७. कथावस्तु

प्रस्तावनायां मिथिलाधिपतिर्जनकः स्वदेशभ्रमणानन्तरं राजप्रासादे परावर्तते । प्रासादद्वारदेशे कुरूपं वक्रवपुषं जनं दृष्ट्वा इतरे जनाः तं तिरस्कुर्वन्ति। आत्मतत्त्वविदष्टावक्रस्तु निर्भीकतया कुल्याजलयोरुदाहरणेन आत्मनो निर्विकारत्वमुपहासस्य व्यर्थताञ्च ब्रूते । जनकनिर्गमनानन्तरं याज्ञवल्क्येन साकं संवादे अष्टावक्रः शरीरमिदं क्षेत्रमात्मा क्षेत्रज्ञोऽविनाशीति स्वपरिचयं प्रस्तौति । आत्मतत्त्वमपरिज्ञाय केवलं लौकिकसुखभोगे रमतां जीवनं वृथेति अष्टावक्रोक्तिर्याज्ञवल्क्यस्य हृदि दृढं प्रभावमुत्पादयति।

स्वात्मदर्शकयन्त्रमित्याख्ये प्रथमे दृश्ये कमलातटस्थस्य देवरातमुनेः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सदनं दृश्यते । तत्र याज्ञवल्क्यस्य मातापित्रोः सुरूपादेवरातयोः संवादक्रमे दूरवीक्षणयन्त्राणामाविष्कारः, तेन च सूर्यग्रहणावसरे ग्रहगत्यवलोकनं, द्युलोकस्यान्तरिक्षस्य पृथिव्याश्च चमत्कृतिपूर्णरहस्यानामध्ययनमपेक्षितं श्रूयते परं तत्तनयो याज्ञवल्क्यस्तु स्वात्मदर्शकयन्त्रमाविश्चिकीर्षतीति तत्रैव संवादक्रमे आत्मबोधोपायाः सोदाहरणं प्रस्तुताः सन्ति ।

द्वितीयदृश्ये याज्ञवल्क्यस्य कात्यायन्याश्च प्रथमसाक्षात्कारे ईषत्प्रेमालापः श्रूयते । सहाध्यायिनां छात्राणामीर्ष्या, तेनैव कारणेन वैशम्पायनस्य कोपः, ततश्च वैशम्पायनप्रदत्तविद्याया वमनञ्च अत्रत्यो वृत्तान्तः । हठाद् विद्यावमनरतं याज्ञमितरे दुर्मतयः सहाध्यायिनः ताडयन्ति परं दयार्द्रा कात्यायनी स्वपितरमाहूय याज्ञस्य भैषज्यव्यवस्थां करोति । कठोरप्रहारेणापि अविचलितो याज्ञो विद्याप्राप्तये अस्तङ्गच्छन्तं सूर्यं प्रार्थयते ।

स्मृतिग्रन्थलेखनरतस्य याज्ञस्य तत्पत्न्या मैत्रेय्याश्च संवादेन साकं प्रारब्धे तृतीयदृश्ये गृहकार्यरतायाः कात्यायन्या व्यवहारोऽपि प्रदर्शितोऽस्ति । मिथिलाधिपस्य जनकस्यागमनं श्रुत्वा ससम्भ्रममाश्रमे पूर्वसज्जता विधीयते । जनकस्यागमनानन्तरं कुशलप्रश्नान् पृष्ट्वा सुखदुःखानुभवकारणं पृष्टवते जनकाय याज्ञवल्क्यस्य आत्मतत्त्वोपदेशो मधुनामकयाज्ञपुत्रद्वारा महावाक्यार्थज्ञापनञ्च विधीयते । कर्मासक्तो राजगुरुस्तु कर्मणः प्रयोजनं स्वर्गादिप्राप्तिरिति ब्रवीति परन्तु जीवात्मपरमात्मनोरैक्यज्ञानं महावाक्यद्वारैवेति याज्ञवल्क्योक्तिमाकर्ण्य जनको नितरां प्रसन्नो भवति ।

ब्रह्मसभाख्ये चतुर्थे दृश्ये विदेहराजसभायां 'सर्वोत्कृष्टो ब्रह्मनिष्ठो जनः स्वर्णालङ्कारमण्डिता मदीयाः सहस्रशो गा नयतु' इति राज्ञ उद्घोषः श्रूयते । गार्गीकहोलसंवादेन 'ब्रह्मविद्यायां नारीणामप्यधिकारः' इति निर्णीयते । तदानीं याज्ञवल्क्यो गा नेतुं स्वशिष्यं सामश्रवसमादिशति । तदनु अश्वल-भुज्यु-आरुणि-उषस्त-आर्तभागादीनां प्रश्नान् समाधाय याज्ञोऽन्तर्यामी सर्वाधार आत्मा इति, अक्षरब्रह्म एव सर्वाधार इति च साधयामास । अतिप्रश्नकृत्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाकल्यः शिरोवेदनया ग्रस्तः सन् चिकित्सालये नीयते। अनन्तरं जनकेन राज्ञा 'याज्ञवल्क्य एव ब्रह्मविद्वरिष्ठः' इति समुद्घोष्य सभा विसृज्यते। अनन्तरं समागतो वैशम्पायनो याज्ञवल्क्यस्य पुरतः क्षमायाचनपूर्वकं तस्मै साधुवादानर्पयति। सुचरकादयोऽपि पश्चात्तापान्विता भवन्ति।

पञ्चमे दृश्ये याज्ञवल्क्यतनयानां मधुवनितादीनां मैत्रेय्याश्च संवादक्रमे बालानामोङ्कारलेखनाभ्यासं प्रदर्श्य प्रणवस्य बाह्याभ्यान्तरस्वरूपे सोदाहरणं निरूप्येते। आपाततः सगुणनिर्गुणयोर्विरोधेऽपि मोक्षकाले विरोधोपशमो भवतीति च प्रदर्श्यते। मयूर्यण्डदृष्टान्तेन सगुणागुणयोरैक्यं विचारयतां बालानां तीक्ष्णा बुद्धिर्दूरदर्शिता च दर्शितास्ति। तदानीमेव सुवर्णालङ्कृताः सहस्रशो गा आनीय समङ्गलध्वनिर्याज्ञवल्क्य आश्रमे समायाति। सहस्रशो गावो हिमशैलीयाधित्यकासु अधःस्थलीषु च विस्रष्टुकामेन मुनिना लक्ष्मीरूपाया मातृरूपायाश्च गोर्महत्त्वं वर्णितं श्रूयते। 'गोशृङ्गस्थकाञ्चनखण्डानामुपयोगो मन्दिरच्छदिनिर्माणे करणीयः' इति याज्ञोक्त्या तस्य त्यागवृत्तिः प्रदर्शितास्ति।

प्रतिक्रियाख्ये षष्ठे दृश्ये मैत्रेयीकात्यायन्योर्मधुवनितयोश्च संवादद्वारा हिमपातस्य प्रसङ्गः, मानवीयव्यवहारवशाद् उष्णताभिवृद्धेः प्रसङ्गश्च दृश्यते। तदानीं हिमवत्पर्वतादीनां वर्णनेन एतदीयक्षेत्रस्य सनातनवैदिकसंस्कृतेश्च महन्महिमा गीतोऽस्ति। सपदि याज्ञवल्क्यस्य प्रवेशानन्तरमात्मानात्मबोधस्य विदेहजनकानां वैशिष्ट्यस्य च चर्चा प्रचलति। वनितां निद्रितां दृष्ट्वा जाग्रदाद्यवस्थानामात्मनि व्यतिरेकः, आत्मनस्तु अवस्थात्रयेऽप्यन्वयः प्रदर्श्यते। आत्मानं भाग्यहीनं मन्यमाना कात्यायनी तीर्थाटनमिच्छति। सा कर्मासक्ता दृश्यते। तादृशानां कल्याणाय तु योगवाशिष्ठस्यापि भिन्नशैल्याध्यापनमावश्यकमिति मैत्रेयी मनुते।

सप्तमे दायभागे चिन्ताक्रान्तो याज्ञवल्क्यो मैत्रेय्याः पुरतो विषयजिहासां प्रकटयति। सम्पदो दायभागं पत्नीद्वये व्यवस्थापयितुञ्चाभिलषति। अश्रुपूर्णनयना मैत्रेयी तु विनाशशीलं दायभागं विहाय केवलममृतत्वमेवाभिलषति। तस्यै आत्मबोधमुपदिश्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शङ्खस्वनव्याजेन अग्राह्यस्य परतत्त्वस्य प्रतीतिगम्यता च बोधिता । तत्रैव रज्जौ सर्पभ्रान्तिमभिनीय जगतोऽध्यासरूपता प्रदर्शिता। नित्यं वित्तव्यतिरिक्तं दायभागमभिलषन्त्यै मैत्रेय्यै आत्मनस्तु कामाय सर्वंप्रियं भवतीति सिद्धान्तप्रदर्शनपुरस्सरं याज्ञवल्क्यो विविधोदाहरणैर्ब्रह्मविद्या-मुपदिदेश। मर्कटोन्माथोदाहरणेनापि सर्वे प्राणिनः स्वात्मार्थमन्येषु स्निह्यन्तीति आत्मैव सर्वेभ्यः प्रियतर इति याज्ञवल्क्य उपदिशति । गुरुपूर्णिमावसरे याज्ञवल्क्याश्रमे जनकागमनसन्देशेन साकं दृश्यमिदमुपसंह्रियते।

अन्तिमे महाप्रस्थानाख्ये उपसंहारप्रकरणे याज्ञवल्क्यस्य प्रव्रजनसन्नद्धतां दृष्ट्वा मधुरपि तमनुजिगमिषति । कात्यायनी स्नेहवशात्तं निवारयितुमिच्छति । मैत्रेयी तु पोटलिकादिकं व्यवस्थापयति। उत्तरापन्थं प्रति गमनाय समागतः पिप्पलादो योगीश्वरयाज्ञवल्क्यस्य दर्शनार्थं तत्रायाति। व्यावहारिकसम्बन्धेन भागिनेयोऽपि पिप्पलादः परमार्थत आत्मनोरैक्यावबोधार्थं तमनुगन्तुमिच्छति परं 'श्रवणमनननिदिध्यासनैरात्मतत्त्वं सम्यगनुभूयता'मिति याज्ञोपदेशः पिप्पलादं प्रति स्वात्मतत्त्वावबोधार्थमलं भवति। तदनन्तरं याज्ञवल्क्यः स्वपुत्रीं वनितां स्वपुत्रं मधुञ्च 'देहलीदीपन्यायेन अन्तरात्मानमन्विष्य साक्षिभावेन व्यवहारसिद्धिरपि करणीया' इत्युपदिश्य स्वयं महाप्रस्थाने प्रतिष्ठासति।

८. नाट्यवैशिष्ट्यम्

ऐतिहासिकं विषयमाश्रित्य अभिनयपद्धत्या दार्शनिकविषयाणां सोदाहरणमुपस्थापनकौशलमेतस्य प्रमुखं वैशिष्ट्यम्। **शान्तोऽपि नवमो रस** इत्यभियुक्ता वदन्ति। अत्र शान्तो रसोऽङ्गी, इतरे शृङ्गारवीरादय अङ्गभूताः।

क) गूढतमदार्शनिकविषयस्य बोधगम्या प्रस्तुतिः

अत्र गूढतमदार्शनिकविषयस्यापि सहसा बोधगम्यत्वं सिद्धमस्तीति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदमनुपममवदानमत्र दृश्यते। कानिचन तन्निदर्शनानि प्रदीयन्ते यथा -

» अष्टावक्रसंवादे वारिकुल्योदाहरणेन 'शरीरे वक्रेऽपि अस्मत्प्रत्ययगोचर आत्मा निर्विकार' इति साधनम्।
» शरीरमिदं गृहम्, शरीरे नष्टेऽपि क्षेत्रज्ञ आत्मा तु अविनाशी एवेति बोधनम्।
» देवरातयाज्ञसंवादे द्युलोकादीनां रहस्यज्ञानाय बाह्ययन्त्राणि आविष्क्रियन्ते परमात्मतत्त्वन्तु आन्तरज्ञानगम्यमेवेति बोधः।
» ऊर्णनाभसूत्रोदाहरणेन सरघोदाहरणेन च कार्यकारणयोर्निमित्तोपादान-भेदबोधनम्।
» कुसुमसौरभोदाहरणेन चन्दनपादपोदाहरणेन च आत्मतत्त्वबोधनम्।
» उल्मुकोदाहरणेन जगतः प्रतीतिमात्रत्वप्रतिपादनम्।
» मुष्टिपरिमितस्य प्रस्थपरिमितसम्पादनं बोधमात्रमिति कथनम्।
» मनुष्यस्य जीवनं प्रारब्धस्य परिणामः, पुरुषार्थेन तु आत्मतत्त्वसाक्षात्कारः करणीय इति प्रस्तवनम्।
» मयूर्यण्डदृष्टान्तेन सगुणागुणयोर्भेदबोधनम्।
» क्षत्रियाणां वनितानामपि महावाक्येऽधिकारः। अतो ब्रह्मसभायां नहि जातिभेद इति प्रदर्शनम्।
» यज्ञोपवीतस्य सूत्रत्रयं जाग्रदाद्यवस्थात्रयस्य प्रतीकमिति बोधनम्।
» मनोवाक्कायकर्मणामैक्यस्य प्रतीकभूता शिखेति कथनम्।
» मर्कटोन्माथोदाहरणेन 'सर्वेषामात्मैव प्रिय न त्वन्यः' इति साधनम्।

ख) प्रकृतिवर्णनम्

» तत्तत्प्रकरणे हिमवत्प्रदेशस्य कोशी–गण्डकी–कर्णालीनदीनां तथा मुसी-माढा-विग्धी-विरजा-कमला-गेरुका-जलधिप्रभृतीनां नदीनां वर्णनञ्च विहितमस्ति।
» नेपालोपत्यकाया मिथिलाभागस्य च प्राकृतिकवैभवोपस्थापनं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाटकस्यास्यापरं वैशिष्ट्यम् ।

ग) सांस्कृतिकमहत्त्वप्रदर्शनम्

» नेपालोपत्यकायां शिवरात्रिमेलापकस्य विदेहक्षेत्रस्य नेपालोपत्यकायाश्च सम्बन्धस्य वर्णनमत्र विहितमस्ति ।

» हिमवत्संस्कृतिवर्णनव्याजेन पुरातनी संस्कृतिः कीदृशी आसीदिति सङ्केतः प्रदर्शितः ।

» गोपूजनसंस्कृतेः समुल्लेखः, गोवंशविस्तारकामना च विहितास्ति ।

» मन्दिरस्य सुवर्णमयच्छदिनिर्माणसन्दर्भस्य, राजसभायाः, राजकीयपरम्परायाः, ऋषीणामाश्रमस्य गार्हस्थ्यव्यवहारस्य च वर्णनमत्र उपलभ्यते । एवञ्च तत्तत्प्रसङ्गे कृषिकार्यस्य मेलापकादीनां वर्णनमपि विहितमस्ति ।

९. उपसंहारः

एवं महर्षेर्याज्ञवल्क्यस्योदात्तचरितप्रदर्शनेन साकं नाट्यमिदं पूर्णतामेति। 'याज्ञवल्क्यः कीदृशो महान् दार्शनिक आसीत्', 'दार्शनिकजगति तच्चिन्तनस्य महत्त्वं कीयदस्ति' इति बोद्धुञ्च प्रकृतनाटकं पर्याप्तमस्तीति मे मनीषा । अत्र वैदिकं पौराणिकञ्चेति वृत्तमादाय तत्परिपूरकाः प्रासङ्गिका या घटनाः कल्पिताः सन्ति, तासु काल्पनिकत्वमपि नैव प्रतीयते । ईदृशं महत्त्वपूर्णं विषयमुपस्थापयन् ग्रन्थकारो विख्यातकीर्तिः सत्यमोहनजोशी नितरां धन्यवादार्हः ।

साम्प्रतं पाश्चात्यशिक्षया विभ्रान्तचेतसो जना आत्मानं शिक्षितं मन्वीरन्, प्रमाणपत्रमपि गृह्णीयुः, वेतनभुजोऽपि भवेयुः, परमीदृशान् दार्शनिकविषयान् आकलयितुं न ते कदापि शक्नुवन्ति । एतदर्थन्तु संस्कृतवाङ्मयस्य गभीरमध्ययनमपेक्षितं भवति । दार्शनिकविषयावबोधं विना जीवनस्य साफल्यं न सम्भवतीत्यहं मन्ये । **कस्त्वम् ?,**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कोऽहम् ?, कुत आयाता वयम् ? किञ्चास्माकं जीवनस्य प्रयोजनम् ?, इत्यादिविषया वेदान्तदर्शनेनैव प्रकाशिता भवन्ति । लघ्वपि प्रकृतनाटकमीदृशानां वेदान्तदार्शनिकविषयाणामवबोधने सफलं दृश्यते ।

नाटकस्यास्य लेखकः सत्यमोहनः प्रकृतनाटकद्वारा गभीरतमं दार्शनिकमपि विषयं सहसा बोधगम्यं सम्पादयतीति ग्रन्थकर्तुरिदमनि_तरसाधारणं वैशिष्ट्यम्। एष स्वयमपि ऋषिकल्पः। एतदीयजीवनम् आर्षजीवनं चिन्तनञ्च प्रेरकचिन्तनम् । अध्यात्मज्ञानशून्या भौतिकचिन्तनमात्रनिरताः केवलमुदरम्भरिणो जना ईदृशचिन्तनं बोद्धुमपि न प्रभवन्ति, तथा मा भूत् । अध्यात्मचिन्तननिरतैर्मुनिभिर्निषेवितेऽस्मिन् देशे पुनरपि सा पुरातनी आर्षसंस्कृतिः प्रसरेत् । अध्यात्मज्ञानं विज्ञानेन साकं भूयो भूयः प्रभवेत् । याज्ञवल्क्यजनिभूमिः संस्कृतवाङ्मयस्याध्ययनाध्यापने पुनरपि प्रवर्तताम् । अध्यात्मविद्या प्रसरताम् । अत्रत्या मौलिकसंस्कृतिरेवमेव सहसा विलुप्ता मा भूत् । प्रकृतग्रन्थस्यानुवादको रोहिणीराजोऽपि संस्कृत_वाङ्मयसमाराधनकर्मणि सदा साफल्यमवाप्नुयात् । प्रतिक्षणमेतदीय उत्साहः समेधमानो भूयात् । संस्कृताध्ययनाध्यापनग्रन्थसम्पादनलेखनादिकर्मणि एतस्य प्रवृत्तिरस्मासु भृशं हर्षप्रकर्षं जनयति । आबाल्याद् गुरुकुलनिवासस्य सद्गुरुसमाश्रयस्य चायं परिणामः सदा सफलः सार्थकः सदुदर्कश्च भूयादित्याशासे। ग्रन्थस्यास्य रचनायामनुवादेऽभिनये च विहितः प्रयासः सदा सफलः सार्थकश्च भूयादिति भवानीजानिं भूतनाथं श्रीविद्येश्वरमभ्यर्थये ।

- २०७४ वैक्रमाब्दः, विवाहपञ्चमी

डा. गुरुप्रसादः सुवेदी
सहप्राध्यापकः
नेपाल–संस्कृत–विश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्मृतिसन्दर्भः

योगीश्वरं याज्ञवल्क्यं
सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो
ब्रूहि धर्मानशेषतः ॥
मिथिलास्थः स योगीन्द्रः
क्षणं ध्यात्वाब्रवीन्मुनीन्।
यस्मिन् देशे मृगः कृष्णः
तस्मिन् धर्मान्निबोधत ॥

- याज्ञवल्क्यस्मृतिः, आचाराध्यायः १,२

मुनयो योगिवृन्दवरिष्ठं महर्षिं याज्ञवल्क्यमभ्यर्च्य वर्णाश्रमस्य इतरधर्माणाञ्च विषये प्रवक्तुमन्वरुधन् । ततो मिथिलानगर्या वास्तव्यः स मुनिः क्षणं विचिन्त्य तान् मुनीन् अभाषत— "यस्मिन् देशे कृष्णसारहरिणाः स्वच्छन्दतया विचरन्ति, पूर्वं तस्य देशस्य धर्मविषये परिचर्चां कुर्याम ।"

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुवादकीया पुरोवाक्

तज्ज्ञानं प्रशमकरं यदिन्द्रियाणाम्,
तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् ।
ते धन्या भुवि परमार्थनिश्चितेहा,
शेषास्तु भ्रमनिलये परिभ्रमन्ति ।।[१]

ज्ञानं तदेव येन इन्द्रियार्थदेशं व्रजताञ्च इन्द्रियाणां व्यापारविनिर्णयोऽपि स्वात्मवशगः सम्पद्येत, ज्ञेयं तदेव यदुपनिषद्भिः सुनिश्चितम्, ते हि सौभाग्यशालिनो जना येषां परमस्पृहा परमार्थपरिनिश्चये वरीवर्ति, शेषास्तु भ्रमात्मकेऽस्मिन् संसारागारे बम्भ्रम्यमाणा वृथा कालं यापयन्तीति नूनं सत्यमभिहितं जगद्गुरुणा । सत्यादिपातालान्तस्याखण्डस्य ब्रह्माण्डस्य परमनियन्ता परमेश्वरोऽखिलदेहिनामन्तरात्मसाक्षितया वरीवृत्यमानो विक्षेपशक्तिसम्पन्नया मायया लोकान् स्वस्वकर्मसु प्रेरयति ।[२] एष एव हि स्वानुरञ्जनानुरागिणामनन्यचिन्तकानां भक्तानामद्वैतवर्त्मनि प्रेरणयापवर्गं प्रदापयति ।[३] अयमेव च नैकमार्गावलम्बिनां श्रेयःसाधनशीलानां साधकानां चरमं परमं लक्ष्यम् ।[४] समेषां जीवानां चरमपरमलक्ष्यभूतः स एव परमेश्वरोऽद्वयज्ञानापरपर्यायः सन् ब्रह्मेति परमात्मेति भगवानिति च

---

१. आदिशङ्कराचार्यः, **धन्याष्टकम् १**

२. ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।
-भगवद्गीता १८/६१

३. तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।
-भगवद्गीता १०/१०

४. नृणामेको गम्यस्त्वमसि पयसामर्णव इव । - **श्रीशिवमहिम्नःस्तोत्रम् ७**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्याह्रियते ।[५] तस्माज्ज्ञानदर्शनयोरेव न अपितु आत्मनि[६] चाऽद्वैतपदस्य अन्वयः । अद्वैतापरपर्यायं निखिलश्रेयःसाधनभूतं दर्शनमिदमौपनिषदं[७] वर्तत इति तु नाविदितं शेमुषीजुषाम् ।

द्वाभ्यामितं ज्ञातमिति द्वीतम्, द्वीतमेव द्वैतम्, द्वैतस्याभावोऽद्वैतमिति अव्ययीभावः ।[८] न द्वैतमिति अद्वैतं नञ्तत्पुरुषः ।[९] अव्ययीभावगतोऽभेदार्थोऽस्तु, भेदविरुद्धार्थो नञर्थो वा, एकत्वार्थपरावुभावपि विग्रहौ सिद्धान्तसम्मतौ **एकमेवाद्वितीयमिति**[१०] श्रुतेः ।[११] मनसापि अचिन्त्यरचनारूपस्य प्रपञ्चस्य आत्मसत्तातिरिक्तसत्ताकत्वाभावेन[१२] कल्पनामात्रत्वात् सर्वाधिष्ठानभूत आत्मैव[१३] एकमद्वितीयञ्च सद्वस्तु वर्तते, जीवात्मनोरैक्यावबोधेन याऽखण्डाऽऽनन्दस्थितिरनुभूयते, सैव मोक्षावस्थेति प्रतिपादनाय श्रौतसरणेरनुसरणशीलः सिद्धान्तः खलु अद्वैतसिद्धान्तः ।[१४]

---

५. वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

-श्रीमद्भागवतम् २/११

६. ... शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः । **-माण्डूक्योपनिषद् ७**

७. वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ।

-वेदान्तसारः ३, योगीन्द्रः सदानन्दः

८. समासविधायकं पाणिनीयं सूत्रम्– अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावात्ययाऽसम्प्रति-शब्द-प्रादुर्भाव-पश्चाद्यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु २/१/६

९. **समासविधायकं पाणिनीयं सूत्रम्**— नलोपो नञः ६/३/७३

१०. **छान्दोग्योपनिषद् ६/२/१**

११. द्रष्टव्यम्— अधिकारिभेदेनाद्वैतदिशा सृष्टिदृष्ट्यादिवादविमर्शः, डा. दिव्यचेतनब्रह्मचारी, सुसंस्कृतम् (शोधपत्रिका), वर्षम् ३, अङ्कः २, सुरुचिकलासमितिः, वाराणसी, वि.सं. २०७०

१२. (क) ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठा ।
तस्मादेतद्ब्रह्ममात्रं हि विश्वं नाधिष्ठानाद्भिन्नतारोपितस्य ॥ **-विवेकचूडामणिः २३१**

(ख) कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्मपयं जगत् । **-तेजोबिन्दूपनिषद् १/२९**

१३. सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ।
प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्न हि ॥ **-आत्मप्रबोधोपनिषद् १२**

१४. वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च ।
अखण्डरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः प्रमाणम् ॥ **-विवेकचूडामणिः ४७८**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मैवेकं सत्यं वस्तु, कल्पनामात्रस्वरूपो द्वैतप्रपञ्चश्च नैजसत्ताभाववत्त्वेन मिथ्यास्ति । अतोऽद्वैतात्मनि द्वैताभावरूपस्य प्रपञ्चस्य मिथ्यात्वं **नेह नानास्ति किञ्चन**[१५] इत्यनया श्रुत्या निरूप्यते । अनेनाऽद्वैतपदस्य च द्वैतोपलक्षिताऽऽत्मपरकता संसूच्यते । एतस्माद् द्वैतमिथ्यात्वसिद्धान्त एव वस्तुतोऽद्वैतसिद्धान्तोऽस्तीति स्फुटं सिध्यति । अत एव तु वेदान्तशास्त्रे द्वैतमिथ्यात्वसिद्धिपूर्वकं हि अद्वैतसिद्धिः प्रतिपाद्यते ।[१६]

अद्वैतवेदान्तदर्शनस्याऽस्य सैद्धान्तिकसौन्दर्यं विज्ञाय लक्षशः परमार्थसाधकाः, नैके चिन्तकाः, वैज्ञानिकाः, साहित्यिकाः, दार्शनिकाश्च दर्शनेऽस्मिन् समाकृष्टाः सन्दृश्यन्ते । इदमेव सर्वशास्त्राणां मूर्धन्यम्, शास्त्रान्तरं सर्वमस्यैव शेषभूतमिति इदमेवाऽऽदरणीयं मुमुक्षुभिः[१७] इत्यभिदधता स्वामिमधुसूदनेन सर्वोच्चमूल्याङ्कनेन दर्शनमिदं समीक्षितमस्ति । एवमेव दार्शनिको योगी स्वामी विवेकानन्दः कथयति[१८]— 'आधुनिकविज्ञानस्य सकलाश्च सिद्धान्ता वेदान्तदर्शनेन सहस्रशः संवत्सरेभ्यः पूर्वमेवाऽधिगता आसन्, आधुनिककाले तु भौतिकशब्दैः तेषां प्रकाशनमात्रं क्रियते ।' भारतस्य जनप्रियो राष्ट्रपतिरब्दुलः कलाम आर्यान् समुद्बुभुत्सन् ब्रूते[१९]– 'येन विश्वस्मिन् विश्वे जनमनःसु आश्चर्यभावस्य सञ्चारः सञ्जायते, तादृशोऽद्भुत इतिहासः, अद्भुता कथा, अद्भुतो ज्ञानकोशश्च अस्माकं पार्श्वे विद्यते परन्तु

१५. छान्दोग्योपनिषद् ४/४/१९

१६. अद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम् ।
-अद्वैतसिद्धिः, प्रथमः परिच्छेदः ३

१७. महिम्नःस्तोत्रम्, श्रीमधुसूदनी टीका ७

१८. **The Complete Works of Swami Vivekananda** (द्रष्टव्यम्— **विश्वमा भएका प्रसिद्ध मनीषीहरूको हिन्दुधर्मका बारेमा अभिमत**, लोकतान्त्रिक हिन्दुराष्ट्र नेपाल, स्वामी चन्द्रेश, बूढानीलकण्ठ आश्रम, बूढानीलकण्ठ – २, काठमाण्डौं, पृष्ठसङ्ख्या ६९–७०)

१९. **Pride of the Nation : Dr. A.P.J. Abdul Kalam by Mahesh Sharma, P. Bhalla** द्रष्टव्यम् ⇨ पूर्ववत्, पृष्ठसङ्ख्या ६५०

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वयं किमर्थं तदनुभूत्यै सन्नद्धा न स्मः ?, किमर्थं किमर्थं किमर्थम् ?' अद्वैतवेदान्तस्य सच्छास्त्रत्वं भावयन् खप्तडस्वामी समुपदिशति[२०]– 'यदा तु सच्छास्त्ररूपमुपनेत्रं परिधाय संसारं निरीक्षमाणः कार्ये प्रवर्तिष्यसे तदनु हि संसारस्य परब्रह्मणश्च याथार्थ्यं बोद्धुं प्रभविष्यसि, नान्यथा ।' गुरुवर्यस्य डा. स्वामि-रामानन्द-गिरिमहाराजस्य शास्त्रानुभूतिर्निगदति यत्[२१] 'तृण-पलालादीनां सारभूतं पयः, पयःसारं नवनीतम्, नवनीतस्यापि सारभूतमाज्यमिव मानवानां कृते वेदैः शिक्षिता चरमा शिक्षा वेदान्तोऽस्ति ।'

न केवलमार्यावर्ते हि, अपितु चीन-फ्रान्स-जर्मनी-डेनमार्क-बेलायतऽमेरिकाऽष्ट्रेलियाऽऽयरल्याण्डादिदेशेषु च दर्शनमिदं सम्यक् ख्यातिङ्गतं दरीदृश्यते ।[२२] ग्रीसराज्यस्य महाराज्ञ्याः फ्रेडिकायाः कथनमस्ति[२३]– 'पदार्थविज्ञानस्य उच्चानुसन्धानेनाऽध्यात्मिकानुसन्धानं प्रति अहं प्रेरिता । अनुसन्धानमिदं शङ्कराचार्यस्याऽद्वैतवादमवाप्यैवोपसंहृता । अन्ते स एवाऽद्वैतवादो मज्जीवनस्य दर्शनं विज्ञानञ्च प्रत्यपद्यत ।' जर्मनपण्डितेन पल–डेउसनमहोदयेनाऽभिहितं यद्[२४]- 'ज्ञानविज्ञानद्रुमे उपनिषत्समं मनोरमं कुसुमं हिन्दूनां वेदान्तदर्शनसमं फलञ्च नान्यल्लभ्यते ।'

अध्यात्मविद्या विद्यानाम्[२५] इति पद्मनाभमुखपद्मेन च प्रशंसितस्याऽध्यात्मनिरूपणपरस्याऽद्वैतदर्शनस्य श्रुतिमूलकत्वन्तु सुविदितमेव । तत्रापि श्रुतिभ्यः समुद्धृत्याऽनुशीलन-व्याख्यान-प्रचारादिकर्मभिरद्वयवादस्य

---

२०. **म र मेरो कर्तव्य,** परमहंस स्वामी सच्चिदानन्द सरस्वती (खप्तडबाबा)

२१. **पुरोवाक्,** ईशादि दश उपनिषद् (नेपाली अनुवाद एवं विशेष व्याख्या), डा. स्वामी रामानन्द गिरि

२२. (द्रष्टव्यम्⇨ **विश्वमा भएका प्रसिद्ध मनीषीहरूको हिन्दुधर्मका बारेमा अभिमत,** लोकतान्त्रिक हिन्दुराष्ट्र नेपाल, स्वामी चन्द्रेश, बूढानीलकण्ठ आश्रम, बूढानीलकण्ठ – २, काठमाण्डौं, पृष्ठसङ्ख्या ३७–७७

२३. **http:en.wikiquota.org/wiki/Hinduism** (द्रष्टव्यम्⇨ पूर्ववत्, पृष्ठसङ्ख्या ५८)

२४. **History of Philosophy by Paul Deussen** (द्रष्टव्यम्⇨ पूर्ववत्, पृष्ठसङ्ख्या ५२)

२५. **भगवद्गीता १०/३२**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिष्ठायै वसिष्ठाऽऽत्रेय-जैमिनि-बादरि-काश्यपाऽऽश्मरथ्यौडुलोमि-कार्ष्णाजिनि-काशकृत्स्न-बादरायण-याज्ञवल्क्य-गौडपाद-शङ्कराचार्यादीनां[२६] पारेशतं सुधियां सुमहदवदानमालोक्यते। तेषु सत्यमोहनप्रणीतस्य दार्शनिकनाट्यकाव्यस्याऽस्य नायको याज्ञवल्क्यो नाम मुनिः शतपथब्राह्मणे[२७], बृहदारण्यकोपनिषदि[२८], वायु-विष्णु-स्कन्द-ब्रह्माण्ड-भागवतपुराणेषु[२९], महाभारत-याज्ञवल्क्यस्मृति-रामचरितमानसादिग्रन्थेषु[३०] च जेगीयते।

योगीश्वरोऽपि गार्हस्थ्यपरिवाहकः, गृहाश्रममध्यस्तोऽपि विगलितदेहाध्यासः परिणीतरमणीयुग्मोऽपि वीतरागः, सकलागमज्ञोऽपि विद्याभ्यासेऽविरतन्निरतः, विजितविपश्चित्परिषदोऽपि निरभिमानः, ब्रह्मनिष्ठोऽपि गुरुकुलसञ्चालनशीलः, सम्यगधीतयजुरपि चतुर्वेदाध्यापनाभिज्ञो महर्षिरयं योगाभ्यास-ब्रह्माभ्यास-परिशोधितान्तःकरणः, मिथिला-मिथिलेश-गौरवः, आदित्यसम्प्रदायविस्तारेण वैदिकज्ञानप्रचारणपरायणः, अयातयामयजुर्ज्ञानपरिलसितमस्तिष्कः, राजर्षिपरिजन-सुधीजनसम्मानितः, कुरुपाञ्चालादिधीमद्धौरेयः, अद्वैराद्धान्तविशारदः, वेद-स्मृति-शिक्षा-ब्रह्माणादिग्रन्थानां प्रवर्तनेनाऽनुष्ठितलोकोपकारश्च मनीषी आसीत्। दर्शनसन्दर्भेषु पौनःपुन्येन समुदाहरणीयम् **आत्मा वारे द्रष्टव्यः...**[३१] इत्यादिवाक्यमपि एतस्यैव

---

२६. द्रष्टव्यम्⇨ **ब्रह्मसूत्रम् १/२/२९–३०, १/४/२०–२२, ३/१/९,११, ३/४/४४, ४/३/७, ४/४/६,१०।** ब्रह्मसूत्रेण सह योगवासिष्ठ–शाङ्करभाष्य–माण्डूक्यकारिकादिग्रन्थैश्चाऽद्वैतवादस्य प्रतिष्ठापनाय एतेषामवदानं विज्ञायते।

२७. **शतपथब्राह्मणम् १४/५–७**

२८. **बृहदारण्यकोपनिषद् २/४, ३–४ अध्यायाः**

२९. **वायुपुराणम् १/६१/५–२६, विष्णुपुराणम् ३१५, स्कन्दपुराणम्रखण्डः ६/१२९, २७८, ब्रह्माण्डपुराणम् १/३५/१४–३०, श्रीमद्भागवतपुराणम् १२/६**

३०. **महाभारतम्, शान्तिपर्व ३१८/१–२५, याज्ञवल्क्यस्मृतिः, आचाराध्यायः, उपोद्घातप्रकरणम्..., रामचरितमानस १/याज्ञवल्क्य–भारद्वाजसंवाद**

३१. आत्मा वारे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्यासितिव्यो मैत्रेय्यात्मनो वाऽरे दर्शनेन श्रवणेन मत्या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनीषिण उपदेशवचनम् । राजर्षेर्जनकस्य च तत्त्वोपदेष्टा गुरुरयं राजसभायां ब्रह्मविद्वरिष्ठः समुद्घोषित इति तु बृहदारण्यकोपनिषदि शतपथब्राह्मणे च सविस्तरं वर्णितमवाप्यते । जल्पकथामाधृत्य प्रवर्तितः तत्रत्यः शास्त्रार्थोऽतीव वैदुष्यपूर्णो बभूव । तत्र सप्त विद्वांसः, विदुष्येका च योगीश्वरेण सह शास्त्रार्थे भागं जगृहिरे ।[३२] विद्वन्मूर्धन्येन योगीश्वरेण समेषां विद्वज्जनानां शास्त्रीयजिज्ञासा समाहिता । अतिप्रश्नं कुर्वत्यपि गार्गी योगीश्वरेणाऽवधानाय सम्बोधिता सती उपरराम ।[३३]

आरुणेर्जिज्ञासासमाधानाऽनन्तरञ्च अनुमतिं संयाच्य[३४] तया योगीश्वरात् स्वीये जिज्ञासे समाधापिते परन्तु शास्त्रार्थकलापमिदं सम्यग् वीक्षमाणोऽपि शाकल्योऽनभिज्ञो बाल इव अतिप्रश्नं चकार । आचार्यपरम्परया प्रश्नार्हे देवताविषये जिज्ञासाया अनौचित्याद् निषिध्यमानाया गार्ग्या मौनाऽऽचरणं दर्शं दर्शमपि अतिप्रश्नं

विज्ञानेनेदं सर्वं विदितम् । -**बृहदारण्यकोपनिषद् २/४/५**

३२. (क) राजर्षेजनकस्य प्रधानर्त्विग् होताऽश्वलः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/१/२**)

(ख) जरत्कारुगोत्रीयर्तुभागस्य तनय आर्तभागः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/२/१**)

(ग) लह्यस्य पौत्रो लाह्यस्य च पुत्रो लाह्यायनिर्भुज्युः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/३/१**)

(घ) चक्रपुत्रः —चाक्रायण उषस्तः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/४/१**)

(ङ) कुषीतकपुत्रः —कौषीतकेयः कहोलः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/५/१**)

(च) वचक्नुदुहिता —वाचक्नवी गार्गी (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/६/१**)

(छ) उद्दालकापरनामा अरुणपुत्रः —आरुणिः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/७/१**)

(ज) विदग्धापरनामा शकलपुत्रः —शाकल्यः (द्रष्टव्या⇨ **बृहदारण्यकोपनिषद् ३/९/१**)

३३. कस्मिन्नु खलु ब्रह्मलोका आतोश्च प्रोताश्चेति स होवाच गार्गि १ मतिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि १ मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ।

-**बृहदारण्यकोपनिषद् ३/६/१**

३४. अथ ह वाचक्नव्युवाच ब्रह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि॥। ।

-**बृहदारण्यकोपनिषद् ३/८/१**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्वाणं शाकल्यमभिलक्ष्य योगीश्वर औपनिषदपुरुषविषये प्रतिप्रश्नं विदधौ। तत्समाधातुमक्षमः शाकल्यः शास्त्रार्थनियमभञ्जनस्य दुष्परिणामं बुभोज।[३५] योगीश्वरः शाकल्यमुनिं नहि शशाप, अपितु आदित्यादधीतयजुर्विद्यं[३६] तं प्रति अतिप्रश्नविधातुरेव मूर्धा विपतिष्यतीति आदित्यनारायणस्यैव वरमासीदिति सुधियः समामनन्ति। आख्यायिकावर्णितोऽतिप्रश्नदुष्परिणामोऽस्तु, स्वात्मनः कामाय सर्वप्रियत्वसन्दर्भो वा, तत्र तत्र कथानकानामीषत्परिवर्तनपूर्वकं रोचकताधापनेन सामाजिकानां पुरतो प्रदर्शनार्हत्वसम्पादनेन च नाटकप्रणेत्रा प्रकृते नाटके पौरस्त्यनाट्यसिद्धान्तो यथासम्भवं परिपालित एव प्रतिभाति।

देवरातसूनोर्याज्ञवल्क्यस्य[३७] जन्मभूः कर्मभूश्च मिथिलासीत्।[३८]

---

३५. (क) ...तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यति। तं ह मेने शाकल्यस्तस्य ह मूर्धा विपपातापि...। **-बृहदारण्यकोपनिषद् ३/९/२६**

(ख) ...तं त्वा त्वां विद्याभिमानिनं पुरुषं पृच्छामि। तं चेद् यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि, मूर्धा ते विपतिष्यतीत्याह याज्ञवल्क्यः। त्वं त्वौपनिषदं पुरुषं शाकल्यो न मेने ह न विज्ञातवान् किल, तस्य ह मूर्धा विपपात विपतितः।

-बृहदारण्यकोपनिषद्, शाङ्करभाष्यम् ३/९/२६

३६. (क) अहमयातयामयजुःकाम उपसरामीति॥
एवं स्तुतः स भगवान् वाजिरूपधरो हरिः।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः॥ **-श्रीमद्भागवतम् १२/६/७२–७३**

(ख) ...आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।

-बृहदारण्यकोपनिषद् ६/५/३

(ग) मयादित्यादवाप्तानि यजूंषि मिथिलाधिप १ **-महाभारतम्, शान्तिपर्व ३१८/२**

३७. (क) देवरातसुतः सोऽपिच्छर्दित्वा यजुषां गणम्।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्॥ **-श्रीमद्भागवतम् १२/६/६४**

(ख) याज्ञवल्क्यः, पुं, (वल्कयतीति। वल्क अच्। यज्ञस्य वल्को वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क "गर्गादिभ्यो यञ्।" ४/२/१०५। इति यञ्।

-शब्दकल्पद्रुमः, चतुर्थः काण्डः (व्यञ्जनवर्णः। य – व।)

३८. योगिनो याज्ञवल्क्यस्य राजर्षेर्जनकस्य च।
जानक्या मिथिला गार्ग्या जन्मभूः कर्मभूरियम्॥ **-मिथिला**, योगी नरहरिनाथः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निमिकुलावतंसानां वैदेहजनकानां राजधानी मिथिला खलु सम्प्रति जनकपुरमित्यभिधेयेन प्रख्यातिङ्गता समाकर्ण्यते।[३९] योगीश्वरस्य सन्दर्भेऽस्मिन्नस्मद्गुरुवर्येणाऽनूदितकृतेरस्या भूमिकायामेव सम्यक् परिचर्चा विहिता वर्तते, तथैव काव्यप्रणेत्रा सत्यमोहनमहोदयेन च काव्येऽस्मिन् सपरिकरं वर्णितमस्तीति नाधिकमिह लिलेखिषामि। विद्वन्महिममण्डितस्य ब्रह्मविद्वरिष्ठस्य योगीश्वरस्य याज्ञवल्क्यस्य विषये यावदपि लिख्येत, तदल्पमेव प्रतिभाति।

नेपालराष्ट्रगौरवस्य महर्षेर्याज्ञवल्क्यस्य जीवनवृत्तमाश्रित्य नाट्यग्रन्थप्रणयनेन संस्कृतिविदा सत्यमोहनजोशीवर्येण यत् सुमहदवदानं विहितमस्ति, तदितिहासपृष्ठेषु स्वर्णाक्षरैर्विलिख्यते । धन्योऽस्ति मुनिर्याज्ञवल्क्यः, धन्यश्चायमृषिकल्पः सत्यमोहनः । धन्यौ मे पितरौ, ययोः समयोचितेन निर्णयेन संस्कृतवाणी मद्वाणी समपद्यत । धन्याश्च मदीया गुरुकुलीना आचार्याः, येभ्योऽधीतविद्यायाः प्रयोगविज्ञानस्यैव परिणामः खलु अनूदितेयं नाट्यकृतिः । सविशेषं समभिवन्दनीयोऽस्ति श्रद्धेयाचार्यो डा. गुरुप्रसाद–सुवेदिवर्यः, यस्य वैदुष्यपूर्णया समीक्षात्मिकया भूमिकया नाट्यकृतेरस्याः सौन्दर्यमुपचितमस्ति, अपि च एष एव हि एवंविधेषु सत्कार्येषु मदीयं प्रथमं प्रवृत्तिबीजं समुत्प्रेरकतत्त्वञ्च ।तथा हि मुद्रणात्पूर्वमेतस्याऽध्ययनपूर्वकं भाषा-शैलीगतपरामर्शेनाऽनुवादकमिममुपकृतवन्तः प्रियभ्रातरः गणेश-तिमिल्सिना, शिवराज-लामिछाने, नारायण-घिमिरे, प्रियसखो गोविन्द-घिमिरे च साधुवादार्हत्वेन इह स्मर्यन्ते। संस्कृतस्याऽभियानात्मकेषु अशेषकृत्येषु सद्भावनयाक्षराङ्कनादि_

---

३९. मिथिलानगरी च जनकानां राजधानी। विदेहो मगधदेशस्य पूर्वोत्तरभागे विद्यमान एको देशविशेषः। तस्य राजधानी मिथिलासीत्, यश्चाधुना मधुवन्या उत्तरस्मिन् भागे नेपाले जनकपुर इति नाम्ना प्रसिद्धो वर्तते। -**जनकदर्शनम्** (राजर्षेर्जनकस्य विदेहसिद्धान्तस्य समीक्षात्मकमध्ययनम्) डा. स्वामी रामानन्दगिरिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्यकौशलेन च अनिशं प्रोत्साहनशीला सहचरी यमुना न्यौपाने च नूनमिह स्मृतिगोचरतां भजते।

संस्कृतं समग्रस्यापि विश्वस्य भाषासु सभ्यतासु च कथमनुस्यूतं वर्तत इति आसंसारं ज्ञापनायाऽस्मद्देश एव शिक्षाकेन्द्रं भवत्विति महत्स्वप्नं परिकल्प्य तदर्थं बद्धपरिकरं[४०] स्मृतिशेषं जनार्दन-घिमिरेवर्यं स्मारं स्मारं सम्प्रति रोरुद्यते मन्मानसम्, येन साकं सहयात्रयैव मदीया संस्कृतसेवा प्रचलति स्म । अस्याः काव्यकृतेः अन्तःसज्जासम्पादकस्य प्रियानुजस्य पर्वतराजस्य, नेपालस्य शिक्षाक्षेत्रेऽस्माभिः सञ्चालितस्य संस्कृताऽभियानस्य सहयात्रिणः सानुबाबु-आचार्यस्य च एतन्नाट्यग्रन्थस्य सज्जादिकार्यकलापे फलाधिगमं यावत् साहाय्यार्थमिह संस्मृतिविषयत्वं वाञ्छामि।

दर्शनेषु दर्शनीयतमत्वेनाऽभिमतस्याऽद्वैतदर्शनस्य परिपोषकाचार्यस्य याज्ञवल्क्यस्य दार्शनिकसिद्धान्तपरिलसिता काव्यकृतिरियं वेदान्तशिरोमणेः स्वामि-रामानन्दगिरिवर्यस्य शिष्येणानूद्यमानेति निशम्य सातिशयं सम्मोद-मुपगत एतन्नाट्यप्रणेता सत्यमोहनमहोदयश्च अनुवादकीयां पुरोवाच-मुपसंहरतो मम मानसपटले साम्प्रतं नरीनृत्यमानः प्रमीयते । समेषामपि मानवीयवचसां मूलवाणी संस्कृतगीरियं सम्प्रति आसंसारमभिव्याप्यमाना संलक्ष्यत इति तु सत्यमेव । तस्मात् संस्कृतगिरानूदितमिदं नाट्यकाव्यं विश्वप्रसिद्धिं यास्यतीति हेतुना एतन्नाट्यप्रणेतुः सम्मोदोऽपि समुचितः खलु, परन्तु ऋषिकल्पस्य एतस्य नाट्यकृतेः संस्कृतेनाऽनुवादकार्यस्य समधिगतयेऽनुवादकोऽयं महद्गौरवमनुभवन्नस्मै कृतज्ञतां विनिवेद्य काव्यमिदं सम्प्रेष्य प्रकृतेऽस्मिन् कार्ये मन्मनःप्रवर्तकस्य डा. घनश्याम-खतिवडावर्यस्य

४०. **स्मृतिलेखः**, संस्कृतसुरभिः, वार्षिकी अनुसन्धानात्मिका त्रैभाषिकी पत्रिका, वर्षम् १, अङ्कः १, २०७४ मार्गशीर्षः, सं.के.वि., त्रि.वि., कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च आभारभारं मन्यते। जयतु वैदिकी संस्कृतिः, विजयतां संस्कृतम् !!!

मानसं संस्कृतं मेऽस्तु व्याहारः संस्कृतो भवेत्।
संस्कृता मे भवेत् प्रज्ञा संस्कृतं मम जीवनम् ॥

२०७४ पौषशुक्लपञ्चमी

संस्कृतोपासकः
रोहिणीराजः तिमिल्सिना
उपप्राध्यापकः
त्रिभुवन–विश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यानुक्रमणिका

प्रस्तावना
विचित्रकलेवरा आकृतिः १
दृश्यम् १
स्वात्मदर्शकं यन्त्रम् ६
दृश्यम् २
विद्यावमनम् २२
दृश्यम् ३
महावाक्यम् ३५
दृश्यम् ४
ब्रह्मसभा ५६
दृश्यम् ५
दूरदर्शिता ८१
दृश्यम् ६
प्रतिक्रिया ९४
दृश्यम् ७
दायभागः १०४
उपसंहारः
महाप्रस्थानम् १२४
विशेष–शब्दार्थ–गमनिका १३३

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाट्यपात्राणि

जनकः	– मिथिलाधिपतिः
याज्ञवल्क्यः	– प्रमुखो नायकः
अष्टावक्रः	– ब्रह्मवादी मुनिः
आर्तभागः	– ब्रह्मवादी मुनिः
आरुणिः	– ब्रह्मवादी मुनिः
उषस्तः	– ब्रह्मवादी मुनिः
कहोलः	– ब्रह्मवादी मुनिः
भुज्युः	– ब्रह्मवादी मुनिः
शाकल्यः	– ब्रह्मवादी मुनिः
पिप्पलादः	– ब्रह्मवादी मुनिः
गार्गी	– ब्रह्मवादिनी नारी
वैशम्पायनः	– याज्ञवल्क्यस्य गुरुः
सत्यकामः	– राज्ञो जनकस्य गुरुः
मधुः	– याज्ञवल्क्यस्य तनयः
वनिता	– याज्ञवल्क्यस्य दुहिता
सामश्रवाः	– याज्ञवल्क्यस्य शिष्यः
सुरूपा, देवरातः	– याज्ञवल्क्यस्य मातापितरौ
मैत्रेयी	– याज्ञवल्क्यस्य ज्येष्ठभार्या
कात्यायनी	– याज्ञवल्क्यस्य कनिष्ठभार्या
सुचरकः, प्रियदत्तः	– याज्ञवल्क्यस्य सहपाठिभ्रातरौ
अश्वलः	– मिथिलाधिपतेर्जनकस्य गुरुः/प्रमुखः पुरोहितः

राज्ञी, राज्यमन्त्री, सैनिकः, अधिकृतः, चिकित्सकः, अङ्गरक्षकः, राजगुरुः, द्वारपालः, समर्थकः, स्वयंसेवकः, महिला, वृद्धाः, ग्रामीणा इत्यादयः ।

(स्थानम् – जनकपुरम्, कमलातटवर्तिनो ग्रामाश्च)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीसत्यमोहनप्रणीतं दार्शनिकनाटकम्

महर्षि-याज्ञवल्क्यः

प्रस्तावना

विचित्रकलेवरा आकृतिः

विश्वात्मन् ! सततं त्वयैव हृदयात् सत्सङ्गतौ प्रेरितम्,
नाहं त्वत् पृथगस्म्यबोधि तदनु ब्रह्मास्म्यहं निश्चितम् ।
सृष्टेः प्रागधुना भविष्यति किल त्वं सत्त्ववान् सर्वदा,
सर्वेषामिह भद्रमस्तु सततं सम्पाहि नित्यं मुदा ।।

(नान्द्यन्ते)

सूत्रधारः अहो ! कियद् विपुलं पुरद्वारं वर्तते मिथिलाधिपतेः प्रासादस्य !मकराकृतिकं तोरणम्, द्वारशोभां वर्धयन्तोऽम्भोभरितकलशाः, नानाकारैरुड्डयमानो धूपदीपेभ्यः समुद्गतो धूमः, द्वारनिकटे सज्जितवेषा द्वारपालाः, दर्शकानां महान् सम्मर्दः, अहो विचित्रः संयोगः !

(गायन्) निवर्तनक्षणं पुण्यं राजर्षेस्तोषकारकम् ।
सुखदं शुभदं सम्यक् प्रजानां प्रीतिदायकम् ।।
प्रजानां पालकः प्रेम्णा विद्वाँश्च विद्वदाश्रयः ।
जयतु मिथिलाधीशस्तत्समो दुर्लभो नृपः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कश्चन जनः *(निकटे पङ्क्तिबद्धं बुभूषन्तं विचित्र–कलेवरं जनं वीक्ष्य छिः छिः इति घृणास्पदां वाचं व्याहरन्)* हा हन्त ! मिथिलाधिपतेर्जनकस्य प्रवेशकाले एतादृशस्य कुरूपस्य दर्शनम् ! सम्प्रति

विचित्रकलेवरस्यामुष्य जनस्यात्रोपस्थानं नोचितं खलु, अपाकार्योऽयम् इतः । *(अपाचिकीर्षति परन्तु विचित्रकलेवरः स जनो दार्ढ्येन तदेव स्थानमधितिष्ठति ।)*

द्वितीयो जनः ननु सत्यम् । कीदृशं वक्रवपुरस्य ! छीः, वदनञ्च कीदृशं घृणास्पदम् !

तृतीयो जनः कुतोऽत्र प्राविशदयं कुलक्षणो जनः ! (तारस्वरेण) याहि इतोऽपसर !

(सर्वेऽपि देहनिष्पीडनेन तं कुरूपजनं ततोऽपाकर्तुं चेष्टन्ते परन्तु सोऽविचलः सन् स्वस्थानमधिष्ठातुं प्रयतते। सर्वेषामपि दृष्टिस्तस्यैव विचित्रां मुखाकृतिं विषयीकरोति । तदानीमेव यथोचितपरिधानवतो राजगुरोरुच्चस्तरस्य पदाधिकारिणश्च तत्र प्रवेशो जायते । तयोर्दृष्टिरपि तस्मिन्नेव विचित्रकलेवरे जने निपतति । अक्षिलक्ष्यीकृते हि तस्मिन् घृणाभावेन विकृतीकृतवदनौ तौ तमेव निर्विरामं पश्यतः ।)

राजगुरुः स्वदेशभ्रमणंसमाप्यमिथिलाधिपतेर्जनकस्यराजप्रासादंप्रति निवर्तनक्षणेकुलक्षणोऽयंजनः किमर्थमिहदृष्टिपथमारूढवान् स्यात् ! *(प्रहरिणः सङ्केत्य)* हे ! गलहस्तयत एतं शतशो वक्रीभूतदेहं जनम् !

अष्टावक्रः *(सविनयं सर्वानभिवाद्य)* महानुभावाः ! मिथिलाधिपतेर्दर्शनं विधाय अभिवादनमर्पयितुं भवतां यावानधिकारो वर्तते तावानेव मदीयश्च । भवतां सघृणेन व्यवहारेण नाहं घृणास्पदत्वं भजामि, न च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपाकरणायासेन भीतः सन् पलायितो भवामि । किं वा भवन्तो मां शतशो वक्रतापन्नवपुँश्च ब्रूयुस्तथापि नहि मां स्पृशन्ति भवद्वचांसि ।

(सर्वेऽपि उच्चैर्हसन्ति ।)

अहन्तुअहमेव, स्वस्वरूपोऽस्मि, आत्मस्वरूपोऽस्मि, भवत्समोऽस्मि । त्वगस्थिमांसादीनां वक्रभावेन मद्देहान्तर्वर्ती अस्मत्प्रत्ययगोचरोऽ सावात्मा वक्रतां नैवोपपद्यते ।

वक्रत्वेनास्थिमांसानां नाहं वक्रोऽस्म्यसंशयम् ।
कुल्या वक्रतया किं वा वारि वक्रत्वमाप्नुयात् ? ॥

(सर्वे पुनः सोपहासमुच्चैर्हसन्ति)

अष्टावक्रः *(उच्चस्वरेण)* किं प्रयोजनं भवतां हासस्य ?

प्रबुद्ध इव जनः शतशो विकृतदेहस्य तव मुखाकृतिं विलोक्य निर्गतोऽयं हासः ।

अष्टावक्रः अस्तु तर्हि । पञ्चभिर्ज्ञानेन्द्रियैः कर्मेन्द्रियैर्मनोबुद्धि–चित्ताहङ्कारैर्युक्ते मच्छरीरे शतशो विकृतयः स्युस्तथापि नाहं विकृतोऽस्मि । धिक् केवलं दैहिकं बाह्यं रूपं वीक्षमाणां भवदीयां दृष्टिम् । धिग् मर्दलदेहस्थयोः त्वचोर्भेदं ज्ञातुमशक्तं भवदीयं विवेकम् ।

निर्विकारो निराकारो नित्योऽस्मि सर्वथा सदा ।
सनातनोऽस्मि पूर्णोऽस्मि ब्रह्मास्मि ननु सर्वदा ॥

(सर्वेस्तब्धा आश्चर्यान्विताश्च भवन्ति । मिथिलाधिपतेर्जनकस्य आगमनसूचनावाप्यते । सर्वेऽपि पङ्क्तौ सम्यक् संयुज्य अवधानमाश्रयन्ते । अमात्यादिपार्षदैः परिवारितस्य राज्ञो जनकस्य तत्र प्रविष्टिर्भवति । लाजाकुसुमालक्तककानां वृष्टिर्जायते ।)

राजगुरुः *(तारस्वरेण)* मिथिलाधिपतेर्महाराजजनकस्य !

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वे *(युगपत्)* जय !

(जयजयध्वनिराकर्ण्यते । मिथिलाधिपतेर्जनकस्य प्रासादान्तः प्रवेशानन्तरं तत्र सङ्घटितो जनसम्मर्दः क्रमशो विलग्नो भवति । विचित्रकलेवरोऽष्टावक्रः तत्रैवावस्थितो विलोक्यते । जिज्ञासुर्याज्ञवल्क्यो निवृत्य तं समुपागत्य तेन सह विवक्षति ।)

याज्ञवल्क्यः *(सविनयं प्रणम्य)* अत्र भवान् कः ? क्व च वास्तव्यः ?

अष्टावक्रः त्वमेवाहम् । मद्देहञ्च तत्रैव, यत्र हिमगिरेर्मूलभूः ।

याज्ञवल्क्यः *(सगाम्भीर्यम्)* महाशय ! नैवाज्ञायि मया भवद्वचसोऽर्थगाम्भीर्यम् ।

अष्टावक्रः *(शान्तभावेन)* श्रूयतां तावत्, क्षेत्रज्ञोऽहम्, साक्षिरूपेण स्वक्षेत्रे निवसनशीलः ।

याज्ञवल्क्यः *(तात्पर्यं बुभुत्सन्)* कीदृशे क्षेत्रे ?

अष्टावक्रः गार्हक्षेत्रे, गृहञ्च वपुरिदम् । ध्वंसेत गृहम्, विनश्येच्च वपुः परं एतदध्यक्षः क्षेत्रज्ञोऽविनाशी सर्वज्ञश्च वर्तते । तेनैव तु पुरातनस्य ध्वंसनं नूतनस्य सर्जनमात्रम् ।

(' याज्ञवल्क्य ! अयि याज्ञवल्क्य !' आह्वानं कर्णगोचरीक्रियते । तदानीमेव नवीनस्य जनद्वयस्य तत्र सम्प्राप्तिर्जायते, यौ तस्य सखायौ वर्तेते । विचित्रकलेवरेण जनेन सह संलपतस्तस्य याज्ञवल्क्यस्य करौ प्रगृह्य तं तौ समाकृषतः ।)

एकः सखा याज्ञवल्क्य ! चिरमन्विष्टो भवान् आवाभ्याम् । भवाँस्तु इह एतादृशा कुरूपेण सह वार्तां कुर्वाणोऽस्ति ! *(अवाच्यां दिशि अङ्गुलीनिर्देशेन)* साम्प्रतन्तु लोकभाष्करोऽपि अस्तङ्गतः । व्रजाम तावद् इतः, विलम्बः सञ्जातः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(याज्ञवल्क्योऽनिच्छन्नेव ताभ्यां सह प्रतिष्ठते। पृष्ठतोऽभिमुखः सन् वारम्वारं सोऽष्टावक्रं वीक्षते।)

अष्टावक्रः *(प्रस्थीयमानान् तानालोच्य)*

अपरिज्ञाय स्वात्मानं स्वरूपे दैहिके तथा।
रमन्ते प्राणिनो मूढा जीवितं यापयन् वृथा॥

(विहसन्) इमे प्राग् आत्मनात्मानं वेत्तुं किमर्थं न प्रयतन्ते!

(याज्ञवल्क्योऽवधानेन तच्छुश्रूषते, तिष्ठांसति च निवृत्य।)

याज्ञवल्क्यः *(सहसा सस्वरम्)* प्राग् आत्मनात्मानं परिचेतुम्?

अष्टावक्रः *(दक्षिणेन पाणिना स्वात्मानं निर्दिशन्)* एवम् एवम्, प्राग् आत्मनात्मानं परिचेतुम्।

(याज्ञवल्क्यः तत्रैव प्रतिजिगमिषति परन्तु तत्सखिभ्यां विचित्रकलेवरोऽष्टावक्रः तिर्यग्दृष्ट्या दरीदृश्यते। 'अवेला सञ्जाते'ति वदद्भ्यां ताभ्यां याज्ञवल्क्यमाकृष्य नीयते। अष्टावक्रश्च शनैस्ततो निरेति।)

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् १

स्वात्मदर्शकं यन्त्रम्

स्थानम् – देवरातमुनेः सदनस्य प्राङ्गणम्, कमलायाः तटम्
कालः – शीतयामः, अपराह्णान्तरम्

देवरातमुनिः स्वाऽऽश्रमप्राङ्गणे द्वे वंशनिर्मिते गुन्द्रनिर्मितमेकञ्चाहत्य त्रिविधानि बृहदाकाराणि दूरवीक्षणयन्त्राणि त्रिष्वाधारदण्डेषु संस्थाप्य परीक्षमाणोऽस्ति। स कदाचिद् दूरवीक्षणनलीमितस्ततश्चालयति, कदाचिच्च दूरवीक्षणनलीविवरेषु यन्त्राणि योजयति। ततः पुनश्च स प्रायोगिकं निरीक्षणं विधत्ते। तदनु सहर्षं स्वभार्यां सम्बोधयति।

देवरातः आर्ये! आर्ये! एहि एहि इह द्रष्टुम्।
(प्रसन्नवदनः स स्वीयं मस्तकमुन्नीय अङ्गुलीभिः श्मश्रूणि सञ्चालयति। भूयो दूरवीक्षणविलेऽक्षिणी निवेशयति।
'इयमस्मि, इयमस्मि' इति ब्रुवाणा सुरूपा सवेगं समायाति।)

सुरूपा किमिदानीं सम्यग् दृश्यते? अहमपि पश्यानि वा!
(नैकट्यं प्राप्नोति।)

देवरातः *(सतोषं दर्शनार्थं ददानः)* दृश्यतां सम्प्रति, दूरवीक्षणयन्त्रमेतत् त्वच्चर्मचक्षुर्भ्यामपि दशसहस्रगुणितं शक्तिमत् सञ्जातम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सञ्जातं न वा, आर्ये !

सुरूपा आम्, सत्यमेतद् आर्य !

देवरातः *(उदीचीं दिशं पश्यन्)* त्वया दृष्टः किं ध्रुवतारां परिक्रममाणः सप्तर्षिनिकरः ?

सुरूपा *(शङ्कुस्थांनलिकांभ्रामयन्ती)*आम्,दृष्टः।*(गणयन्तीइवसशब्दम्)* एकं द्वे त्रीणि चत्वारि .... ।

देवरातः सप्त ऋक्षाणि खलु सुस्पष्टं दृष्टानि वा ?

सुरूपा न केवलं सुस्पष्टम्, अपितु अक्ष्णोः पुरतोऽतिसामीप्येन भासमानानि अक्षिगोचरीकृतानि ।

(दूरवीक्षणयन्त्रं परित्यजति ।)

देवरातः आर्ये ! आगामिनो माघमासस्य अमावास्यायाः सूर्यग्रहणस्याध्ययनाय यन्त्रस्यास्य उत्कृष्टं प्रयोजनं सेत्स्यतीति मन्ये । कमलानद्याः शिरोभागमारुह्य अस्योपयोगे विहिते खगोलशास्त्रस्य कृते नूतनतथ्यानां समुपलब्धिर्भवेत् । हिमशृङ्गानाञ्च अध्ययनाय एतस्य प्रयोजनं सेत्स्यति । त्वमपि मयैव साकं तत्राऽऽयास्यसि किल ?

सुरूपा जिगमिषामात्रेण किम् ? गृहकार्यभारेण क्षणं श्वसनायापि अवकाशो नाधिगम्यते । स्नुषा यदि गृहेऽभविष्यत्तर्हि अहं स्वयं यन्त्रमिदं शिरसि ऊढ्वागमिष्यम् । किं कुर्याम् ! समग्रोऽपि कार्यभारः स्वमस्तके हि आहितो वर्तते ।

(मुनिर्देवरात इतस्ततो भ्रमति ।)

देवरातः प्रेषय तावत् स्नुषामानेतुम् ।

सुरूपा *(मन्दस्वरेण)* पितृसदने पुराणकथानुष्ठानं समायोजितं वर्तत इति ब्रवीति स्म । कथमिव समागच्छेद् सम्प्रति ! धर्मनिष्ठस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितुर्दुहिता सा। सत्यामपि तस्या आजिगमिषायां तत्पिता एव सपदि न प्रेषयेत्। अतस्तस्याः समाह्वानाय तनयस्य प्रेषणमपि वृथा स्यात्।

देवरातः तथा चेत्तनयां समानेतुं प्रेषयेः।

सुरूपा *(सहसा वहन्ति अश्रूणि प्रोञ्छन्ती रोदनविमिश्रितस्वरेण)* तद्भर्ता रुग्ण आसीदिति आकर्ण्यते स्म। रुग्णं सन्त्यज्य कथमागच्छेत् सा! जामातुरेव रुग्णत्वे मात्रालये समाह्वानञ्च नोचितं खलु। *(सान्ध्यगानस्य मन्दं गुञ्जनं श्रूयते।) (अङ्गुलीनिर्देशेन)* दृश्यताम्, तनयोऽपि सान्ध्यगानं विदधानः समायातः।

(एकेन पाणिना पुस्तकं गृहीत्वापरेण च गा निवर्तयन् सान्ध्यगीतं गायन् याज्ञवल्क्य आयाति।)

देवरातः यदि मदनुसन्धानकर्मणि तनयः साहाय्यमकरिष्यत्तर्हि द्युलोकान्तरिक्षवसुमतीनां नूतनं रहस्यमाविष्कृत्य अपूर्वचमत्काराणां प्राकट्यं सम्पादयितुमशक्ष्यम् परन्तु किं कुर्याम्!, स पृथक् पन्थानमचिनोत्। अहं महाभारतशृङ्गेषु खगोलभूगोलयोर्वेधशालां निर्माय अनुसन्धित्सामि परन्तु स हिमगिरिशृङ्गेषु आत्मज्ञानस्य वेधशालां परिकल्प्य अनुबुभूषुरस्ति।

(गावो गोष्ठं प्रति यान्ति। याज्ञवल्क्यः पुरतः प्राप्नोति। पुस्तकं धनागारसन्निधौ संस्थाप्य पाणिपादं प्रक्षालयितुं जलं व्यवस्थापयति।)

याज्ञवल्क्यः *(पाणिपादं प्रक्षालयन् बृहद् यन्त्रं प्रति सङ्केतयन्)* तात! तद् बृहद् यन्त्रञ्च संयोजितं भवता! प्रयोगे साफल्यमधिगतं किल?

देवरातः *(सगर्वं वदनं फुल्लयन्)* त्वदीयां जननीमेव पृच्छ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरूपा *(तनयं प्रति आभिमुख्येन)* मदपेक्षया तु यन्त्रं प्रति पृच्छैव वरम् ।

(देवरातो हसति । याज्ञवल्क्यो बृहति यन्त्रे अक्षिणी संयोज्य यन्त्रं परिभ्रामयन्नुदीच्यां दिशि स्थिरीकृत्य वीक्षते ।)

याज्ञवल्क्यः *(शङ्कुस्थां नलिकां चालयन्)* अम्ब ! सप्तर्षि–तारामण्डलं कियत् स्पष्टं दृष्टं मया ! ध्रुवतारा तु ततोऽपि नैकट्येन अक्ष्णोः संश्लिष्टेव दृश्यते ।

सुरूपा याज्ञ ! तव पितृवर्यस्य कथनं वर्तते यद् यदि एतत्कर्मणि तव साहाय्यमभविष्यत्तर्हि अयं वैदिकर्क्षु द्युलोकान्तरिक्षवसुमतीनां रहस्यानि प्रायोगिकपरीक्षणपूर्वकं प्रकाशितानि अकरिष्यत् । चक्रयन्त्रस्य ध्रुवसूत्राणाञ्च इतोऽप्यधिकाः प्रयोगा अवशिष्टाः सन्तीति अयं कथयति !

(याज्ञवल्क्यो यन्त्रदर्शनं परित्यज्य मातुः सामीप्यं प्राप्नोति । देवरात इतस्ततो हिण्डमानो वर्तते ।)

याज्ञवल्क्यः अम्ब ! पितुः कार्ये साम्प्रतं यावन्मया न कोऽपि विघ्नो विहितः । यथामति तस्य साहाय्यार्थं समुद्यत एवास्मि । तेन लिख्यमानस्य 'वेधप्रक्रिये'ति ग्रन्थस्य पाण्डुलिपेः पुनर्लिपीकरणेन साहाय्यं विधास्यामीति च वाञ्छास्ति परन्तु............ ।

सुरूपा भाषस्व वत्स ! परन्तु...... किम् ?

याज्ञवल्क्यः अम्ब ! मदीया एकैव महती स्पृहा वर्तते यद् ईदृशं यन्त्रमाविष्करिष्यते, येन आत्मनात्मानं निरीक्ष्य आत्मबोधो भविष्यति । यतो हि–

आत्मबोधः परं कार्यं मोक्षावाप्तिरनेन हि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शोभनतम एवैष पुरुषार्थोऽस्ति मे मतम् ॥

देवरातः *(सहसावरुद्धः सन्)* याज्ञ ! तथाविधस्य यन्त्रस्य निर्माणं महत् कार्यं न भवेत् किल !

(जननीतनयौ साश्चर्यमन्योन्यं वीक्षमाणौ भवतः । तद्दर्शनेन देवरातो हसति ।)

याज्ञवल्क्यः *(औत्सुक्येन)* तात ! तादृशं यन्त्रञ्च निर्मितमस्ति वा ?

देवरातः अवश्यं वत्स !

याज्ञवल्क्यः क्वास्ति तावत्तादृशं यन्त्रम् ?

देवरातः यत्र क्वापि, अत्रैव च अस्ति, तत् त्वं स्वयञ्च वेत्सि ।

सुरूपा *(मनसा विचिन्त्य, पुत्राभिमुख्येन)* स्थालिकाया जलमिति त्वत्पितुराशयः स्यात् ।

याज्ञवल्क्यः एवं वा तात !

देवरातः एवम् ! स्थालिकायां जलं संस्थाप्य पश्य नु । तदेव त्वयापेक्षितयन्त्रसमं भविष्यति ।

याज्ञवल्क्यः *(बोधनाय असमर्थः सन् सखेदम्)* तात ! तत्र तु मत्प्रतिबिम्बमात्रं दृश्यते, मदीयं छायामात्रं दृष्टिपथमारोहति तत्र । तत्राहं स्वयमात्मा कथं दृश्ये ! मयानुसन्धित्सितानि वस्तूनि नहि नासाकर्णाक्षिवदनानि ।

(क्षणं विचिन्त्य संस्मरन्) तानि तु शतशः सम्पूरितानि विवराणि एव, भूपतेर्जनकस्य प्रासादद्वारे मिलितस्य विचित्रकलेवरस्य ज्ञानवतः सत्पुरुषस्य कथनमिव ।

(देवरातो गाम्भीर्यमाकलयति । सुरूपा च एकतानेन पुत्रं पश्यति ।)

देवरातः याज्ञ ! तावन्मया उचितं समाधानं न दत्तं वा ?

(क्षणं विचिन्त्य) आम्, अवगतो मया त्वदीयोऽभिप्रायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरूपा *(भर्तारं वीक्ष्य)* तदेव बोध्यतां स आर्य ! तदनु एव तस्याभीप्सा शमिष्यति ।

देवरातः आर्ये ! आत्मनात्मनो दर्शकं यन्त्रन्तु साम्प्रतं यावन्न कोऽपि निर्मातुक्षमता।याज्ञेनाभिलषितंतद्यन्त्रन्तुभुवमन्तरिक्षंद्युलोकञ्च प्रति आभिमुख्येन न, अपितु आत्माभिमुख्येनैव सेत्स्यति । स्वात्मनात्मनः पूर्णब्रह्मानुभवेनैव तत् सेद्धुं शक्नोति । *(पुत्राभिमुखः सन्)* एवं वा याज्ञ ?

याज्ञवल्क्यः आम्, तात !

सुरूपा *(भर्तारं विलोकयन्ती)* भवादृशस्य कृते तु नहि तद् असामान्यं कार्यम् । विरच्यतां तावत्तादृशं यन्त्रं स्वस्य प्रियपुत्रस्य कृते ।

देवरातः **आर्ये ! तद् विश्वकर्मापि यन्त्रं निर्मातुमक्षमः ?**

कथं मया विरच्येत तव हास्यास्पदं वचः ॥

सुरूपा *(किङ्कथनीयमिति क्षणं विचिन्त्य)* सम्यग् विचारिते सति तादृशयन्त्रनिर्माणाय न तावान् समयोऽपेक्ष्येत, यावान् पुष्पाऽवचयाय इत्यनुमिनोमि ।

देवरातः आर्ये ! सामान्यवस्तुनिर्माणाय तु बहुकालोऽपेक्ष्यते ।

(याज्ञवल्क्यः चिन्तनमग्नोऽस्ति ।)

सुरूपा अनयोः पितापुत्रयोस्तु आलापोऽपि न बुध्यते । यन्त्रस्य सन्दर्भोऽप्ययं तन्त्रमन्त्रविषयादपि विचित्रतरः प्रतीयते ।

याज्ञवल्क्यः अम्ब ! समग्रञ्च जगदिदं विचित्रं वर्तते, मयूर्या अण्डान्तर्वर्ति वारीव। तस्मान्मया स्वात्मनात्मनो दर्शकस्य यन्त्रस्य रचनाप्रसङ्गः समुत्थापितः ।

सुरूपा वत्स ! सम्प्रति स्वाप्निकजगति विचरन्नसि किल ?

याज्ञवल्क्यः नहि नहि अम्ब ! इदानीन्तु अहं जाग्रति खलु संलपन्नस्मि परन्तु स्वप्ने च कदाचिद् आलपन् भवामि । न केवलं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तावत्, अपि तु गाढनिद्रायाश्च, नाहं किञ्चिदवेदिषम्' इति मदीयानुभूतिर्वर्तते । अत-स्तादृशम् 'अहम्' इत्याख्यं स्वात्मानं द्रष्टुं परिचेतुञ्च यन्त्राविष्करणं संभवेन्न वेति प्रसङ्गो यन्त्रस्यैव सन्दर्भे मयोपस्थापितः ।

(सुरूपा हसति ।)

देवरातः आम्रान् पृष्टः कोविदारान् आचष्टे । सुरूपे ! न वेत्सि त्वं विषयमिमम् । स्वकार्यमाचर । सन्ध्याकालः सञ्जायमानोऽस्ति । तस्माद् रसवतीं याहि ।

सुरूपा *(असन्तुष्टा सती)* एवमेवम्, अत्र केवलं पितापुत्रयोः संलापः सम्यक् प्रचलति । न शक्यते मया एताभ्यां सह संलपितुम् ।

(गन्तुकामा) अद्य किं पच्येत ? हट्टापणिकैः सह तण्डुलानां विनिमयेनानीतं मकायपिष्टमपि वर्तते । किं करवाणि ? रोटिकापाको भवतु तण्डुलपाको वा !

देवरातः अद्य रोटिका एव भुञ्ज्याम । हट्टापणिकैः सह आढक्या विनिमयेनानीता तुण्डी अवशिष्टा भवेन्न वा ?

सुरूपा किञ्चित्तु भवेदेव ।

देवरातः किञ्चिज्जलं संस्थाप्य तयैव व्यञ्जनं रचय, रसनास्वादोऽपि परिवर्तेत ।

याज्ञवल्क्यः *(स्यूतात् पर्णासं निष्कास्य)* अम्ब ! क्षेत्रस्य वरणवप्रेभ्योऽवचित्य पर्णासमानीतवान् अस्मि ।

(ददानः) रच्यतामवलेह एतेन ।

सुरूपा *(पर्णासमाददाना)* अस्तु रचयिष्यामि । *(ततो जिगमिषन्ती)*

याज्ञवल्क्यः तात ! पर्णासस्य के गुणाः ?

देवरातः आयुर्वेदे तु एतस्य नैके गुणा वर्णिताः सन्ति–

उष्णवायोर्विनाशेनौदर्यरोगस्य नाशनम् ।
स्मृतिशक्तेः प्रवृद्धिश्च पर्णासस्यैव ते गुणाः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरूपा तावत्तु मदर्थमपि एष लाभकरः स्यात् ।

देवरातः त्वदर्थन्तु औषधमेव सेत्स्यति एषः ।

(सुरूपा निष्क्रामति ।)

याज्ञवल्क्यः तात ! मन्मनसि कापि पिपृच्छिषा वर्तते ।

देवरातः याज्ञ ! किन्तत् ? ब्रूहि । *(पितापुत्रावुभावेव वितर्दीमध्यासाते ।)*

याज्ञवल्क्यः *(पिटिकायुताः कराङ्गुलीः सञ्चालयन्)* कुतः प्रारब्धा हलकर्षणप्रथा ?

देवरातः हिमशैलादधःस्थेभ्यः पर्वतेभ्यः, प्रपातेभ्योऽधित्यकोपत्यकाभ्याञ्चप्रारब्धा । पुरा तु जनाः स्वयं हलाकर्षणेन क्षेत्रं कृषन्ति स्म । पश्चात्ते हलाकर्षणाय वृषाणामुपयोगं चक्रुः । इयमेव प्रथा साम्प्रतं यावत् प्रचलन्ती वर्तते । हलसम्बद्धां जानकीजनिकथां तु अहं त्वां हि श्रावितवान् आसम्, स्मरसि वा इदानीम् ?

याज्ञवल्क्यः स्मरामि तात !

देवरातः परन्तु नेपालोपत्यकायाः समतलभुवो वास्तवेषु एकजातीया आदिवासिनस्तु हलचालनं न कुर्वतीति आकर्ण्यते ।

याज्ञवल्क्यः *(साश्चर्यम्)* किं कुर्वन्ति तावत्ते ?

देवरातः कुद्दालकेन क्षेत्रं कृषन्ति, हलादपि द्रुततया मृल्लोष्टान् निष्कास्य पातयन्तीति निशम्यते ।

याज्ञवल्क्यः तात ! हिमालयस्याङ्केऽवस्थिताया नेपालोपत्यकाया अन्तः सृष्ट्यादौ विशालं सरो ववृते । पश्चात्तस्य स्फोटनेन सलिलस्य बहिर्निःसरणानन्तरमेव समन्ततोऽवस्थिता जनास्तत्र गत्वा निवसनं कृषिकर्म च प्रारेभिरे, जनश्रुतिरिति श्रूयते । एतत् सत्यं वा ?

देवरातः *(कुड्यवपास्थाया मृत्पोटलिकाया मृदं निःसार्य प्रदर्शयन्)*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञ ! एतत् सत्यमेव । मृदियं पशुपतिदर्शनार्थं तत्र सम्प्राप्तैरस्माकं पूर्वजैः तत एव समानीताऽऽसीत् । एतस्या मृदो नाम कालमृदिति कथयन्ति । तत्र दशहस्तपरिमाणेन भूखननेन लोष्टमया मृल्लभ्यत इति कथ्यते ।

याज्ञवल्क्यः *(कालमृदं करेण सञ्चाल्य)* तात ! भिन्नवर्णा मृदियम् । इयन्तु प्राचीनावशेषेव प्रतिभाति ।

(दर्शयन्) दृश्यताम्, एतस्यां संश्लिष्टा मत्स्याकृतिः ।

देवरातः *(मुष्टिं बद्ध्वा मुष्टिमध्यतो दूरवीक्षणयन्त्रत इव निरीक्षमाणः)* आम्, सत्यमेव मत्स्याकृतिः खलु । स्मरामि किमपि एतन्निरीक्ष्य ।

याज्ञवल्क्यः किन्तत् तात !

देवरातः तत्रत्याः कृषकाः कृषिमलरूपेण कालमृदं प्रयुञ्जत इति श्रूयते ।

याज्ञवल्क्यः तात ! तर्हि वयमपि तीर्थाटनाय नेपालोपत्यकामयेमहि ।

देवरातः अस्मदानुकूल्येन अवश्यं सकृत्तत्र अटेम ।

याज्ञवल्क्यः तात ! नेपालोपत्यकया सह अस्मदीयाया मिथिलायाः कीदृक् सम्बन्धः ?

देवरातः वत्स ! प्रगाढः सम्बन्धोऽस्ति । वस्तुतो नेपालोपत्यका भवतु मिथिला वा, सर्वापि भूर्हिमालयस्यैव आधारस्थली । एतां विना हिमालयः क्व स्थिरीभवेत् ?

याज्ञवल्क्यः तात ! नेपालोपत्यकादर्शनाय मदीया महती स्पृहा वर्तते ।

देवरातः मदीया च । आनुकूल्ये सति आगमिन्यां श्रावणपौर्णमास्यां तेनैव मार्गेण यातास्मः । ततो गणेशहिमशैलस्याङ्कं प्राप्य गोसाइँकुण्डप्रदेशे मेलापकञ्च द्रष्टास्मः ।

याज्ञवल्क्यः *(सहर्षम्)* अस्तु तात !

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(सुरूपा दारुकाणि सङ्कलय्य नयनायायाति ।)

सुरूपा किन्नु पितापुत्रयोः संलापः साम्प्रतं यावन्न समाप्तः ? सन्ध्याकालं यावदपि उपसंहृतिमगतः कीदृगयं संलापः ?, ऊर्णनाभस्य सूत्रमिव !

याज्ञवल्क्यः *(उत्थाय)* ऊर्णनाभस्य सूत्रमिव ! तत्तु साकारं वस्तु वर्तते चक्षुरिन्द्रियग्राह्यं करस्पृश्यञ्च । परन्तु एतस्मान्मुखान्निर्गमनशीलं वचनं निराकारमस्ति, चक्षुर्ग्राह्यं करस्पृश्यञ्च नास्ति ।

सुरूपा वत्स ! त्वन्तु यं कमपि विषयं गाम्भीर्येण स्वीकुरुषे, मयानुचितमभिहितं वा ?

याज्ञवल्क्यः *(मात्रभिमुखः सन्)* अम्ब ! भवदीयं वचनं मदर्थं दर्शनस्वरूपं निर्वहति । अत एव तु भवत्याभिहितमेव विषयं चिन्तयन्नस्मि ।

सुरूपा (साश्चर्यम्) किम्वुक्तं तावन्मया ! 'पितापुत्रयोः संलाप ऊर्णनाभसूत्रमिव' इति एतावदेव तु उक्तम् ।

याज्ञवल्क्यः एवम् एवम् । परन्तु भवत्याभिहितस्य कथनस्य भावो मां विचारगाम्भीर्ये निमज्जयति, उच्चावचे चिन्तनायने धावयति । अतोऽहं जिज्ञासुरस्मि यद् ऊर्णनाभजं सूत्रं कस्मात् स्रोतसः समुत्पद्यत इति !

सुरूपा (दारुकाणि सङ्कलयन्ती) ननु तच्छरीरात् ।

(देवरातो हसितुकामो जायां प्रति पश्यति ।)

याज्ञवल्क्यः अम्ब ! शरीरन्तु जडपदार्थः, (अङ्गुलीनिर्देशेन) एष सीमप्रस्थस्थः प्रस्तर इव । अस्यान्त एतच्चालकेन केनचित्तत्त्वेन भाव्यं खलु । एतस्यैव तथ्यस्य अनुभूतिर्मदीयः प्रेप्साविषयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(देवरातः पुनश्च हसितुकामः तनयं पश्यति ।)

सुरूपा वत्स ! यदि तथाविधं तत्त्वं नाभविष्यत्तर्हि वयं निश्चयेन नाभविष्याम । तादृशतत्त्वस्याभावे तु पिपीलकोऽपि चलितुं न प्रभवेत् ।

याज्ञवल्क्यः अम्ब ! एतत् सर्वं तु अहमपि वेद्मि ।

सुरूपा तावल्लघुमपि विषयं किमर्थं नदमिव सुदीर्घीकरोषि ?

याज्ञवल्क्यः ज्ञातमेव विषयमनुभवितुम्, नदस्य जलनिधिप्राप्तिरिव सायुज्यप्राप्तये ।

(एतच्छ्रुत्वा सुरूपा भर्तृवदनं पश्यति ।)

देवरातः आर्ये ! पुत्रस्य वक्रवचसः तात्पर्यमस्ति 'चेतनः' । बुद्धं त्वया ?

सुरूपा *(स्वकीयं हृत्तलं स्पृशन्ती)* चेतनः ?

देवरातः एवं चेतनः । सञ्चालकतत्त्वमेतत् *(क्षितिजं प्रति दर्शयन्)* गगनादपि महत्तरं वर्तते ।

(पुष्कराह्वपतत्रीणां कदम्बकमेकं वंशारण्यांन्यां निवस्तुं समायाति । पतत्रीणां तेषां कूजनध्वनिः श्रूयते ।)

सुरूपा *(अस्ताचलं प्रति वीक्ष्यमाणा)* अहो ! गाढसन्ध्या सञ्जाता । अद्यत्वे कीदृशो लघीयान् दिवसः !

देवरातः *(शनैरुपगम्य)* अद्यत्वे सूर्यो दक्षिणायनङ्गतः । दिवसस्तु लघीयान् भवत्येव । सुरूपे ! दीपप्रज्वालनसमयोऽयम् ।

सुरूपा अस्तु, आनयामि दीपम् ।

(दारुकाणि कक्षे निधाय हस्ताभ्याञ्च भाण्डानि गृहीत्वा गृहान्तः प्रविशति ।)

याज्ञवल्क्यः **स्वदेहद्रवसूत्रेणोर्णनाभो जालकं वयेत् ।**
परागैः कुसुमानां सा सरघा मधु कल्पयेत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामान्यतः समत्वं हि वीक्षते तत्र कार्ययोः ।
पार्थक्यं वर्तते किं वा सरघातन्तुवाययोः ?

देवरातः आन्तरं दैहिकं सूत्रं तन्तुवायेन युज्यते ।
बाह्यं वस्तु प्रयुङ्क्तेऽसौ सरघा मधुसर्जने ॥
उपादानं स्वयं लूता निमित्तं सरघा पुनः ।
एतदेव तु पार्थक्यं सरघातन्तुवाययोः ॥

याज्ञवल्क्यः तात ! तर्हि ऊर्णनाभमधुमक्षिकयोः स्वाभाविकेषु गुणेषु च को भेदः ?

देवरातः ऊर्णनाभः तमोऽन्विषति, विषसंग्रहकर्मणि मोदते च । स स्वार्थभावस्य निर्दयतायाश्च द्योतकोऽस्ति । स स्वकलायां परप्रपातनं लक्ष्यीकुर्वाणोऽपि स्वयञ्च तत्रैव प्रबद्धः सन्नवतिष्ठते । एवञ्च ज्योतिषोऽन्वेषिका सरघा कुसुमरसामृतस्य सङ्कलनाय समयं यापयति । तत्कलायान्तु समग्रमपि विश्वं सम्मोदते ।

याज्ञवल्क्यः *(सतोषं निःश्वसन्)* तात ! ....
(किमपि न वदति ।)

देवरातः *(पुत्रवदनं निरीक्षमाणः)* वत्स ! किं विवक्षसि त्वम् ?

याज्ञवल्क्यः तात ! सरघाया जीवनं जैवनिकमोक्षस्य उपमेव प्रतिभाति ।

देवरातः *(विहस्य)* तर्हि ऊर्णनाभस्य ?

याज्ञवल्क्यः *(क्षणं विचारयन्)* सरघाया विपरीतम् ।

देवरातः *(पुत्रपृष्ठेकरतलंसंस्थाप्यप्रशंसन्)* वत्स! त्वदीयाकुशाग्रबुद्धिः सगरमाथाहिमगिरेः शृङ्गमिव विवर्धमानानूभूयते ।

(देवरात इतस्ततश्चलति । याज्ञवल्क्यो भित्तिमुपसृत्य सुधाखण्डेन एकत्र जालान्तवर्तिनमूर्णनाभम्, अपरत्र च माक्षिकस्थानविवराद् बर्हिर्निःसरन्तीं मधुमक्षिकां चित्रयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्क्षणं सुरूपा दीपपुटकम् आनयति । तज्ज्योतिषा चित्रे सुस्पष्टं प्रकाशेते ।)

सुरूपा *(अस्पष्टस्वरेण)* दीपप्रकाशे तमः पलायेत वा ! अत्रैव तु न लुप्यति द्रष्टुमशक्यं सत् ?

देवरातः आर्ये ! किं ब्रवीषि ? दीपपुटकं तत्रैव देहल्यां स्थापय ।

(सुरूपा देहल्यां दीपपुटकं स्थापयति । तेन गृहस्य अन्तर्बहिश्च प्रकाश्येते । पितापुत्रौ दीपं प्रणमन्तौ प्रार्थयेते । याज्ञवल्क्यो देहलीस्थं दीपं विलोकयन् विचारनिमग्नो भवति ।)

याज्ञवल्क्यः *(कोणभागं गच्छन्, आगच्छन्)* अन्तर्बहिश्च !

(उपदीपं प्राप्य अन्तर्बहिर्विलोकयन्) एवम्, अन्तः पुनर्बहिरपि एकस्यैव दीपस्य ज्योतिर्देहलीव्याजेन उभयत्र विभक्तम् । वस्तुतो ज्योतिस्तु एकमेव ।

सुरूपा याज्ञ ! अद्यत्वे कया रुजाक्रान्तोऽसि ? यत्किञ्चनापि कथनमहर्निशं चिन्तयसि ! किं लक्षणमेतत् ? ह्यः त्वत्सखा डमरुवल्लभोऽपि ब्रूते स्म यद् 'याज्ञवल्क्यः किमर्थमेवं परिवर्तमानोऽस्ति' इति । क्षेत्रखननं समाप्तञ्चेत् श्वः परश्वो वा स्वभार्यामानेतुं याहि । अत्र गेहकर्म च भूरि अवशिष्टं वर्तते । आगामिनं सूर्यग्रहणं निरीक्षितुं त्वदीयः पिता महाभारतस्य प्रत्यन्तपर्वतं प्रति यास्यतीति अभिधत्ते स्म । यदि स्नुषा समायास्यत्तर्हि अहमपि त्वत्पित्रा सहैवागमिष्यम् ।

देवरातः *(पुत्रसन्निधावेत्य)* याज्ञ ! अस्तु, याहि जिगमिषा चेत् । स्नुषाया मात्रालये पौराणिकः कथायागः प्रचलन्नस्ति । द्वित्राणि दिनानि तत्रैवावस्थाय कथां श्रुत्वा प्रत्यागमनमपि उचितमेव ।

याज्ञवल्क्यः तात ! न स्वसदनाद् मन्मनोरथः पूर्यते, न च श्वशुरालयात् । आज्ञावाप्यते चेत्तु भ्रमणार्थं व्रजेयं हिमगिरेरधःस्थलेषु आश्रमेषु, `गुरुकुलेषु च । निवत्स्यामि तत्रैव कानिचिद्वर्षाणि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यावत्। पश्चात्तत एव निवर्तितास्मि स्वसदनम्।

सुरूपा वत्स ! पितृभ्यां जायायाश्च सहसा वियुज्य प्रवासनस्य वार्तां मा कुरु। स्वकीयेऽस्मिन् जनिसद्मन्येव आश्रमं गुरुकुलञ्च भावय। वस्तुतोऽत्रत्येन कुटीरेण वनाश्रमस्य को भेदः ? तत्रापि तु भोक्तव्यम्, वस्तव्यम्, स्वप्तव्यञ्च। गुरुकुले निवसनेन, आश्रमेषु अटनमात्रेण च न कोऽपि ज्ञानवान् भवेत्। त्वादृशा प्रतिभावता तु स्वचरणाभ्यामेव उत्थातव्यम्।

(वायुर्वहति। वायुना च दीपस्य निर्वपनं सञ्जायमानमिव दृश्यते। मेघो गर्जति। मन्दवर्षा प्रारब्धा भवति। तदानीमेव द्वयोः सन्देशवहयोः प्रविष्टिर्जायते।)

देवरातः क्वास्ति भवदीयं निवाससदनम् ?

एकः सन्देशवहः पारेकमलम्।

(सुरूपा उपवेशनाय वितर्द्यां कटं प्रसारयति।)

सुरूपा आस्यतामिदमासनम्।

सन्देशवहौ अस्तु, उपविश्यते।

(उभावेव उपविशतः। याज्ञवल्क्यः स्वच्छन्दतया उपवृक्षं स्थित्वा विचारमग्नो भवति।)

देवरातः भवन्तौ कुत्र गमनाय प्रस्थितवन्तौ ?

प्रथमः सन्देशवहः अत्रैव भवद्गृहपर्यन्तम्।

सुरूपा *(भर्त्रा सह)* अस्मत्तनयाया ग्रामादागतौ वा एतौ ?

द्वितीयः सन्देशवहः *(स्पष्टस्वरेण) आम्, भवत्तनयागेहादेव तु।*

देवरातः किं प्रयोजनं स्यादत्र भवतोः समागमनस्य ?

प्रथमः सन्देशवहः (मन्दस्वरेण) कृपया धैर्येण श्रूयताम्। इह आवां शोकवार्तां श्रावयितुमागतौ। चतुर्थोऽयं दिवसो यद् भवतो जामाता तेनैव पुरातनेन व्याधिना दिवङ्गतः। आवयोरत्र प्रस्थानकालं यावदपि भवद्दुहित्रा अन्नं न स्वीकृतमपितु क्रन्दनमात्रेण

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालोऽतिवाहितः। अतो मात्रालयपक्षतोऽपि जना आह्वनीया इति सर्वेषां विचारैक्येन आवामत्र प्रेषितौ।

(शोकवार्तया सर्वे शोकाकुला भवन्ति।)

सुरूपा (वाष्पाणि विमुञ्चन्ती तारस्वरेण) एतावत् क्षिप्रं मत्तनया विधवा सञ्जाता ! किं दुष्कृतं कृतं तया, येन ईदृग् दण्डः प्राप्तः ?

('हरे शिव !' इत्युच्चारयन्ती तत्रैव भूमौ निपतति। देवरातः तस्या उत्थापनाय चेष्टते। याज्ञवल्क्योऽम्ब अम्बेति ब्रुवाण जननीमुपायाति। वायुवेगो न्यूनीभवति।)

देवरातः (शोकाकुलः सन्) नारायण ! नारायण ! अहो कष्टमभिहितं भवद्भ्याम् ! इत्थं किं श्रुतमद्य ! किमपराद्धमस्मदीयया दुहित्रा ईदृशेऽल्पवयसि वैधव्यावाप्तये ?

याज्ञवल्क्यः तात ! अहमम्बया सह श्व एव स्वसृसदनं यातास्मि।

देवरातः (अश्रुप्लावितनयनः) बाढम्, याहि वत्स, भगिनीं सम्यक् सान्त्वय। तत्र बोधय च तां यत्—

शरीरं म्रियते नात्मा सोऽस्ति नित्योऽजरोऽमरः।
म्लानता कुसुमस्यैव सौरभस्य न कर्हिचित्॥

याज्ञवल्क्यः तात ! कथञ्चिद् एतद्बोधनेनापि भगिन्या अश्रुधारा नावरुध्यते चेत् ?

देवरातः समापिते दशगात्रकर्मणि अत्रैव मात्रालयमानय।

याज्ञवल्क्यः यदि इहागमनमपि नोररीकरिष्यति चेत् किं कुर्याम् ?

देवरातः प्रारब्धवशाद् यत्तया भोक्तव्यं तदेव भुञ्जीत।

(भूमिनिपतिताया भार्यायाः समुत्थापनाय प्रयतमानः) आर्ये ! अयि आर्ये ! *(पुत्रवदनं पश्यन्)* याज्ञ ! त्वदम्बा तु मूर्च्छनापन्नास्ति। सपदि सलिलमानय।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(याज्ञवल्क्यः तदानेतुं धावति । सन्देशवहावपि सुरूपां समुपायातः । क्षणानन्तरं याज्ञवल्क्यः सलिलमानयति ।)

देवरातः *(भार्यामस्तके सलिलार्द्रपटं प्रसारयन्)* आर्ये ! अयि आर्ये !

याज्ञवल्क्यः *(अश्रूणि विमुञ्चन्)* अम्ब ! अयि अम्ब !

प्रथमः सन्देशवहः *(सुरूपायाव्युत्थानमवीक्ष्य)* जामातरिसमाक्रान्तः पिशाचोऽत्र श्वश्र्वां च समारूढो वा !

द्वितीयः सन्देशवहः न जाने किमिति । स पिशाच आवाभ्यां सहैव इहागतो वा !

देवरातः महाशयौ ! मा विधीयतामनपेक्षितस्तर्कः । शोकसन्देशः कदाचिन्मनुजम् एवमेव व्यामोहयति ।

याज्ञवल्क्यः *(क्रन्दनमिश्रितस्वरेण)* तात ! अम्बां गेहान्त एव नीत्वा विश्रान्तिं व्यवस्थापय । अत्र तु शैत्यं बाधते ।

(सुरूपा सचेष्टा भवति ।)

सुरूपा *(पुत्रवदनं विलोकयन्ती)* वत्स ! श्वस्तनदिने हि त्वं भगिन्या सह मेलितुं पारेकमलं याहि ।

(नयनवाष्पाणिनिपात्य) हा कष्टम् ! सहसा वैधव्यमधिगतवती मदीया तनया ।

याज्ञवल्क्यः अम्ब ! मा शुच्याद् भवती । श्वः प्रातःकाले हि व्युत्थाय सपदि यातास्मि ।

देवरातः आर्ये ! शनैः समुत्तिष्ठ । सद्मान्तो व्रजेम सम्प्रति ।

(अविरतं भर्तृवदनं वीक्षमाणा सुरूपा समुत्तिष्ठति । पितापुत्रौ तामुभयतः प्रगृह्णन्तौ गेहं प्रवेशयतः । सन्देशवहावन्योन्यं विलोक्य स्तब्धावतिष्ठेते ।)

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् २

विद्यावमनम्

स्थानम् – कमलानद्याः तटम्, चिसापानीति ग्रामस्य समीपे
कालः – अपराह्णः

कमलानद्याः तटे विशालप्रस्थस्य नीचैरेकः चतुष्कोणाकृतिः पाषाणोऽस्ति । याज्ञवल्क्यो नद्यां पाणिपादं प्रक्षाल्य तत्र पद्मासनस्थो भवति ।

याज्ञवल्क्यः *(अक्षिणी निमील्य लयोच्चारणेन)* —

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावाशिष्यते ॥
परब्रह्म सदा पूर्णं तत्कार्यञ्च न तत्पृथक् ।
कार्यब्रह्मेति कार्यं यत् कारणात्पूर्णमेव तत् ॥
अपूर्णाद् नोद्भवेत् पूर्णः पूर्णात् पूर्णः प्रजायते ।
प्रलये लीयते कार्यं पूर्णं ब्रह्मावशिष्यते ॥
ॐ शान्तिः ! शान्तिः ! शान्तिः !

(अक्षिण्युन्मील्य भास्करं प्रणिपत्य तालपत्रेषु लेखनं प्रारभते । पुरोवर्तिन्यां वाप्यां जलतरणरतं चक्राङ्गयुग्मं दृश्यते । याज्ञवल्क्यो मूर्धानमुन्नीय तद्वीक्षते ।)

सुवर्णभुवो मानससरोवरस्य चक्राङ्गचयः कर्णाल्यां भेरी-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राप्ती-गण्डकी-वाग्वतीषु च पर्यटन् साम्प्रतं कमलां प्राप्तवान् वर्तते परन्तु चक्राङ्गसमुदयोऽयं यावदपि अधःस्थलं प्राप्नुयात्, पश्चात्तु मानसमेव निवर्तिष्यन्ते ।

(तावदेव नातिदूरस्थस्य विशालस्य पाषाणस्य पृष्ठतो विलुप्यमाना पाषाणस्कन्धाद्विलोकयन्ती कात्यायनी घटं भूमौ संस्थाप्य शिलाखण्डेन वाप्यां तरन्तौ चक्राङ्गौ प्रहरति । तौ च युगपद् उड्डयेते । शिलाखण्डपातेन जले तरङ्गः समुद्भवति । याज्ञवल्क्यदृष्टिर्वाप्याः शिलाप्रहारस्थलं यावत् प्राप्नोति । कात्यायनी दृष्टिपथादपसरति । याज्ञवल्क्यस्य चक्षुषी तत्रत्यं घटं विषयीकुरुतः । स ऐकाग्र्येण तत्र पश्यति । कात्यायनी मस्तकं समुन्नीय याज्ञवल्क्यं सकृद्विलोक्य लज्जया स्वात्मानं निगूहते ।)

(सहसा सलयोच्चारणम्)

गोपनीयं किमेवास्ति किमर्थं लुप्यते ततः ?
चक्राङ्गौ डयितावाशु शिलया न मृतौ पुनः ॥

कात्यायनी *(देहपृष्ठं दर्शयन्ती उत्तरं ददाना)*
गोपनीयस्तु स्वात्मैवावर्तत गोपितो मया ।
व्युत्थातव्यो भवानासीद् व्युत्थितोऽस्ति भवान् यथा ॥

याज्ञवल्क्यः **गोपनाद् गोप्यते स्वात्मा किं वा शरीरमेव च ।**
व्युत्थितस्य समुत्थानं वृथा तत्कार्यमेव च ॥

कात्यायनी *(सुस्पष्टं स्वात्मानं प्रकटय्य तिर्यग्दृष्ट्या विलोकयन्ती)* समुत्थानायासश्च वृथा ?

(हसन्ती) व्युत्थितस्य जनस्यैव तु अक्षिणी इयन्ति दिनानि यावत् निमीलिते स्तः ।

(घटं जलेन पूरयति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः *(तामेव विलोकयन्)* निमीलितयोरपि अक्ष्णोर्नाहं सुप्तोऽस्मि, व्युत्थित एव।

(आह्वानपदानि श्रूयन्ते ।) कात्यायनि ! अयि कात्यायनि !

कात्यायनी *(सकटाक्षं घटं वहन्ती)* पिताह्वयन् भवेत्। आमलकीपादपे च जलं सेचनीयं वर्तते।

(कात्यायनी प्रस्थातुं चेष्टते। याज्ञवल्क्यः किङ्कर्तव्योपायशून्यतां भजते।)

याज्ञवल्क्यः *(उत्थाय पदद्वयमग्रेसरन्)* पितुर्नामधेयं प्रोच्य प्रस्थाने कापि हानिर्वा ?

कात्यायनी (याज्ञवल्क्यं प्रति वीक्षमाणा) कीदृशो योगः, कीदृशञ्च तपोऽ-नुष्ठितं भवता ? सन्निधावेव विद्यते मद्ग्रामः । तत्तु तत्रागत्य मत्पितुः सकाशाज्जिज्ञासासमाधानमवेव वरम्।

याज्ञवल्क्यः *(चित्रार्पितारम्भ इवावस्थितः सन्)* अस्तु तावत्, नाम्नापरिचितञ्च तमहं सम्यक् परिचिनोमि।

(मुनिशिष्यौ गुप्तनिरीक्षणं कुर्वाणौ तत्रैव प्राप्नुतः । तत्र तौ याज्ञवल्क्यं ग्रामीणां युवतीं कात्यायनीञ्च निरीक्षेते। एकः तत्रैव स्थित्वापरः ततो याति । क्षणानन्तरं गृहीतकरदण्डो वैशम्पायनः पूर्वं ततो गतेन शिष्येण सहायाति । शिष्यौ सुचरकप्रियदत्तौ तौ नातिदूरेऽवस्थितां युवतीं कात्यायनीं दर्शयतः । वैशम्पायनो भूमौ दण्डेन प्रहरन् किमपि अस्पष्टं बडबडायते। कात्यायनी अन्याँश्च तान् तत्र दृष्ट्वा सपदि ततो याति।)

सुचरकः *(गुरुमुपगम्य व्यङ्ग्यभावेन)* गुरुवर्य ! भवदीयेन कुशाग्रबुद्धिना प्रियतमेन विनयिना शिष्येण नभोजवनिकायां चित्रितं स्वप्रेयस्याः चित्रन्तु साक्षाद् दृष्टमेव भवता !

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रियदत्तः *(गुरोर्विकृतां मुखाकृतिं विलोकयन् व्यङ्ग्यभावेन)* गुरुवर्य ! भवता भुज्यमानेन कष्टावहेन ब्रह्मशापेन सह ग्रामीणतरुण्याः प्रेम्णाभिभूतस्य याज्ञवल्क्यस्य किं प्रयोजनम् ? परन्तु भवाँस्तु नित्यं तस्यैव श्लाघासेतुं बध्नाति । भवद्दृष्टौ तु याज्ञवल्क्य एव आज्ञापालको मतिमान् सदाचारी च। *(हसन्)* ननु सम्प्रति तद्रहस्यञ्च समुद्घाटितम् ।

वैशम्पायनः *(दण्डेन भुवं प्रहरन् याज्ञवल्क्यमुपसृत्य)* याज्ञवल्क्य ! किमर्थं त्वं स्थाणुरिव समुत्थितोऽसि ?

(व्यङ्ग्यभावेन) किं वा समाधिमास्थितोऽसि ?

(याज्ञवल्क्यः शिरोऽवनमय्य गुरुमुपसृत्य साष्टाङ्गं प्रणमति ।)

सुचरकः *(व्यङ्ग्यभावेन दूरं सङ्केत्य)* विलोक्यतां तत्र, पयोघटमूढ्वा चलन्त्या युवत्याः प्रीत्यासौ समाधाववस्थितो भवेत् ।

प्रियदत्तः (व्यङ्ग्यभावेन) गुरुवर्यस्य कर्तव्यपरायणः शिष्य एव एवंविधः समाधिस्थो भवितुमर्हति न तु अस्मादृशः कश्चित् ।

(उभावेव हसतः ।)

याज्ञवल्क्यः *(स्वात्मानं सान्त्वयितुकामः, सखायौ विलोकयन्)* किमर्थं युवां मां व्यङ्ग्यबाणेन प्रहरथः ? गुरुवर्यस्य शापविमोकाय तु अहं स्वकीयान् प्रियान् प्राणाँश्च नहि परिगणयामि ।

(गुरुं प्रति वीक्ष्य) गुरुवर्य ! नाहं निष्कृतिशून्यं ज्ञानमधीये–

यजुर्मन्त्राः तदर्थाश्च यद्यदधीतवानहम् ।
भवच्छुश्रूषयात्मानमृणान्मुञ्चामि निश्चितम् ॥

(वैशम्पायनः शिरःकम्पनपुरःसरमस्पष्टं प्रलपन् वक्रदृष्ट्या याज्ञवल्क्यं सकोपं वीक्षते ।)

सुचरकः *(सोपहासम्)* याज्ञवल्क्य ! वचनेन तु सुष्ठु आचरसि परन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विडम्बनमिदं यद् गुरुवर्यस्य शापविमोकाय इयन्ति दिनानि यावत् काठिन्येन व्रतमनुतिष्ठत्स्वपि शिष्येष्वस्मासु त्वन्तु यागधूमभीत्या दूरस्थानमागत्य स्वार्थसिद्धये निरतोऽसि।

(हसति, प्रियदत्तश्च)

याज्ञवल्क्यः *(सरोमहर्षम्)* सुचरक ! युष्माभिर्दिवसशतेन सम्पाद्यं प्रायश्चित्तयज्ञमेकस्मिन्नेव दिवसे स्वपुरुषार्थविहितेन तपसाहं विजेतुं प्रभवामि। किमर्थमेवं गर्वं प्रकटयसि त्वम् ?

सुचरकः *(गुरुमुखं विलोक्य)* गुरुवर्य ! याज्ञवल्क्येन विहितमेतदवमानमस्मत्कृतेऽसह्यं वर्तते तथैव अग्निहोत्रमनुष्ठितवताञ्च सर्वेषां कृते।

याज्ञवल्क्यः *(सगर्जनम्)* नह्येतद् अवमानम्, अपितु दृढनिश्चयः। श्वस्तनादेव दिवसाद् अहं गुरोः शापाद्विमुक्तये कठोरां तपश्चर्यां प्रारप्स्ये।

प्रियदत्तः *(गुरुं प्रति)* गुरुवर्य ! यदि भवान् स्वप्रियशिष्यस्य एतस्य व्यर्थभाषणे विश्वसिति चेद् वयं प्रारब्धमपि यज्ञं मध्ये विरहय्य अद्यैव भवदीयमाश्रमञ्च त्यक्ष्यामः।

वैशम्पायनः *(दण्डेन भूमौ प्रहरन् दन्तान् विघट्टय्य याज्ञवल्क्यमुपसरन्)* याज्ञवल्क्य ! नाहं विश्वसिमि त्वदीये वैयर्थ्यापन्ने प्रलापे। त्वदभिमानमस्माकमवमानं प्रत्यपद्यत। त्वदीय आत्मस्वार्थश्च मया सम्यग् अवबुद्धः। अग्निहोत्रमनुष्ठातॄन् अवज्ञाय स्वात्मानं श्रेष्ठं मन्यमानस्य त्वादृशः शिष्यस्य च नास्तीह काचिदपेक्षा।

याज्ञवल्क्यः *(नतेन शिरसा)* गुरुवर्य ! स्वात्मशक्तौ विश्वसनं प्रारब्धं मया। सकृद् अवसरः प्रदीयतां सहसापन्नस्य भवतो ब्रह्महत्यादोषस्य निवारणाय।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(सुचरकप्रियदत्ताावितस्ततश्चलन्तौ याज्ञवल्क्यं घृणाभावेन पौनःपुन्येन पश्यतः ।)

वैशम्पायनः *(ततोऽपि क्रुद्धः सन् गर्जन् विकृतमपि वदनं विकृततरं विधाय)* याज्ञवल्क्य ! विरम वाचालताम् । अहमिदानीं न कथञ्चन विश्वसिमि त्वयि । ह्यस्तनदिवसं यावन्मया प्रियतमं शिष्यं मत्वा तुभ्यं यद्यद् वैदिकं ज्ञानं प्रदत्तं प्रतियच्छ तत्सर्वं मह्ययम् ।

सुचरक–प्रियदत्तौ *(सहर्षम्)* बाढमाज्ञप्तं भवता ।

याज्ञवल्क्यः *(गुरुचरणयोर्निपत्य)* गुरुवर्य ! ....

वैशम्पायनः *(ईषत् पृष्ठभागेऽपसरन् याज्ञवल्क्यकथनमवरोध्य)* याज्ञवल्क्य ! मया यदभिहितं तदभिहितम् । तव प्रणिपातेन मयि नहि कञ्चन प्रभावं समुत्पादयति । यद् आज्ञप्तं तत् कुरु । मयाध्यापितां विद्यां निवर्तय सम्प्रति ।

सुचरकः *(उत्प्लवितुकामः)* विगुणाय प्रदत्ता विद्या निवर्तनीयैव ।

प्रियदत्तः *(तारस्वरेण)* यजुर्वेदस्य मन्त्रान् मत्तः सम्यग् न कोऽपि वेत्तीति गर्ववतो दशा ईदृश्येव विधेया ।

याज्ञवल्क्यः *(साश्चर्यं गुरुं वीक्षमाणः)* गुरुवर्य ! मया भवत्सकाशादधिगत्य आत्मसात्कृता विद्या कथं निवर्तेया ?

वैशम्पायनः शुनेव वमनेन वापि निवर्तनीया खलु । मयेदानीं यावत् प्रदत्ता विद्या त्वदीये मस्तिष्के वक्षसि जठरे वा संश्लिष्टा भवेत् । अतो मुखमुद्घाट्य निःसारय सर्वाम् । नार्हसि तथैव स्वायत्तीकर्तुं मद्दत्तां विद्याम् ।

याज्ञवल्क्यः *(मस्तकमुन्नीय)* गुरुवर्य ! अहं श्वा एव किल भवन्मते ?

वैशम्पायनः आम्, मत्कृते तु त्वं श्वसमः खलु । साम्प्रतं यावन्मया त्वयि यावान् विश्वासो विहितः, यद्यच्च शिक्षणं कृतम्, सकलं तद्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यर्थं सञ्जातम् । त्वं सातिशयो विश्वासघातकोऽहंमानी च वर्तस इत्यपि अद्यैवावबोधि मया । न कथञ्चन सोढुं शक्यत इतःपरं त्वदीयं सकलमपि व्यवहारम् ।

(सगर्जनं भूमौ दण्डप्रहरणेन) आननेऽङ्गुलीः प्रवेश्य वापि सपदि वम मच्छिक्षितां विद्याम् ।

याज्ञवल्क्यः *(धैर्येण विचिन्त्य)* गुरुवर्य ! एतावता वमनेन निर्गता विद्या तु प्रयोजनशून्या न भवेत् किल ?

वैशम्पायनः दूरदर्शीव मा ब्रूयाः त्वं याज्ञवल्क्य ! त्वया वमितां विद्यां विपिनस्थाः तित्तिरयो भक्षयेयुः, निष्प्रयोजनं नैवापगच्छेत् ।

(सुचरकप्रियदत्तौ कर्णाकर्णिकया संलपतः ।)

याज्ञवल्क्यः एतेन तु भूयश्च अपरो ब्रह्महत्यादोषो न भवेत् किल ?

वैशम्पायनः सकृत्तु दोषापन्नोऽभवमेव । आपतेद् आपतति चेद् अपरश्च दोषः, भीतिर्नास्ति ।

सुचरकः *(गुरुमुपेत्य याज्ञवल्क्यं सङ्केतयन्)* एतस्य कथनानुरूपमेव गुरुः पुनरपरं दोषं प्राप्नुयाद् वा ?

(याज्ञवल्क्यं सघृणं पश्यति ।)

प्रियदत्तः न, नैवावाप्स्यति । प्राप्तं दोषञ्च यज्ञसाधनया अवश्यं निवारयितास्मः ।

सुचरकः *(याज्ञवल्क्यं निर्दिश्य)* गुरुवर्यस्य पूर्वदोषोऽपि एतमेव विषयीकरोति । यतो हि, एष स्ववर्गं तिरस्करोति । सत्यामपि मातापितृभ्यामुद्वाहितायां भार्यायामधिकतरस्वार्थपूरणाय लोलुपोऽयं पुनर्नवयुवत्या समं प्रेमप्रसङ्गं परिकल्प्य तां कनिष्ठभार्यां भावयितुं चेष्टते ।

याज्ञवल्क्यः *(सकोपम्)* सुचरक ! नैवार्हसि त्वं मदीये गार्हविषयेऽपि वक्तुम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैशम्पायनः *(कुपितः सन् याज्ञवल्क्यं वीक्ष्य)* याज्ञवल्क्य ! परित्यज दीर्घालापम् । सपदि वम मच्छिक्षितां विद्याम् ।

याज्ञवल्क्यः *(शिथिलस्वरेण)* जयतु गुरुवर्यः । जयन्तु सहपाठिनो भ्रातरः ।

(वक्त्रान्तोऽङ्गुलीः प्रवेश्य वमनायासमालम्बते परन्तु वमनं न भवति ।)

वैशम्पायनः इतोऽप्यतिशयं प्रयतस्व ।

(याज्ञवल्क्यो वमनाय यथाशक्ति प्रयतते । 'वा...क्, वा...क्' इति ध्वनिर्दूरं यावदाकर्ण्यते । कात्यायनी पुनश्च जलभरणाय तत्रायाति । सा सहसा गतिमवरोध्य तत्र पश्यति । याज्ञवल्क्यो वमनाय प्रयत्नं चर्करीति । तन्मुखात् केवलं सृणिका निर्जङ्गमीति ।)

याज्ञवल्क्यः गुरुवर्य ! साम्प्रतन्तु मत्पार्श्वे न किमप्यवशिष्टं वर्तते ।

वैशम्पायनः *(विकृतवदनेनाक्षिणी स्थूलीकृत्य)* किम्वुक्तं त्वया ? न किमप्यवशिष्टम् ! वम भूयः ।

(याज्ञवल्क्यः पुनश्च उच्चैः ,वा...क्, वा...क्' इति कुर्वन् वमनाय प्रयतते । वैशम्पायनः तत्रत्यं शिष्यद्वयं किमपि सङ्केतयति । ततस्तौ याज्ञवल्क्यस्य पृष्ठे मुष्टिप्रहरणं प्रारभेते । याज्ञवल्क्यो भूमौ निपततीव प्रतिभाति । वैशम्पायनोऽपि दण्डेन तत्पृष्ठं प्रहरति । तत्सर्वं वीक्षमाणा कात्यायनी स्वगेहाभिमुख्येन 'पितः पितः' इति ब्रूवाणा पितरमाकारयति । सा पुनश्च साहाय्यार्थं तारस्वरेण 'त्राहि त्राही'ति प्रार्थयते । वैशम्पायनो तदन्तेवासिनौ च कात्यायनीं वीक्ष्य सपदि पलायन्ते । याज्ञवल्क्यो निश्चेष्टं भूमौ निपतति । कात्यायनी धावन्ती आगच्छति । तस्या वृद्धपिता च दूराद् धावन् तत्र प्राप्नोति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कात्यायनी *(याज्ञवल्क्यमुत्थापयितुं यतमाना)* मानवमेव ताडयन्तः कीदृशा मानवा एते ? अपराधिनः ।

वृद्धपिता नारायण ! नारायण ! किं सञ्जातम् ?

कात्यायनी पितः ! त्रिभिर्जनैरेतत्पृष्ठे भृशं ताडितमिति साक्षान्मया दृष्टम् । मयि दृष्टे हि तेऽपलायन्त ।

वृद्धपिता वत्से ! किङ्कारणं स्यात्ताडनस्य ?

(याज्ञवल्क्यस्य पृष्ठकञ्चुकमपसार्य) अहो ! बृहन्नीलाङ्को वर्तते । नारायण ! नारायण !)

कात्यायनी *(अश्रुपूरितनयनाभ्यामश्रूणि मुञ्चन्ती)* पितः ! तिक्तपत्रीमन्विष्य आनयानि ?

(निष्क्रामति ।)

वृद्धपिता *(तालपत्राणि पश्यन्)* एतादृशं ज्ञानवन्तं जनमपि एवं निर्ममं ताडितवन्तः कीदृशा अपराधिनस्ते !

(कात्यायनी धावन्ती तिक्तपत्रीमानयति । सा तन्निष्पीडनान्निःसृतं रसं याज्ञवल्क्यपृष्ठे लिम्पति । क्षणानन्तरं याज्ञवल्क्यः सचेष्टः सन् चक्षुषी उन्मीलयति । कात्यायनी स्वपितुः पृष्ठतोऽपसरति ।)

याज्ञवल्क्यः *(करेण चक्षुषी सम्पीडयन्)* कुत्र प्रस्थितो गुरुवर्यः ? अपर्याप्ता गुरुदक्षिणा चेद् भूयश्च दातुं सन्नद्धोऽस्मि ।

(तत्र स नूतनां मुखाकृतिं दृष्ट्वा आश्चर्यान्वितो भवति ।)

वृद्धः बन्धो ! किमभूत् ?

याज्ञवल्क्यः *(शनैः शरीरस्य शिरोभागमुत्थापयन्)* अत्र भवान् कः ? अहन्तु परिचेतुमपि नाशक्नवम् ।

वृद्धः ननु अत्रत्य एव ग्रामीणवृद्धोऽहम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(दुहितरं दर्शयन्) मदीया दुहितेयं कात्यायनी ।

(कात्यायनी लज्जया प्रावारेण वदनमाच्छादयति । याज्ञवल्क्यो जृम्भमाण उत्थातुं प्रयतते ।) **वृद्धः** बन्धो ! नोत्थीयताम् । विश्राम्यतां क्षणं सम्प्रति ।

याज्ञवल्क्यः महाशय ! चिन्ता मास्तु मदर्थे, किमपि नाभूत् ।

वृद्धः बन्धो ! बृहन्नीलाङ्को वर्तते भवत्पृष्ठे ।

(कात्यायनी वदनात् प्रावारमपसार्य याज्ञवल्क्यं पश्यति ।)

याज्ञवल्क्यः भवेन्नीलाङ्को मत्पृष्ठे परन्तु न तु पृष्ठान्तर्वर्तिनि अहमि ।

कात्यायनी वितस्त्यधिकपरिमाणं नीलाङ्को वर्तते ।

याज्ञवल्क्यः *(कात्ययन्या वदनं विलोकयन्)* विद्या साकल्येन नहि प्रत्यादत्तेति मत्वा मद्गुरुणा विहितः स्यान्नीलाङ्कः परन्तु भिन्नोऽस्म्यहमेतस्माद्नीलाङ्कात्।नाहमेतत्संस्पृष्टोऽस्मि। परशुः चन्दनपादपन्तु प्रहरेत् परन्तु तदन्तर्वर्ति सौरभं नहि कथञ्चन प्रहर्तुं शक्नुयात् ।

वृद्धः *(अस्ताचलं प्रति पश्यन्)* बन्धो ! अर्यमा अस्तङ्ग इव प्रतीयते । गच्छेम तर्हि अस्मत्सदनं प्रति । तत्रैव संलापं करिष्यामः ।

याज्ञवल्क्यः महाशय ! प्रथमं तावत् सन्ध्यामुपासै ?

(सुखासनस्थोऽक्षिणी निमीलयति । गृहीतवंशदण्डाः चत्वारो ग्रामीणाः तीव्रगत्या तत्र प्राप्नुवन्ति ।)

एका वृद्धा कात्यायनि ! क्षणात्पूर्वं किमर्थमुच्चैर्वदन्ती आसीः ?

कात्यायनी *(याज्ञवल्क्यं प्रति अङ्गुलीनिर्देशेन)* हृदयशून्यैः त्रिभिर्जनैरेतस्य हननायासो विहितः, तदर्थमेव ।

एको युवकः तर्हि क्व पलायिता दुष्टास्ते ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कात्यायनी *(दर्शयन्ती)* तत्रैव वनं प्रति पलायिताः।

(सर्वे आश्चर्यान्विता भवन्ति।)

याज्ञवल्क्यः *(अस्तङ्गच्छन्तं भास्करं विलोकयन् प्रार्थयते।)*

जगतोऽस्य समग्रस्य कालरूपोऽसि भास्कर !
मस्तिष्कं शून्यतां प्राप्तं यजुर्मन्त्रैः प्रपूरय ॥
अवेहि निःसहायोऽस्मि वञ्चितो दानवैरिव ।
साधयेयं महत् कार्यमुच्चं हिमगिरेरिव ॥

(याज्ञवल्क्यः शनैरुत्थाय चलितुं चेष्टते। वृद्धजनः साहाय्यं करोति। कात्यायनी तालपत्राणि लेखनीं मसीधानीञ्च गृह्णाति। ग्रामजना अनुयान्ति।)

वृद्धः बन्धो ! कथं भवता एवंविधोऽतिशयोऽवाप्तः ? के सन्ति ते, ये भवन्तं सन्ताड्यापलायन्त मलिम्लुचा इव ?

याज्ञवल्क्यः *(शनैर्हिण्डमानः)* यद्भाव्यमासीत्तदभूत् परन्तु नाभूत् किञ्चिन्मम । सत्यमेतद् यद् गुरुणा वैशम्पायनेन सहपाठिभ्याञ्च मदधीतां विद्यां प्रत्यादातुं मत्पृष्ठे ताडनेन नीललक्ष्म च कृतः परन्तु नीलाङ्कस्तु विकृतिर्वपुषः, न तु मदीयात्मनः।

(पीडामनुभवन् सहसावरुद्धो भवति।)

वृद्धः बन्धो ! पुनः किमर्थमवरुद्धोऽस्ति भवान् ? किं सञ्जातम् ?

(कात्यायनी याज्ञवल्क्यवदनमनवरतं विलोकयति। शनैस्तस्या वदनं म्लायति। ग्रामीणा वारं वारं तयोर्वदने वीक्षमाणाः कर्णाकर्णिकया संलपन्ति।)(मार्गं सङ्केतयन् वृद्धः) इतो गच्छाम !

याज्ञवल्क्यः महाशय ! एतत्पथा कुत्र प्राप्यते ?

ग्रामीणाः अस्मदीय–ग्रामगृहेषु।

वृद्धः आम्, अस्मद्गृहम् । *(अङ्गुलीनिर्देशेन)* दृश्यतां तदेव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्ततेऽस्मद्गृहम् ।

याज्ञवल्क्यः *(सहसावरुद्धः सन्)* महाशय ! अहं स्वीयमेव गृहं गच्छामि सम्प्रति । मदर्थे कष्टं मा वहन्तु भवन्तः ।

(तालपत्राणि कात्यायन्याः कराभ्यां सहसा भूमौ पतन्ति । सा तानि सङ्कलयति । ग्रामीणाः तस्याः साहाय्यं कुर्वन्ति ।)

वृद्धः बन्धो ! अस्मद्ग्रामगृहाणि नहि पवित्रीकरोति भवान् ? कृपया गच्छाम तत्रैव ।

याज्ञवल्क्यः महाशय ! अद्यसौभाग्यवशाद्भवद्भिः सहमेलनावसरो लब्धः । पश्चाच्च कदाचिद् मेलनं भवितैव । क्षम्यतामद्य । न च निरुध्यतां मन्मार्गम् । मातापित्रोर्दर्शनमपि चिरकालतो नैवावाप्तं मया । अतः स्वसदनमेव यामि ।

(कात्यायनी किङ्कर्तव्योपायराहित्येन याज्ञवल्क्यस्य मार्गमवरुणद्धि ।)

वृद्धः बन्धो ! स्वपरिचयन्तु प्रदायैव प्रस्थीयताम् ।

याज्ञवल्क्यः अत्रैव हिमालयस्याङ्के कमलातटवर्तिन्या मिथिलानगर्या मूर्ध्नि विलसितस्य ग्रामस्य वास्तव्यो देवराताऽऽज्मजो याज्ञवल्क्योऽस्मि । पितुराज्ञया स्वसदनान्निर्गतोऽहं भ्रामं भ्रामं गुरोर्वैशम्पायनस्याश्रमं प्राप्तवान् । तत्र मया यावन्तोऽपि वेदमन्त्रा रटिता अधीता अवबुद्धाश्च, वमनेन ते साकल्येन निःसारिताः । रिक्तोऽस्मि सम्प्रति ।

(सूर्यास्तं निर्दिशन्) अस्ताचलं प्राप्तः प्रभाकरोऽयं श्वरुदयाचलाद् अवश्यमुदीयात् । इतःपरं स एवास्ति मदीयो गुरुः । यतो हि, अद्य मयावबुद्धं यत्, तस्यैव रश्मीनामेकोऽणुरस्मीति ।

वृद्धः महोदय ! भवतः सत्यबोधो भवन्तं विश्वस्मिन् विश्वे हिमशैलशृङ्गमिव सर्वोच्चं साधयन् स्थापयेत् ।

याज्ञवल्क्यः *(स्मितं कृत्वा)* महाशय ! भवादृशां सत्पुरुषाणां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुभाशीर्मदर्थे वरः सिद्ध्येत्।

(जिगमिषन्) सम्प्रति अवकाशं प्राप्नुयामितः !

(कात्यायनी मार्गमवरुरुत्सन्ती अग्रेसरति। सा तालपत्राणि याज्ञवल्क्यकरयोः समर्पयति। विवदिषन्त्याश्च तस्या वाणी न स्फुटति। सर्वे याज्ञवल्क्यं नमस्कुर्वन्ति। स च सर्वान् नमस्कुरुते। कात्यायनीयाज्ञवल्क्ययोः चक्षूंषि अविराममन्योन्यं विषयीकुर्वन्ति। ग्रामीणाः कर्णाकर्णिकया संलपन्ति। याज्ञवल्क्यो मन्दं मन्दं चलति परन्तु किञ्चिद्दूरं प्राप्यैव चलितुमक्षमः सन् भूमौ निपतति। कात्यायनी प्रधाव्य तत्र प्राप्य तं समुत्थापयति। वृद्धजनः पुनश्च याज्ञवल्क्यस्योपस्थानाय साहाय्यं विधत्ते। ग्रामीणाः तत्सर्वमपि साश्चर्यं पश्यन्ति।)

वृद्धः महाशय ! स्वगेहं गन्तुं नहि प्रभवति भवान्। भवदीये पृष्ठे बृहन्नीलाङ्को वर्तते।

(सानुरोधम्) गच्छामास्मदीयं गेहम्। द्वित्राणि दिनानि विश्रम्य स्वगेहं प्रति प्रस्थीयताम्। तदानीं भवन्तं स्वगेहं प्रापयितुं वयञ्च यातास्मः।

(कात्यायनी स्मयते।)

नेपथ्यतः **गुरुणा सहपाठिभ्यां दुर्मत्या ताडितो भृशम्।**
याज्ञवल्क्योऽक्षमो जातः सोढुं तज्जं प्रपीडनम्॥
पीडारवं प्रकुर्वाणः सोऽयादन्यनिकेतनम्।
चिन्तयन् स्नेहयुक्तैस्तैः सहायैर्गमनं वरम्॥

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् ३

महावाक्यम्

स्थानम् – कमलानद्याः तटवर्ती मध्यग्रामः
कालः – अपराह्णः, पूर्वदृश्यसमयाद् विंशतिवर्षेभ्यः पश्चात्

हरितशैलमूले कमलानद्याः तटसिन्नधौ एकस्यामुच्चभूमौ एका पर्णशाला वर्तते। तस्याः प्राङ्गणस्थे आमलकीतरुमूले याज्ञवल्क्यो मृगचर्मासनमधिष्ठितोऽस्ति । कदाचिद् व्यक्तं गायन् कदाचिद्विचारमग्नः कदाचिच्च ताडपत्रेषु अक्षराङ्कनरतो विलोक्यते सः । अस्मिन्नेव क्षणे पक्षिरवः श्रूयते । एकं पक्षियूथमुड्डीय पर्णशालानिकटस्थेषु द्रुमेषु वस्तुमायाति। याज्ञवल्क्यस्य दृष्टिः तदेव विषयीकरोति।

याज्ञवल्क्य उत्थाय इतस्ततश्चलति । स किमपि स्मरन् शिरोऽवधूय आसने समुपतिष्ठते, लेखनञ्च प्रारभते । तदानीमेव जलमानेतुं निर्गच्छन्ती मैत्रेयी उपायाति।

मैत्रेयी आर्य ! सूर्यास्तसमयोऽयम् । कियल्लिखति भवान् ? श्वस्तनदिवसे पुनररुणोदयो न भविता किल !

याज्ञवल्क्यः *(लेखनाद्विरम्य मैत्रेयीं वीक्ष्य हसन्)* आर्ये श्वस्तनदिवसेऽपि अरुणोदयो भविता, आतपश्च सञ्जनिता परन्तु अद्यतनं दिनं न पुनः प्रत्यायात्। अत एव दिनस्यास्य यथाशक्ति सदुपयोगं कुर्वन्नस्मि।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी *(उपगम्य ताडपत्रसंहतिं कराभ्यां गृहीत्वा)* एष ग्रन्थस्तु बृहदाकारको भवितेति प्रतिभाति। मनुस्मृतेरेव साम्यं भजेत किलायम् !

याज्ञवल्क्यः *(विहस्य ताडपत्रसंहतेः पत्राणि स्पृशन्)* आर्ये ! किङ्कथयसि एवम् ? मनुस्मृतेरेव तुल्यतायै तु अयं ग्रन्थः किमर्थमपेक्ष्यते ?, मनुस्मृत्यैव अलं तावत्।

मैत्रेयी *(लज्जया)* अनुचितं कथितं किं मया ?, क्षम्यतां तावत्।

याज्ञवल्क्यः *(सोत्साहम्)* आर्ये ! द्रष्टासि त्वं यद् अहमिमं ग्रन्थं हिमशैलीयप्रदेशस्य सर्वोत्तमं रत्नं विधास्यामि।

(अतीतं स्मरन्) गुरुर्वैशम्पायनो यन्मदीयं मस्तिष्कं रिक्तमकार्षीत्, तदर्थं ग्रन्थोऽयं मन्मस्तिष्कस्य पूर्णतायाः प्रतीकः सेत्स्यति।

मैत्रेयी *(सहर्षम्)* आर्य ! ग्रन्थस्यास्य किं शीर्षकं विदधानोऽस्ति भवान् ?

याज्ञवल्क्यः *(ग्रन्थस्यावरकं गृह्णन्)* प्रथमं ग्रन्थलेखनं पूर्णताङ्गच्छेत्। तदनु शीर्षकं विचिन्तयेयम्।

मैत्रेयी आर्य ! ग्रन्थशीर्षकन्तु भवन्नाम्नैव स्थापनमुचितं स्यात्।

(याज्ञवल्क्यो हसति।)

याज्ञवल्क्यः *(मैत्रेय्याः करौ प्रगृह्य)* आर्ये ! हिमशैलप्रदेशीयैः समतलस्थलीवास्तव्यैः कुरुपाञ्चालादिस्थैर्विद्याकेन्द्रैश्च सम्मतिः प्रदास्यते चेद् 'याज्ञवल्क्य–स्मृतिः' इत्येव शीर्षकं भवेत् परन्तु समयस्य परीक्षाविषयोऽयम्।

(बर्हिणः समागत्य जलभाण्डं प्रति यान्ति।)

मैत्रेयी *(ससम्भ्रमा)* जलाशयं गच्छामि।

(याज्ञवल्क्यो मैत्रेय्याः करौ मुञ्चति। मैत्रेयी धातुघटमूढ्वा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो याति । याज्ञवल्क्यः पुनर्लेखनं प्रारभते । स लेखं लेखं वाचयति–

आचाराध्यायः

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥७॥
इज्याचार–दमाहिंसा–दान–स्वाध्यायकर्मणाम् ।
अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥८॥

तदानीमेव कात्यायनी शष्पभारं वहन्ती तत्र प्राप्नोति । सा तत्रैव प्राङ्गणस्य सीमप्रस्थे भारं स्थापयति ।

कात्यायनी आर्य ! चाम्पेयकाननान्तःस्थस्य शुष्कनदस्य समीपात् क्रौञ्चयूथमिव जनसंहतिरागच्छन्ती वर्तते ।

याज्ञवल्क्यः *(विचारमग्नः)* के भवेयुस्ते ?

कात्यायनी न जाने । अहन्तु नाशक्नवं किमप्यनुमातुम् ।

याज्ञवल्क्यः तराईप्रदेशं प्रति प्रस्थिताः सिन्धुलीगढीस्थानस्य हट्टापणिकाः स्युः किल !

कात्यायनी तेषान्तु अधःप्रस्थानवेला सम्प्रति सञ्जाता एव नहि ।

याज्ञवल्क्यः आम्, सत्यन्तत् । शारदीयपौर्णमास्या अनन्तरमेव तु तेषां निर्याणवेला ।तर्हि आगच्छन्तः ते के सन्तीति त्वया ग्रामवासिनो न पृष्टाः किल ?

कात्यायनी तेऽवश्यं पृष्टाः परन्तु तेऽपि आश्चर्यान्विताः सन्तः तत्रैव वीक्षमाणा आसन् ।

याज्ञवल्क्यः *(लिलेखिषन्)* अस्तु, ये केऽपि स्युः । त्यज एतं सन्दर्भम् । स्वकार्यमाचर ।

कात्यायनी आर्य ! एवं कथनं नोचितं किल ?

याज्ञवल्क्यः *(लेखनाद्विरम्य)* आर्ये ! सार्वजनिके पथि जना आयान्ति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यान्ति च । अस्माकं किं प्रयोजनमेतेन ? वस्तुतोऽस्मदीयं जीवनञ्च यानायानयोरेकः पन्था वर्तते चेत्तत्र पथि चलताम् .... ।

कात्यायनी *(भर्तृकथनं मध्येऽवरोध्य)* आर्य ! भवाँस्तु ह्योऽग्रजया सहेव मया साकञ्च संलपन्नस्ति ! कथञ्चित्ते निवासाय अस्मदीयमेव आश्रममायास्यन्ति चेत्तेषां निवासाशनयोर्व्यवस्था तु विधेयैव ।

याज्ञवल्क्यः *(विहसन्)* आर्ये ! ननु सदा गृहकार्यव्यवहारैः सह त्वत्प्रयोजनं भवति परन्तु अहं ब्रवीमि यद् यदि तेऽस्मदीयमाश्रममायास्यन्ति तर्हि स्वाश्रमस्थोपचारैरेव तान् सत्करिष्यामहे । अस्माकं लघु अतिथिसदनं वर्तत एव । तर्हि का चिन्ता तेषां निवासाय ?

(कात्यायनी अतिथिसदनं विलोक्य पुनश्च भर्तृवदनं पश्यति ।)

कात्यायनी आर्य ! अस्मत्सदने केवलं प्रस्थपरिमितं पयः समुपलब्धं वर्तते परन्तु चतुष्प्रस्थपरिमितं यदि अपेक्ष्येत ?

याज्ञवल्क्यः *(पुनरपि व्यङ्ग्यभावेन विहस्य)* चिन्ता मास्तु । त्वं प्रस्थपरिमितमपि पयः चतुष्प्रस्थपरिमितं कर्तुं प्रभविष्यसि खलु ।

कात्यायनी *(रसनां दन्ततले निष्पीडयन्ती)* जलमिश्रणेन ?

याज्ञवल्क्यः *(मस्तकमवधूय)* नैव नैव ।

कात्यायनी तावत् ?

याज्ञवल्क्यः विभज्य । यथा त्वं मुष्टिपरिमितमपि प्रस्थपरिमितं कर्तुं प्रभवसि चेत् प्रस्थपरिमितस्य च मुष्टिपरिमितं कर्तुं शक्नोसि एव । एवमेव पुनश्च मुष्टिपरिमितस्यापि अर्धमुष्टिपरिमितं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधातुञ्च प्रभवसि । अतो यावन्तो भागा अपेक्ष्यन्ते, तावतो विभागान् कुरु । साहज्येन समाधास्यते समस्या ।

कात्यायनी *(सशब्दं निःश्वसन्ती)* न्यूनाधिक्यप्रसङ्गो न भवेत् किं वा ?

याज्ञवल्क्यः *(विहसन्)* अवश्यम्, परन्तु न्यूनाधिक्यप्रसङ्गोऽपि अस्माकमेव कल्पनाविषयः । अतिथिसत्काराय कोऽपि विनिश्चितो मानदण्डो न भवेत् किल !

कात्यायनी *(शुष्काणि दारुकाणि सङ्कलयन्ती)* मानदण्डस्य विद्यमानत्वे खलु न्यूनमधिकं वेति अस्माकं व्यवहारः प्रचलति ।

याज्ञवल्क्यः क्वास्ति तावत्तादृङ्ज्ञानदण्डः ?

कात्यायनी अस्मदीये खलु चेतसि, अस्माकं हृदि, एतस्मिन् मनसि, आस्माकीनेऽन्तःकरणे, बुद्धौ, विवेके वा ।

याज्ञवल्क्यः तर्हि तस्य किञ्चन स्वरूपमपि तु भवेत् ?

कात्यायनी *(किङ्कथनीयमिति विचारायाक्षमा सती शिरःकम्पनेन)* नैव, तन्न दृश्यते । तत्तु मनसैव कल्पनीयं मन्तव्यं वा तथ्यं वर्तते ।

याज्ञवल्क्यः तर्हि तु मनः किमपि कल्पयितुं प्रभवति । गगने समुत्पन्नस्य आम्रतरोर्मधुराणि फलानि, शशशृङ्गे च कल्पयितुं प्रभवति । प्रभवति न वा ? ब्रूहि ब्रूहि !

कात्यायनी *(उपसृत्य)* तत्तु असम्भूतमसम्भाव्यञ्च वर्तते । अल्पत्वाधिकत्वाभ्यां सह प्रसङ्गस्यास्य कः सम्बन्धः ?

याज्ञवल्क्यः तावत्त्वं न्यूनाधिकयोरस्तित्वे विश्वसिसि ?

कात्यायनी अवश्यं विश्वसिमि । यतो हि, एकेन सह एकयोगाद् द्वे, द्वाभ्यां द्वियोगात् चत्वारि, चतुर्भिः चतुर्योगाच्च अष्ट इति स्पष्टम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः शोभनः त्वदीयः तर्कः। अनुमोदनञ्च विदधेऽहं परन्तु तवैव मनःकल्पितमेतद् एकं द्वे चत्वारि अष्ट इति।

कात्यायनी नैव नैव आर्य ! एतत्तु गणितप्रमाणमस्ति। अकाट्यमेतत्। मूढाश्च विदन्ति एतत्।

याज्ञवल्क्यः *(गभीरमुखमुद्रया)* अहमपि एतन्मन्ये परन्तु एकस्मिन्नेव द्वि वर्तते। यतो हि, द्वि एकस्मादेव सृज्यते। एकं विना द्वयोः सर्जनमसम्भवम्। शून्येन च एकस्यास्तित्वं सेद्धुं न शक्नोति। एकमनिवार्यं सत्यं वर्तते। एकस्मिन्नेव 'द्वि' नास्ति वा ? द्वाभ्यां त्रिभिः चतुर्भिर्वा एकः सृज्यते किम् ! विचिन्तय एतत्।

कात्यायनी आर्य ! एतत्तु नहि मन्मस्तिष्कमारोहति। अग्रजया सह कार्योऽयमेतद्विषयकः संलापः।

याज्ञवल्क्यः आर्ये ! एष तु सर्वैरपि बोद्धव्यो विषयः।

कात्यायनी *(साश्चर्यम्)* बोद्धव्यः केन ? चक्षुर्भ्याम् ?
(करौ प्रदर्श्य) आभ्यां कराभ्यां वा ?

याज्ञवल्क्यः *(मस्तकमवधूय)* आर्ये ! चक्षुस्तु पदार्थदर्शनस्य साधनमात्रं वर्तते। तथैव करोऽपि केवलं बाह्यं साधनम्।

कात्यायनी तथा चेन्मया ?

याज्ञवल्क्यः आम्, त्वया। ऋते त्वां न चक्षुषी द्रष्टुं प्रभवतः, न च करौ कार्यं कर्तुं क्षमेते। त्वयि त्वदभावे त्वं शवः सम्पद्यसे। अतस्तव मूल्यं त्वयि वर्तते। तथैव मम मूल्यं मयि वर्तते। पुनः त्वयि मयि केवलमेक एव बोधो विद्यते।

कात्यायनी *(चिन्तयन्ती)* आर्य ! तावदत्र केवलं बोध एव वर्तते ?

याज्ञवल्क्यः त्वमेव अनुभवेरेतत्। यतो हि, अनुभवगम्यो विषयोऽयम्।

कात्यायनी गृहकृत्ये संलग्नया, गार्हव्यवहारे निमग्नया च महिलयापि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुभवितुं शक्योऽयं विषयः ?

याज्ञवल्क्यः आर्ये ! गार्हकृत्याद् व्यवहाराच्च स्वात्मानं पृथङ्गत्वा विचिन्तय यत् त्वं कदा तत्र संलग्नासि ?

(कात्यायनी किङ्कथनीयमिति अविज्ञाय तूष्णीमाकलय्य तिष्ठति ।)

त्वं स्वात्मानं नलिनीदलस्थं तोयमिव मन्यस्व । वायुवेगेन दलं कम्पेत परं प्रकृतेर्नियमेनैव तथा भवतीति विचारणीयम् ।

(गोष्ठात्तर्णक्या ध्वनिः श्रूयते । क्षणानन्तरं गोध्वनिश्च निशम्यते ।)

कात्यायनी अहो ! संलापेनैव दीर्घकालोऽतिवाहितः । गावो बुभुक्षिताः ।

(शष्पराशिमूढ्वा गोष्ठं प्रति याति । याज्ञवल्क्यो लेखन्यग्रं तक्षति । ग्रामस्य द्वौ प्रबुद्धजनौ प्रधावन्तौ समागत्य याज्ञवल्क्यं प्रणमतः ।)

ग्रामीणः मुनिराज ! मिथिलाधिपतिर्जनकोऽस्मदीयं खलु ग्रामं सम्प्राप्तोऽस्ति ।

द्वितीयो ग्रामीणः साम्प्रतं स तत्रैव वर्तुले जनाश्रये विश्राम्यमाणोऽस्ति । तेन सहैव बहवो जनाश्च समागताः सन्ति ।

याज्ञवल्क्यः *(सहसोत्थाय)* एवम् ! जनकपुराद् बहिर्महाराजजनकस्य प्रस्थानमभवदिति तु श्रुतमासीद् मया, तच्च चतुर्भ्यः पञ्चभ्यो वा मासेभ्यः पूर्वम् ।

द्वितीयो ग्रामीणः नृपसहचरैः पण्डितैः ,अत्र समन्ततः क्वचिद् मुनीनामाश्रमाः सन्ति न वे'ति पृष्टम् । आवाभ्यां भवदीय आश्रमोऽस्तीति प्रत्यभिहितम् । अत इत एवालक्ष्यते महाराजस्यागमनम् ।

प्रथमो ग्रामीणः अत एव आवां भवन्तं प्रागेव सूचयितुमिह सम्प्राप्तौ ।

(कात्यायनी ससम्भ्रमं तत्र प्राप्नोति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कात्यायनी *(साश्चर्यम्)* मया तु केवलमनुमितमेतत् परं याथार्थ्येन आपतिष्यति ! तावन्तोऽतिथयः कथं भोजयेरन्, क्व च शाययेरन् ?

(पुनश्च संरभमाणालोक्यते ।)

याज्ञवल्क्यः आर्ये ! मैवं संरभस्व । वस्तुतो नृपतयोऽपि अस्मादृशा एव । ते राजधान्यां प्रासादे विराजन्ते परन्तु ग्राममागतास्तेऽस्मत्कुटीरे च साहज्येन निवसन्ति । अतस्त्वं पर्णशालामेतां राजप्रासादं सम्पादयितुं मा चेष्टस्व । पुनश्चात्र राजसं भोजनं व्यवस्थापयितुञ्च मा प्रयतस्व ।

कात्यायनी *(निकटस्थां सम्मार्जनीं गृह्णन्ती)* तथा चेदपि सम्मार्जनं लिम्पनञ्च अपेक्ष्येत एव ।

(निरेति ।)

याज्ञवल्क्यः *(ताडपत्रसंहतिं वासःपोटलिकान्तः संस्थाप्य ग्रामीणौ वीक्षमाणः)* राज्ञ आगमनं शोभनं खलु । अस्मदीयो ग्राम आस्माकीनः कुटीरश्च पावनौ भविष्यतः । नैवं वा ?

द्वितीयो ग्रामीणः राजा स्वयं समागतश्चेद् अस्मत्कथनञ्च स शृणुयात् किल !

याज्ञवल्क्यः राजा जनभावनाया एव प्रतीकोऽस्ति । जनभावनामाधृत्यैव च राजा जननायको भवति, जनरक्षको जनपदस्वामी च सञ्जायते ।

प्रथमो ग्रामीणः मुनिवर्य ! सहचराणां पण्डितानां परामर्शानुसारं राज्ञा तीर्थाटनकाले प्रभूतं दक्षिणाद्रव्यं व्ययीकृतमिति श्रूयते । अतोऽस्मिन् मुनिवर्यकुटीरेऽपि राज्ञः सुदृष्टिरवश्यं निपतेत् !

द्वितीयो ग्रामीणः कथञ्चिद् न निपतिष्यति चेदपि सकलैश्च ग्रामवासिभिर्मिलित्वा राजा निवेदनीयः । एतादृक् स्ववसरः पुनरागच्छेन्न वा, को जानीयात् !

 CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः बन्धो ! प्रारब्धानुरूपं यद्भाव्यं तद्भविष्यत्येव । अत्र का चिन्ता ? अत्र राज्ञः सुदृष्टिर्न निपतिष्यति चेत् कोऽपि लाभो न स्यात्तथापि हानिश्च न काचन आपत्स्यते । इयं पर्णशाला वर्तते । राज्ञोऽनुग्रहेण स्वर्णजडिता सम्पद्यते चेदपि पर्णशाला तु पर्णशालैव ।

प्रथमो ग्रामीणः मुनिवर्य ! प्रारब्धस्यैव समाश्रयणता किमर्थम् ? प्रारब्धमाधृत्य पुरुषार्थ एव नापेक्ष्यते किम् ?

याज्ञवल्क्यः *(गभीरमुखमुद्रया)* बन्धो ! एतत् सकलं मानवजीवनं खलु प्रारब्धपरिणामः । प्रारब्धवशगोऽयं मानवः । सुख–दुःखाभ्यां लाभ–हानिभ्यां संयोग–वियोगाभ्याञ्चायं न कथञ्चन पृथक् स्थातुं प्रभवति । अवश्यम्भावि कर्म निश्चयेन भवति । येन च नहि भाव्यम्, ननु तन्न भवति । तथापि पुरुषार्थ एव नापेक्ष्यत इति तु नाहं वच्मि । निष्कामभावेन पुरुषार्थः साधनीयः परन्तु पुरुषार्थस्य लक्ष्यमात्मतत्त्वसाक्षात्कार एव भवतु ।

प्रथमो ग्रामीणः *(साश्चर्यम्)* मुनिवर्य ! ईदृशे लक्ष्ये तु आत्मस्वार्थो न भवेत् किल ?

याज्ञवल्क्यः भवति, अवश्यं भवति आपाततो विचारिते सति, परन्तु गभीरतया विचार्यमाणेऽस्मिन् आत्मस्वार्थे तु सार्वत्रिकत्वेन निःस्वार्थता खलु व्याप्ता वर्तते ।

प्रथमो ग्रामीणः मुनिवर्य ! कथमेतत् सम्भवति ?

याज्ञवल्क्यः कथं न सम्भवेत् ? स्वात्मनात्मानं साक्षात्कृत्य अन्यांश्च स्वात्मस्वरूपत्वेन परिचितवतः कृते तु स्वार्थः स्वतः परार्थरूपेण परिणमते-

आत्मतत्त्वावबोधेन समत्वमनुपश्यतः ।
अहं त्वञ्च त्वमेवाहं पार्थक्यं विद्यते कुतः ?॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(मैत्रेयी पानीयमानयति । सा पानीयघटमधः स्थापयति ।)

मैत्रेयी (ग्रामीणयोर्वदने विलोक्य) का वार्ता ? केचन आगच्छन्तः सन्ति वा ?

प्रथमो ग्रामीणः मिथिलाधिपतिर्जनक आगच्छन् अस्ति किल ?

मैत्रेयी *(भर्तृवदनं वीक्ष्य)* एवं वा आर्य ?

याज्ञवल्क्यः न ज्ञायते किं त्वया इयं वार्ता ?

मैत्रेयी कथं ज्ञायेत उपरि निर्झरजलाशयङ्गतया मया ? क्वास्ति तावद् भगिनी ?

याज्ञवल्क्यः सा तु अतिथिसदनं सम्मार्जयितुं गता स्यात् ।

मैत्रेयी *(ससम्भ्रमा)* अहञ्च गच्छामि तत्साहाय्यार्थम् ।

(निर्गच्छति ।)

याज्ञवल्क्यः बन्धू ! अत्र भवद्भ्याञ्च किञ्चित् साहाय्यमपेक्षितं वर्तते । *(अङ्गुलीनिर्देशेन)* दृश्यतां तत्र सकला मृगचर्मसंहतिर्वर्तते । प्रसार्यतामिह भूमौ धूलिनिपातन–पुरःसरम् । अहमपि राज्ञोऽभिनन्दनाय सन्नद्धतां सम्पादयामि ।

ग्रामीणाः *(युगपत्)* अस्तु तावत् ।

प्रथमो ग्रामीणः सामश्रवष्प्रभृतिच्छात्राश्च आह्वनीया वा ?

याज्ञवल्क्यः ते तु सर्वेऽपि कोशीतटे वराहक्षेत्रस्य मेलापकं प्रेक्षितुं गताः सन्ति ।

(ग्रामीणौ मृगचर्माणि निःसार्य धूलिनिपातनं प्रारभेते । याज्ञवल्क्यः स्वीया लेखनसामग्री वितर्द्याः कुड्यवपायां संस्थाप्य अन्तः प्रविशति । एकः सेनानी राजगुरुश्च समायातः ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सेनानी राजगुरो ! एष आश्रमस्तु रमणीयः प्रतिभाति । दृश्यतां तत्र विकसितकुसुमा नागवेलीलतिका !

राजगुरुः आम्, सत्यमेव ।

(तदग्रभागं निर्दिश्य)

तत्र लघीयसः स्वर्णचम्पकतरोः शाखास्कन्धे आश्चर्यजनकतया समुद्भूता स्वर्णगाभा च वर्तते !

सेनानी *(निरीक्षमाणः)* आम्, दृष्टं मयापि ।

(ग्रामीणौ प्रति) अयमेव वा मुनिवर्यस्य याज्ञवल्क्यस्य आश्रमः ?

प्रथमो ग्रामीणः आम् ।

राजगुरुः तावत् क्वास्ति सः ?

(हस्ते जलपात्रं गृहीत्वा याज्ञवल्क्यः कुटीरान्निष्क्रामति । ग्रामीणौ तत्रैव निकटेऽवतिष्ठेते ।)

द्वितीयो ग्रामीणः *(कुटीराद् निर्गच्छन्तं याज्ञवल्क्यं निर्दिशन्)* दृश्यतां समागतः सः ।

(सेनानी राजगुरुश्च याज्ञवल्क्यमभिवन्देते । याज्ञवल्क्योऽपि तावतिथी प्रत्यभिवन्दते ।)

याज्ञवल्क्यः यात्राकष्टं सोढ्वा भवन्तावत्रास्मदीयां पर्णशालां प्राप्तवन्तौ । इह स्वागतं भवतोः ।

राजगुरुः मुनिवर्य ! मिथिलाधिपतेर्जनकस्य इह समागमनं सपदि वर्तते । तदर्थं पूर्वसज्जता सम्यक् सम्पादिता स्यात् ।

याज्ञवल्क्यः *(सविनयम्)* एतत् पूर्वमेव ज्ञातं मया । एवञ्च तदर्थं सज्जतापि यथासम्भवं सम्पाद्यमाना वर्तते ।

राजगुरुः हिमशैलप्रदेशीयतीर्थेषु पर्यटनानन्तरं निवर्तनसन्दर्भेऽत्र स

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्प्राप्तोऽस्ति। एतज्ज्ञातं वा भवता ?

याज्ञवल्क्यः आम्, ज्ञातं मया।

राजगुरुः कृष्णागण्डक्याः तटीयमार्गेण गुरुपूर्णिमायां महाराजस्य पदार्पणं मुक्तिक्षेत्रेऽभवत्। ततो निवर्त्य वयं श्रावणपूर्णिमायां गोसाइकुण्डं प्राप्य पाशुपतक्षेत्रञ्च प्राप्तवन्तः । तत्पश्चात् पुनराग्नेयपथा देशाटनं विदधानाः वयं परह्यः कमलातटं प्राप्य ततोऽधोमार्गेण अद्य इह भवदाश्रमं सम्प्राप्ताः। कियन्ति दिनानि अपेक्ष्यन्त इतो राजधानीं प्राप्तुम् ?

याज्ञवल्क्यः आधिक्येन त्रीणि दिनानि, नो चेद्दिनद्वयमात्रम् । चतुः–क्रोशात्मकस्य वनस्य कश्चन मार्गांशोऽपि तन्मध्ये समायाति।

सेनानी मुनिवर्य ! उच्यतां यदि आश्रमस्यास्य कस्मिँश्चिदपि पक्षे न्यूनता काचन अपेक्षा वा वर्तते चेत् । तद्विषये महाराजो निवेदयिष्यते, भवान् स्वयञ्च निवेदयितुं शक्ष्यति ।

याज्ञवल्क्यः तथाविधं तु किमपि नास्ति।

(घोटकनिःस्वनो निशम्यते । अङ्गरक्षकाः समायान्ति । मिथिलाधिपतेर्जनकस्य च आरात् समागमो दृश्यते । तमनुगच्छन् विशालो जनसम्मर्दश्च दृष्टिपथमधिरोहति ।)

राजगुरुः *(दूरं विलोकयन्)* दृश्यतां महाराजस्य समागमोऽजायत किल।

(सर्वे तत्रैव यान्ति । याज्ञवल्क्यः पञ्चामृतेन अभिषिच्य जनकं प्रति स्वागतं व्याहरति । महाराजो जनकः तत्रैव निकटस्थमासन्दमध्यास्ते ।)

जनकः *(याज्ञवल्क्यं निरीक्ष्य प्रणमन्)* अत्र भवान् आश्रमस्यास्य मुनिराजः ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः *(प्रतिनमन्)* महाराज !

जनकः आस्यतामिह मुनिराज !, किमर्थमुत्थीयते ?

(याज्ञवल्क्यः तत्रैव तत्सन्निधावुपविशति । अङ्गरक्षकान् विहाय अन्ये च उपविशन्ति ।)

याज्ञवल्क्यः महाराजस्य सप्तस्वेव अङ्गेषु कौशल्यं वर्तत इति आशासे ।

जनकः मुनिराजस्य शुभाशिषा कौशल्यमेव परन्तु अत्राश्रमविषये का वार्ता ?

याज्ञवल्क्यः महाराजस्य अनुकम्पया सर्वं कुशलमेव ।

जनकः जलविषये समिद्विषये च किमपि असौविध्यं वा ?

याज्ञवल्क्यः न किञ्चन असौविध्यं महाराज ! ननु सर्वमेव सौविध्यकरम् ।

जनकः चतुःक्रोशवत्या अरण्यान्या शार्दूल-भल्लूक-गण्डक-तुण्ड्यादयो जन्तवः कदाचिद् इत आव्रज्य उपद्रवं समुत्पादयन्ति वा ?

याज्ञवल्क्यः कदाचिद् आव्रजन्त्येव परन्तु तथाविधं न किमपि कर्तुं प्रभूय स्वयं विनिर्व्रजन्ति ।

(गाम्भीर्येण विचिन्त्य) वितते पथि यात्रया भवान् श्रान्तत्वङ्गतः स्यात् ।

जनकः मुनिराज ! यात्रया न, अपितु जीवनमाक्रम्यमानया जरया श्रान्तत्वमनुभूयते । अनल्पानि तीर्थस्थलानि अटितानि, भूरीणि दानकर्माणि आचरितानि, बह्व्यः पुराणकथाश्च श्रुताः । तदानीं तत्र तत्र क्षणं मानसी शान्तिरपि आभासते परन्तु क्षणानन्तरं पुनश्च वर्धतेऽशान्तिः । क्षणं सुखमनुभूतमिव भवति, तदनन्तरं पुनर्दुःखानुभूतिः ।

याज्ञवल्क्यः *(जनकस्य ललाटस्थां विकृतरेखां निरीक्षमाणः)* महाराज ! शान्तिरशान्तिः, हानिर्लाभः, सुखं दुःखमित्यादयो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वन्द्वास्तु बालानां सैकतसद्मानां निपतनमिव दनीध्वंस्यन्ते। कल्पनाप्रसूता एते। यावत् सांसारिकविषयाणां चिन्तनं वर्धते, तावत् कल्पितवस्तूनि अस्मान् बाधन्ते।

(जनकोऽनारतं साश्चर्यञ्च याज्ञवल्क्यवदनं विलोकयति।)

जनकः *(मन्दस्वरेण)* मुनिराज !

याज्ञवल्क्यः आज्ञाप्यतां महाराज !

जनकः मुनिराज ! अस्मदीयं जीवनं मरणशीलं न वा !

याज्ञवल्क्यः अवश्यं महाराज ! परन्तु विषयचिन्तनमात्रेण नित्यं स्वस्मिन् मरणशीलत्वाधानं नोचितं खलु सचेता भूत्वा आत्मबोधाधिगमेन जीवन्मुक्तस्थितेः सदातनी अनुभूतिरेव उचिता कल्याणप्रदा च स्यात्।

(जनको विचारमग्नो भवति। अन्ये च विस्मिताः सन्तः तूष्णीं तिष्ठन्ति। जनकः समन्ततः पश्यति।)

जनकः मुनिराज ! मन्मनसानुभूतं किमपि विवदिषामि।

याज्ञवल्क्यः ब्रूयतां महाराज !

जनकः मुनिराज ! प्रविष्टे हि आश्रमेऽस्मिन् मया सविशेषा शान्तिरनुभूयमाना वर्तते। अत्र भवान् एकाकी निवसति वा ?

याज्ञवल्क्यः *(सविनयम्)* महाराज ! मदीये भार्ये सन्तती च सन्ति।

जनकः मुनिराज ! भवाँस्तु आश्रमेऽस्मिन् पूर्णतो गार्हस्थ्यं यापयन्नस्तीति मन्ये। भवदीयौ पितरावपि वर्तेते वा ?

याज्ञवल्क्यः *(शिरोऽवनमय्य)* महाराज ! प्रकृतेरनन्तकालान्तर्वर्तिनः शश्वद्विधानान्तर्गतान् स्वीयान् भोगान् भुक्त्वा तौ दिवङ्गतौ।

(याज्ञवल्क्यस्य तनयौ कृष्णसारं धावयन्तौ आगच्छतः। महाराजो जनकः स्वकीयं कूर्चं संस्पृशति। कृष्णसाराः तत्रैव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपायान्ति । क्षणं तेऽभ्यागतान् निरीक्षन्ते । तदनु याज्ञवल्क्यस्य करौ लिहन्ति । याज्ञवल्क्यः तान् लवणान् भोजयति । द्वावेव तनयौ पितरमुपागत्य उपविशतः ।)

मधुः *(राजानं जनकं निर्दिश्य)* तात ! अत्र क एषः ?

याज्ञवल्क्यः अस्मद्देशाधिपतिर्जनकः ।

मधुः *(प्रणिपतन्)* नमस्करोमि महाराज !

जनकः नमस्क्रियते मुनिकुमार !

वनिता *(शिरोऽवनमय्य)* प्रणमामि महाराज !

जनकः प्रणम्यते मुनिकुमारि ! कुतः प्रत्यागमनं सम्प्रति ?

वनिता *(दूरं सङ्केत्य)* तत्र कृष्णसारान् चारयित्वा चरणक्षेत्रात् प्रत्यायाव ।

जनकः *(मधुं निकटे समाकृष्य)* पिता कियत् शिक्षितवान् भवन्तम् ?

मधुः साम्प्रतमेव महावाक्यं प्रारब्धं वर्तते ।

जनकः *(आश्चर्येण इव)* महावाक्यम् ! कीदृशं तन्महावाक्यम् ? *(शुश्रूषन् औत्सुक्येन)* अहमपि शृणुयाम् !

मधुः अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म....

जनकः *(राजगुरुं वीक्षमाणो व्यङ्ग्यभावेन)* गुरो ! भवद्दृशा एतादृशानां महावाक्यानां महत्त्वमेव न जानन्ति आहोस्वित् महावाक्यानामेतेषां ज्ञानाय क्षात्रधर्मिणां राज्ञामधिकार एव नास्ति किम् ?

वनिता *(राजगुरोः प्रत्युत्तरणात् पूर्वमेव राजानमुपगम्य)* महाराज ! अस्मिन्नस्मादृशानां स्त्रीजातीनामपि अधिकारो वर्तते चेद् भवादृशानां राज्ञां कथं न भवेत् !

मधुः *(राज्ञो विकृतं वदनं वीक्ष्य)* आम्, महावाक्येषु तु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वेषामधिकारः।

(पितरं सम्बोधयन्) एवं वा तात ?

याज्ञवल्क्यः एवम्, महावाक्यन्तु मानवमात्रस्य सार्वजनिकी सम्पद् वर्तते।

राजगुरुः *(लज्जाभावेन राजानं प्रति शिरोऽवनमय्य)* महाराज ! मास्तु चिन्ता। शान्तिं मुक्तिञ्च अधिगन्तुं महावाक्यमेव रटनीयं बोद्धव्यञ्चेति नास्ति कश्चिन्नियमः। कर्मकाण्डीयं पूजापाठादिकन्तु अनुष्ठितमेव, दुर्गमानि तीर्थानि च भ्रमितानि। बलेरिव दानशीलतापि अवलम्बिता भवता। एष एव तु सुगमो मार्गः शान्तेः मुक्तेः सुखलोकस्य च प्राप्तये।

मधुः *(राजगुरोर्वदनं पश्यन् साश्चर्यम्)* सुखलोकस्य कृते ! क्वास्ति सुखलोकः ? कः प्राप्स्यति तत्र ?

राजगुरुः मुनिकुमार ! अपरिपक्वं भवदीयं वयः। एतादृशान् विषयाँस्तु अनुभवपरिपाकेन पश्चात् शनैर्बोधिष्यत एव।

वनिता *(पितरं प्रति)* सुरलोकं प्राप्ताश्च जीवा भोगसमाप्तेरनन्तरं मर्त्यलोकमेव प्रत्यायान्तीति अभिहितमासीद् भवता।

याज्ञवल्क्यः एवम्, एतदेव तु वत्से !

मधुः तात ! तर्हि किमर्थं पण्डितोऽयं सुरलोकलाभलोभेन राजानं लोभयति ?

याज्ञवल्क्यः वत्स ! त्वं तमेव पृच्छ।

(राजा राजगुरुश्च अन्योन्यं पश्यतः। ततो राजगुरुरवनतशिरः सन्नवतिष्ठते।)

मधुः *(राजगुरुं प्रति)* पण्डितवर्य ! सुरलोकः क्वचिद्वर्तत एवेति मन्येमहि परन्तु कस्तत्र प्राप्नुयात् ? भवतः चरणौ, करौ उत

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा वदनम् ?

(राजानवरतं मधुं पश्यति । राजगुरुर्निरुत्तरः सन् घुर्घुरायते ।)

जनकः राजगुरो ! किमर्थं भवान् तूष्णीमाकलयति ? नास्ति वा भवत्पार्श्वे एतस्य प्रश्नस्योत्तरम् ?

राजगुरुः महाराज ! अप्रौढा भवति बालानां मतिः । अत एव ते चन्द्रमसं सहस्रांशुञ्च अवचेतुम्, तथैव मेघान्तर्भागे दृष्टादृष्टक्रीडां कर्तुमपि अभिलषन्ति । एतेन हेतुना तेषां प्रश्ना उत्तर्तव्या एवेति नानिवार्यम् ।

जनकः *(आश्चर्यभावेन)* उत्तरप्रदानं नानिवार्यमिति ! किमर्थम् ?

राजगुरुः यतो हि, सुरलोको नहि बालानां कन्दुकमिव ।

(पलितं कूर्चं संस्पृशन्) महाराज ! सुरलोकस्तु एतादृशं स्थलं यत् सत्कर्मणि पुण्यकृत्येषु वा निमज्जमानैर्जनैर्देहत्यागानन्तरं लभ्यं महत् फलं वर्तते । तथाहि–

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम् ॥

जनकः परन्तु राजगुरो ! बालयोः पिता मुनिराजो याज्ञवल्क्योऽपि इहैव विराजते । अतो विचिन्त्यतां यद् बालाभ्यां पृष्टोऽपि एष प्रश्नो मुनिराजस्यैव प्रश्नो भवितुमपि शक्नोति ।

याज्ञवल्क्यः अवश्यम् अवश्यम् ।

(असमञ्जसानुभूत्या विवक्षोरपि राजगुरोर्वक्त्राद्वचनं नहि स्फुटति ।)

जनकः राजगुरो ! किमर्थं भवान् अवाग् अभूत् ? पाशुपतक्षेत्रे वाग्वतीसरित्तटवर्तिनि आर्यघट्टे मया प्रदत्तासु दक्षिणासु काचिन्न्यूनतानुभूता वा भवता ?, इदानीं मौनमाचर्यते !

राजगुरुः न न महाराज ! भवता प्रदत्तासु दक्षिणासु न काचिन्न्यूनता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मधुः *(साश्चर्यम्)* दक्षिणा ! केन देया, केन च ग्राह्या सा ?

(मुनिकुमारस्य प्रश्नेन राज्ञो मस्तिष्कं रिङ्गति । राजगुरुश्च केनचित् स्वस्योपरि उष्णजलं क्षिप्तमिव अनुभवति ।)

वनिता *(व्यङ्ग्यभावेन)* कराभ्यां दानं ताभ्यामेव चादानं भवेत् !

(मधुर्हसति । वनिता च हसितुं प्रारभते । तदानीमेव मैत्रेयीकात्यायन्यौ समायातः । मधुवनिते मातरौ प्रति कूर्दते ।)

मैत्रेयी किमर्थं हसितवन्तौ युवामाश्रममेव शब्दायमानं कुर्वाणौ ?

मधुः ज्येष्ठमातः ! अतिथीनामाश्चर्यमयीं वार्तां निशम्यैव प्रस्फुटित एष हासः ।

मैत्रेयी का वार्ता ?

मधुः स्वात्मनात्मानमविज्ञायैवसुरलोकप्राप्तिविषयादानदक्षिणाविषयिणी च वार्ता ।

(मातरौ सन्तती च युगपद् हसन्ति । राजा जनकः सविस्मयं बालवदने वीक्षते । राजगुरुर्नतशिराः तिष्ठति । याज्ञवल्क्य उत्थाय इतस्ततो हिण्डते । मधुवनिते राजगुरोरन्तिकं गच्छतः ।)

मधुः पण्डितवर्य ! सुरलोके जनः........

याज्ञवल्क्यः *(कथनेऽसमाप्ते हि मधुं समीपमाकृष्य)* अतिप्रश्नो नोचितः । यात्रया श्रान्ता एतेऽतिथयः । यदि प्रष्टव्यं किञ्चिच्चेद् भोजनानन्तरं पृच्छावसरो भविष्यति । अतो यातं सम्प्रति इतः । शोभनं माक्षिकमन्विष्य आहरतमतिथीनां कृते ।

मधुः/वनिता *(युगपत्)* भवतु तात !

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मधुः *(वनितां प्रति)* व्रजाव तावद् माक्षिकान्वेषणाय !

वनिता अस्तु व्रजाव ।

(द्वावेव निष्क्रान्तौ ।)

याज्ञवल्क्यः *(राजानमुपसृत्य स्वभार्ये सङ्केतयन्)* महाराज ! तत्रावस्थिते महिले मद्भार्ये वर्तेते । दक्षिणस्थाया अभिधानं मैत्रेयी । वामभागस्था तु कनिष्ठा, सा च कात्यायनी । तनयः तनया च कनिष्ठायाः ।

(मैत्रेयीकात्यायन्यौ राज्ञः ततोऽपि नैकट्यं प्राप्नुतः । ते नतशिरसा तं प्रणमतः । राजा च प्रतिनमति ।)

जनकः भवत्योर्मात्रालयः क्व वर्तते ?

मैत्रेयी तत्रैव कमलामुभयतः ।

(याज्ञवल्क्यो मैत्रेय्याः कर्णे किमपि अभिधत्ते । ततो मैत्रेयीकात्यायन्यौ गच्छतः ।)

याज्ञवल्क्यः महाराज ! भवान् अतिशयश्रान्तो भवेत् । अतः सम्प्रति विश्रान्त्यै अतिथिसदनं प्रति प्रस्थानमेव वरं स्यात् ।

जनकः *(उत्तिष्ठन्)* अस्तु ।

(याज्ञवल्क्यवदनं वीक्ष्य) मुनिराज ! भवत्तनययोः प्रश्नैस्तु मन्मस्तिष्कमपि रिङ्गितम् । बाल्येऽपि वयसि तर्कनिपुणौ स्तः तौ । तयोर्वाक्स्वातन्त्र्यं प्रश्नशैली तर्काश्च अरोचिषत मह्यम् । वस्तुतः किन्नाम सुरलोकः ? कश्च याति तत्र ?

(विचिन्त्य) एतत् पञ्चमहाभूतकृतं मच्छरीरम् ?

(अतिथिसदनं प्रति प्रस्थानं प्रारभते ।)

राजगुरुः *(अनुगच्छन्)* महाराज ! मनसि एवं शङ्कामुपशङ्कां वा मा विधीयताम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनकः *(तिर्यग्दृष्ट्या पश्यन्)* राजगुरो ! भवाँस्तु तयोर्लघीयसोः शिश्वोरपि प्रश्नान् समाधातुं नाशक्नोत् किल !

राजगुरुः *(परितो विलोकयन्)* अपरिपक्वमस्तिष्कवन्तौ तौ यत्किमपि पृच्छतः । तत्समाधानेन तयोः चेतःप्रसादनं नहि सुसाध्यं कर्म ।

(वल्लरीं निर्दिश्य) महाराज ! वल्लर्या धर्म एव यत्, सा तरोः परिवेष्टनेन शनैः शनैरुपरि प्राप्नोति परन्तु तौ बालौ कथं जानीयातां यत् किमर्थं वल्लरी तरुं परिवेष्टीति ! तौ तु कस्मिँश्चिदपि विषये एकतरपक्षपातिनः तर्कान् प्रस्तूय स्वात्मानं बुद्धिमन्तं सेद्धुमीहेते ।

याज्ञवल्क्यः राजगुरो ! मा कुप्यताम् । वस्तुतो मच्छिशुभ्यां विहितस्तर्कोऽपि मदीय एव । इतः किं वक्ति भवान् ?

राजगुरुः *(किङ्कथनीयमित्यविज्ञाय)* मुनिराज ! तर्हि किम् ?, भवान् 'अस्ति सुरलोकः' इति विश्वसतः सर्वानपि अस्मत्पूर्वजान् मूर्खान् मनुते किम् ?

याज्ञवल्क्यः *(गाम्भीर्येण)* नाहं मन्वे यद् अहमेव ज्ञानवान्, सर्वेऽपरे मूर्खा इति । यतो हि, स्वस्मिन् अपरस्मिँश्च समत्वमनुभूयते मया, न तु पृथक्त्वम् । सुरलोके विश्वासोऽविश्वासो वा चिन्तनानुरूपो विषयः, रक्ताम्बरे स्थापितः स्फटिक इव । तत्र केचन 'रोहितः स्फटिकः' इति भाषन्ते चेत् स्फटिकस्य याथार्थ्यं ज्ञातवन्तः केचन तु ,स्फटिको न रोहितोऽपितु अम्बरमेव रोहितमि'ति व्यवहरन्ति, परन्तु राजगुरो ! अत्रैकं तथ्यन्तु अकाट्यमेव यत्–

शरीराद् भिद्यते यस्तु जीवात्मा वपुषः परः ।
आत्मजीवात्मनोरैक्यं मुमुक्षुः कुरुते नरः ॥

जनकः *(याज्ञवल्क्यस्य पद्यांशं समुद्धृत्य)* आत्मजीवात्मनोरैक्यम्...!

याज्ञवल्क्यः एवं महाराज ! स्वस्यैव अन्तर्हृदि सच्चिदानन्दरूपः परमात्मा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विराजते। एवञ्च स एव जीवात्मनो वास्तविकं स्वरूपम्। एतदेव तु 'अयमात्मा ब्रह्मे'ति महावाक्येन अभिहितम्।

जनकः *(राजगुरुंवीक्ष्य)* राजगुरो! मुनिराजनिर्दिष्टा मूलसरणिर्भवतावबुद्धा न वा?

राजगुरुः *(राज्ञः समीपे शिरोऽवनमय्य)* महाराज ! अस्माभिरनुसृता सरणिश्च तामेव मूलसरणिं प्रापयिष्यतीति नात्र काचन संशीतिः।

याज्ञवल्क्यः *(राजगुरुं प्रति)* परन्तु राजगुरो ! सर्वप्रथमं यदि आत्मनात्मनो विवेको भवेत्, तदैव भवत्कथितं प्रतिपत्स्यते । नोचेत्तु स्वनाभिस्थं कस्तूर्याख्यं सौरभमविज्ञाय तदन्वेषणाय इतस्ततो भ्रमणशीलस्य मृगस्यैव दशा भवतोऽपि आपद्येत । अतः केवलमात्मनात्मनोर्बोधेनैव मोक्षाधिगतिः सम्भविष्यति।

(राजा याज्ञवल्क्यं प्रति पश्यति।)

जनकः *(पुनर्याज्ञवल्क्यस्य पदावलीमुद्धरन्—*

आत्मजीवात्मनोरैक्यं ....

याज्ञवल्क्यः सत्यं महाराज ! आत्मनात्मानमपरिज्ञाय आत्मनात्मानमनधिगत्य वा मनुष्यजीवनेऽस्मिन् कैवल्यस्य कल्पनामात्रमपि कर्तुं न पार्यते।

जनकः *(अनायासेन समाधिस्थः सन्निन्नव)* कैवल्यस्य कल्पनामात्रमपि !

राजगुरुः *(काकुं भाषमाणः)* परन्तु.... महाराज ! मुनिराजस्य याज्ञवल्क्यस्य कथनशैल्यां.... कथनशैल्याम्.... ।

(सर्वे शनैर्निर्यान्ति। पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् ४

ब्रह्मसभा

स्थानम् – राज्ञो जनकस्य सभागारः, जनकपुरम्
कालः – मध्याह्नसमयः, पूर्वदृश्यसमयात् केभ्यश्चिद् वर्षेभ्योऽनन्तरम्

सभाभवनं विशेषरूपेण सज्जीकृतं वर्तते । वेदवाक्यानि कुड्येषुस्थानेस्थानेसंश्लिष्टानिवर्तन्ते।सभामण्डपपीठिकायां राजसिंहासनं विद्यते । उभयत आमन्त्रिता मुनयो विपश्चिदश्च आसनान्यध्यस्ताः सन्ति । सर्वेऽपि मिथिलाधिपतिं जनकं प्रतीक्षमाणा वर्तन्ते । वैदिको ध्वनिर्गुञ्जति ।

भूपतेर्जनकस्य राज्यमन्त्रिणः पार्षदैः सह समायान्ति । अन्योन्यं संलपन्तो मुनयो विद्वज्जनाश्च तान् वीक्षन्ते ।

राज्यमन्त्री *(तारस्वरेण)* आमन्त्रिताःसम्मान्याःतत्त्वविदऋषयःविद्वज्जनाश्च! महाराजस्य जनकस्य अत्र पदार्पणं सञ्जायमानं वर्तते । अतः सविनयमनुरुणध्मि यत्, सर्वेऽपि सभासदः कृपया तूष्णीमाकलयन्तु।

(वैदिकध्वनिः शनैः शनैर्विलीयते । सर्वैर्मौनमवलम्ब्यते । राज्ञ्यापार्षदैश्चसहमिथिलाधिपतेर्जनकस्यप्रविष्टिर्जायते।सर्वे स्वस्थानेभ्यः समुत्थाय महाराजं जनकमभिवन्दन्ते । जनकश्च सर्वेषामभिवादनं स्वीकुर्वन् राजसिंहासनं प्राप्य सभाभिमुखः सन्नुपतिष्ठते।सर्वेऽपिराज्ञःचिरजीवनंकामयन्तोयुगपद्मन्त्रान्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुच्चारयन्ति । राजा सिंहासनमध्यास्ते । राजगुरुं विरहय्य सर्वेऽप्यन्ये सभासदः स्वस्थानानि अध्यासते । राजगुरुरश्वलो राज्ञा सह संलप्य तत्सकाशात् स्वीकृतिं गृह्णन्नग्रेसरति ।)

अश्वलः *(उच्चस्वरेण)* हिमशैलानां प्राङ्गणेभ्यः कन्दरेभ्योऽधित्यकोपत्यकादिभ्य एवञ्च कुरूपाञ्चालादिक्षेत्रेभ्य इह सम्प्राप्ताः समामन्त्रिताः तत्त्वविदो मुनिवर्याः ! विद्वद्वर्याश्च !

समवेता वयं सर्वे सुमुहूर्ते शुभे दिने ।
एकत्रीभवनेनेहास्मदैक्यं ननु सूच्यते ॥
हर्षस्य गौरवस्येयमनुभूतिः स्वभावजा ।
तत्त्वज्ञानपरीक्षायै शुभवेला समागता ॥
चिन्तने दर्शनेऽस्माकं निहितन्तत् समुन्नतम् ।
तथ्यं निरूपितुं नूनं दिनमेतत् समागतम् ॥
कुशाग्रबुद्धिवर्गोऽयं विज्ञवृन्दो विराजते ।
महाराजाज्ञया सद्यः स्वागतं व्याहरामि ते ॥
राजप्रश्नसमाधाने मेऽनुरोधोऽस्तु मा वृथा ।
सम्भाष्यतां तथा विज्ञा मर्यादा पाल्यते यथा ॥

(राजानं प्रति वीक्ष्य शिरोऽवनमय्य पुनः सभां सम्बोधयन्)

सनातनधर्मस्य परम्परां मर्यादाञ्च अनुशील्य अक्षरशो धर्मशास्त्रस्य निर्देशनपरिपालनशीलस्य बहुदक्षिणासम्पाद्य–यज्ञानुष्ठानशीलस्य मिथिलाधिपतेर्जनकस्य.... जयः !

(सर्वे च सभास्थिता जना जयकारं करतलध्वनिञ्च कुर्वन्ति । जयजयध्वनिना सभाभवनं क्षणं प्रतिध्वनितं भवति । राजगुरुरश्वलः स्वासनमध्यास्ते । राजा सिंहासनादुत्थाय अमात्येन सह संलपति । अमात्यः पार्षदान् किमपि इङ्गितीकरोति । क्षणानन्तरं कनकाभरणैः सुसज्जीकृतशृङ्गशफा गाः समानीय सभाभवनस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकस्मिन् कोणे संस्थाप्यन्ते । सभोपविष्टानां समेषां विद्वज्जनानां दृष्टिः तेष्वेव गोषु निपतति । स्वर्णसज्जीकृते शृङ्गे सञ्चालयन्त्यो गावः शब्दायन्ते । तत्रत्या विद्वज्जनाः ता विलोक्य लोभवशाद् मिथः संलपन्ति ।)

जनकः ब्रह्मनिष्ठाः तत्त्वज्ञा विद्वद्वर्याः ! भवद्दृष्ट एव विषयो यद् एतासां गवां शृङ्गशफेषु स्वर्णफलकैः सम्पादितानि आभरणानि संयोजितानि सन्ति । एतादृशीरेव सहस्रसंख्यका गाः पारितोषिकरूपेण तादृशाय विदुषे प्रदास्यामि, यः स्वात्मानं ब्रह्मविद्वरिष्ठं प्रमाणीकर्तुं प्रभविष्यति । मदीयः प्रस्तावो भवतां सम्मानाय गौरवाय च वर्तते, न तु अवमानाय लघुताभासाय वेति सविनयं निवेदयामि । 'वादे वादे जायते तत्त्वबोधः' सुप्रथितेव उक्तिरियम् । अस्मिन्नेव च बोधे मानवकल्याणं निहितं वर्तते । प्रस्तावोऽयं वर्तते यद् अत्र सभासीना भवन्तः सर्वेऽपि ब्रह्मनिष्ठाः सन्ति, प्रवचनायानुप्रश्नाय च समर्था वर्तन्ते परन्तु अत्र भवतां मध्ये सर्वोत्कृष्टो ब्रह्मनिष्ठः कोऽस्तीति विषयेऽहं जिज्ञासुरस्मि । अत एतन्निश्चयीकृत्य हि पारितोषिकं प्रदातुं सहस्रं गावः सज्जीकृताः सन्ति । एतावता विरन्तुमीहे । धन्यवादः !!!

(राजा जनकः सिंहासने समुपविशति । सभास्थिताः सर्वे स्तब्धाः सन्तः चिन्तनरता भवन्ति । क्षणं विचिन्त्य पारस्परिकं संलापं प्रारभन्ते । सुवर्णाभरणमण्डिता गावः सभासदः पश्यन्तः शब्दायन्ते । राजगुरुरश्वलः राज्ञा सह संलपति । राजाज्ञामवाप्य स किमपि वक्तुं पुरत उपतिष्ठते ।)

अश्वलः ब्रह्मनिष्ठा विद्वद्वर्याः ! आत्मनः पुरुषार्थं ब्रह्मतेजश्च प्रस्तोतुमेतादृक् स्वर्णावसरो नहि लभ्यते । यतन्तामग्रेसराः सन्तः, नीयताञ्च इमा गावः । अग्निपरीक्षेयं भवतां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्ममस्तिष्कवतां विद्वज्जनानाम्।

(गा विलोक्य 'हा...हा...हे'ति ध्वनिना हसति।)

(मन्दस्वरेण) आमन्त्रितैर्विद्वज्जनैर्यदि न प्रयत्यते चेत्तु स्वर्णजडिता इमा गावो राजगुरोरेव गोष्ठं प्रति गच्छेयुर्वा !

(पुनः सशब्दं हसति।)

जनकः *(उत्थाय सावेशम्)* राजगुरो ! एवं स्वात्मानं विस्मृत्य न हस्यताम् !

अश्वलः *(शिरोऽवनमय्य)* क्षम्यतां महाराज !

(राजा सिंहासनमध्यास्ते। अश्वलो म्लानवदनः सन् स्वासने समुपविशति। स गाः प्रति दरीदर्शीति। तदानीमेव मुनिराजः शाकल्य उत्थाय पुरतः सरति। समेषां सभासदां दृष्टिः तमेव विषयीकरोति।)

शाकल्यः महाराज ! गा गमयितुं यत्न एव पर्याप्त आहोस्वित् तर्काश्च प्रस्तोतव्याः ? कृपया निगद्यताम्।

जनकः मुनिवर्य ! एतत्तु सभासदां व्यवहाराधारितं वर्तते। सभासत्सु केचित् प्रश्नं कुर्वन्ति चेत्तु तर्का अवश्यं प्रस्तोतव्याः, नो चेन्न। अत्र न तथा प्रष्टव्यः कश्चन विषयोऽस्ति, स्वयं विचारयितुं शक्यते।

(शाकल्यः शिरोऽवनमयति। गार्गी उत्थाय अग्रेसरति। राज्ञी राज्ञः कर्णे शनैः किमपि कथयति। विदुष्या गार्ग्या अग्रेसरतां वीक्ष्य समुपस्थिता अन्ये विद्वज्जना लज्जाभावेन शिरोऽवनमयन्ति।)

गार्गी *(उच्चस्वरेण)* महाराज ! इमा गाः काचिद् नारी नेतुं शक्नोति न वा ? स्पष्टं ब्रूयताम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनकः *(उत्थाय)* को नरः ? का च नारी ? मत्कृते तु सर्वेऽपि समानाः खलु । ब्रह्मसभायां कथं जातिभेदः ! कीदृशो वर्णलिङ्गादिभेदो वा ! सर्वेषां समानाधिकारः । ननु स्वात्मनि ब्रह्मविद्वरिष्ठत्वस्य प्रतिपादने क्षमः कोऽपि जनो गा नेतुं शक्नोति ।

कहोलः *(सहसोत्थाय तिरस्क्रियाभावेन गार्गीं वीक्ष्य राजाभिमुखः सन्)* महाराज ! नारी तु आश्रिता जातिर्वर्तते ।

(राज्ञी वदनं विकारयन्ती राजानं प्रति पश्यति ।)

गार्गी *(कहोलं लक्ष्यीकृत्य व्यङ्ग्यभावेन)* मुनिराज कहोल ! भवादृशस्य आत्मविदोऽपि नारीजातिं प्रति एवंविधा दृष्टिः ! एवं कथयता लज्जा नानुभूयते भवता ?

(उच्चतरस्वरेण) तथा चेन्नारीणामाश्रयं विरहय्य पुरुषाणां का गतिः ? भवान् कुतो जातः ? मातृगर्भोऽपि भवता विस्मृत एव वा ? गर्भादेव का परिपालितवती भवन्तम् । भवज्जननी अपि एका नारी एव तु वर्तते ।

(राज्ञी प्रसादवदना दृश्यते । सभा क्षणं स्तब्धा भवति ।)

कहोलः *(विहस्य)* गार्गि ! नार्या गर्भधातृत्वेनैव तु नारी आश्रिता जातिरस्तीति ममाभिप्रायः ।

गार्गी *(गाम्भीर्यमाकलय्य)* गर्भधारणक्षमा नारी यदि आश्रिता जातिरिति भवान् वदति चेद् अहम्भावपोटलिकामूढ्वा चलनशीलः भवादृशः पुरुषस्तु महाश्रितजातौ परिगण्यते । बुद्धं भवता ?

(सभास्थिताः सर्वे जनाः कहोलं वीक्ष्यमाणा हसितुं प्रारभन्ते । सोऽधोमस्तकः सन्नवतिष्ठते । राज्ञी हर्षान्वितमुखमुद्रया राज्ञा सह संलपति । मुनिरारुणिरग्रेसरति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरुणिः *(सभासदः प्रति विलोक्य)* त्यज्यतामेषोऽनावश्यको दीर्घालापः। राज्ञा पूर्वमेव आदिष्टं यद् यो गा नेतुं चेष्टते, तेन तर्काः प्रस्तोतव्या इति।

कहोलः *(गार्गीं विलोक्य तर्जनीदर्शनेन)* राज्ञादिष्टे कथनेऽवधानता भवेत्।

(मुनिः कहोलः पुनरपि नतशिरा एवावतिष्ठते। गार्ग्या दृष्टिर्गा प्रति निपतति। सा गाः स्वायत्तीकर्तुं चेष्टमाना विवक्षति परन्तु वाणी न प्रस्फुरति। राजा राज्ञ्या सह संलपति। सर्वे शिर उन्नमय्य कहोलं विलोकयन्तः परस्परं संलपन्ति। आरुणिश्च गा नेतुं चेष्टमान इव पुनरक्षमः सन्नुपविशति। तदानीमेव दर्शकसम्मर्दाद् निःसरति एको ग्रामीणः। सर्वे साश्चर्यं तमेव पश्यन्ति।)

ग्रामीणः *(साहसभावेन)* महाराज! न कोऽपीह गा नेतुं प्राभूत्। अत इमा गावोऽस्यैव जनकपुरस्य पोखरीथोकगोचरणे नीत्वा त्यज्यन्ताम्, ततो वयं ग्रामीणा नयेमहि।

(ग्रामीणस्य उपहासपूर्णं कथनं श्रुत्वा तत्रत्याः सर्वे उच्चैर्हसन्ति।)

राज्यमन्त्री *(उत्थाय तारस्वरेण)* शान्तिः शान्तिः !!

(सुरक्षाभटाः तं ग्रामीणमाकृष्य ततो नयन्ति। सभा स्तब्धा भवति। राज्यमन्त्री स्वस्थानमध्यास्ते।)

याज्ञवल्क्यः *(उत्थाय परितो विलोक्य उच्चस्वरेण)* सामश्रवः ! अयि सामश्रवः ! क्वासि त्वम् ?

सामश्रवाः *(पुरतोऽपसृत्य)* अयमस्मि गुरुवर्य !

(सर्वे साश्चर्यमन्योन्यं वीक्ष्य पुनर्याज्ञवल्क्यं प्रति पश्यन्ति।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः *(गौरवपूर्णेन स्वरेण)* सामश्रवः ! नयस्व इमा गा अस्मदीयमेव आश्रमं प्रति । तदनु दृश्येत सम्भाव्या प्रतिक्रिया ।

सामश्रवाः *(सगौरवम्)* अस्तु गुरुवर्य !

(सामश्रवाः काष्ठदण्डं गृह्णन् गा नेतुं समुद्यतो भवति । गावः स्वर्णाभरणैराभूषितान् शृङ्गशफान् नर्तयन्त्यः सहर्षं सशब्दञ्च चलितुं प्रारभन्ते । राजानवरतं याज्ञवल्क्यं वीक्षते । अन्ये सर्वेऽपि जनाः क्षणं चेष्टारहिता इव निश्चलाः तिष्ठन्ति । राजगुरुरश्वलः किं करवाणीति अनिर्णयेन विचलितः सन् किमपि वक्तुमग्रेसरति ।)

अश्वलः *(द्वेषभावेन)* मुनिराज याज्ञवल्क्य ! भवानेव अत्रत्येषु अस्मासु ब्रह्मविद्वरिष्ठोऽस्ति वा ? प्रथमं तावत् प्रमाणीक्रियतामेतत् । नो चेन्निरोध्यतां गा नेतुम् ।

भुज्य्वारुणी *(युगपत्)* राजगुरोर्वचनेऽस्माकञ्च ऐकमत्यं वर्तते ।

('अस्माकमपी'ति केषाञ्चन अपरेषाञ्च सभासदां समर्थनमाकर्ण्यते ।)

याज्ञवल्क्यः *(सर्वानभिवाद्य)* सादरं प्रणतिर्ब्रह्मनिष्ठेभ्यः सभासद्भ्यः परन्तु सम्प्रति स्वर्णभूषिता गा नेतुमेतदर्थमादिक्षं यद् मदीया स्पृहा हि ईदृश्येव सञ्जाता ।

आरुणिः तादृशी स्पृहा भवदीयैव वा ? अस्मदीया न वर्तते ?

याज्ञवल्क्यः तर्हि तु सत्यामपि स्पृहायामसाफल्यं लब्धं भवद्भिः !

(आरुणिः शिरो नमयति ।)

अश्वलः मुनिराज याज्ञवल्क्य ! असाफल्यं नैवालभि अस्माभिः । सपदि आदिश्यतां गाः प्रत्यानेतुम् । बालानां व्यामोहीकरणमिव अस्माभिः सह च व्याहृत्य तथैव गा नेतुं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न शक्नोति भवान्। एकस्या गोः शृङ्गयोः कतिपलपरिमितं हिरण्यमस्तीति वेत्ति भवान् ?

याज्ञवल्क्यः सम्यग् वेद्मि। प्रतिशृङ्गं पञ्चपलपरिमितं हिरण्यं वर्तते।

भुज्युः *(याज्ञवल्क्यं लक्ष्यीकृत्य)* ए....., तस्यैव स्वर्णस्य लोभेन तु गा नेतुमादिशत्।

आरुणिः एवमेवम्। सत्यं भाषितं मुनिराजेन भुज्युना।

(सर्वे हसन्ति। सभायां कोलाहलो जायते।)

राज्यमन्त्री *(उत्थाय तारस्वरेण)* शान्तिः शान्तिः !!

(सभागारे शाान्तिरनुभूयते। याज्ञवल्क्यं विहाय सर्वेऽपरे स्वस्थानानि अध्यासते। भुज्युरारुणिश्च पुनर्वक्तुं चेष्टेते।)

याज्ञवल्क्यः *(वदन्तौ तौ निरोध्य)* बन्धुवर भुज्यो ! बन्धुवर आरुणे ! नाहं समुत्थातुमीहे भवतोर्वाक्स्वतन्त्रतायै बाधकत्वेन परन्तु अत्र समुपस्थितान् सर्वानपि सभासदोऽसन्तोष्यैव गाः स्वकीये गोष्ठे न भन्त्स्यामि। यदि गोलोलुपतया अहमिमा गा इच्छामि चेन्मत्पितुः सिद्धान्तस्योपदेशस्य च वैपरीत्यं जायते। बुद्धं भवद्भ्याम् ?

भुज्युः याज्ञवल्क्य ! दिवङ्गतस्य पितुः सिद्धान्तस्य अभिमानञ्च प्रदर्शितं भवता ? भवादृशानां लोलुपानां ज्ञानगर्वितानाञ्च वदनेषु विलोकनादेव वयं जानीमो यद् भवतां हृदन्तः किमस्तीति।

याज्ञवल्क्यः *(सोत्साहम्)* किमर्थं मयि एवमारोपः ? पृच्छ्यतामात्मविषये मौनमाचर्यतां वा परन्तु नोच्यतां यद्वा तद्वा। राजाज्ञां श्रुत्वैव मया स्वेच्छया गा नेतुमादिष्टम्। इमा गाव इदानीं ममैव सञ्जाताः। अतोऽन्यैः लालापातनं व्यर्थं खलु।

आर्तभागः स्वयङ्घोषितब्रह्मविद्वरिष्ठ याज्ञवल्क्यमहोदय ! अस्ति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कश्चित् प्रश्नः, समाधातुं क्षमते भवान् ?

याज्ञवल्क्यः *(सगाम्भीर्यम्)* बन्धो आर्तभाग ! किमर्थं मयि स्वयङ्घोषित-ब्रह्मविद्वरिष्ठत्वमाक्षिपति भवान् ? यदि मत्स्थाने भवानभविष्यत्तर्हि एतादृशमाक्षेपं सोढुमशक्ष्यत् किल ! नो चेद् मा विधीयतामेतादृशा-क्षेपभरितं सम्बोधनम् । काचित् पिपृच्छा चेत् स्वागतं व्याह्रियते मया, पृच्छ्यताम् ।

(राजा जनक शिरःकम्पनेन याज्ञवल्क्यस्य कथनशैलीं समर्थयन् स्मयते । अन्ये तु स्तब्धाः तिष्ठन्ति ।)

आर्तभागः एवमस्ति मत्प्रश्नः—

यत्किमपि इह वर्तते, तत्सर्वमेव मृत्योर्भोजनमस्ति । यद्यद् उत्पद्यते तत्तद् अवश्यं विनङ्क्ष्यति । अतो मां ब्रवीतु भवान् यत्, को देवः स यो मृत्युमपि कवलीकरोति ?

जनकः *(सहसोत्थाय)* मुनिराज आर्तभाग ! अतीव महत्त्वाधायकः प्रश्न उपस्थापितो भवता । धन्यवादा भवते ।

(राजा उपविशति । सर्वे सभासद उत्तराकांक्षिभावेन याज्ञवल्क्यं प्रति पश्यन्ति ।)

याज्ञवल्क्यः *(क्षणं विचारमग्नः सन्)* बन्धो ! भवता मृत्योर्यः सन्दर्भ उपस्थापितः, वस्तुतः स मृत्युरनलोऽस्ति । जलरूपिणी देवता मृत्युरूपमनलं भक्षयति । पुनश्च एतादृशं ज्ञानं जन्ममृत्योरवधारणां चिन्तनञ्च पराजित्य मानवाय जीवन्मुक्तिं दापयति, न तु मृत्योः पश्चादेव मुक्तिः ।

(राजा जनकः करतलवादनं करोति । अन्ये च तमनुसरन्ति ।)

आर्तभागः याज्ञवल्क्यमहोदय ! इत्थं भवान् केवलं जल्पन्यायेन वस्तुतत्त्वनिर्णयं कर्तुं मा प्रयतताम् । पुनरपरञ्च प्रश्नं करोमि ।

याज्ञवल्क्यः उच्यतां कः स प्रश्नः ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आर्तभागः मृत्योः सन्दर्भे कथयता भवता मोक्षविषये च अभिहितं परन्तु अहं जिज्ञासे यद् यदा तु कश्चन जीवन्मुक्तः शरीरं जहाति, तदानीं तत्प्राणाः क्व यान्ति ?

याज्ञवल्क्यः तदानीं तत्प्राणाः तन्मूलब्रह्मसत्तया सहैव एकीभवन्ति यथार्णवे हि लीयन्तेऽर्णवतरङ्गाः । अतो जीवन्मुक्तस्य मृत्युबन्धनविनाशे न क्वचिद् भवति तस्य गमनम् ।

आर्तभागः याज्ञवल्क्यमहोदय ! धन्यवादा भवते । समयेऽवशिष्यमाणे पश्चात् पृच्छ्यन्त एव अवशिष्टाः प्रश्नाः ।

(स्वासने समुपविशति । करतलवादनं भवति ।

उषस्तः *(अवरुद्धस्वरेण)* महाशय ! ममापि विद्यते प्रश्नः । स्वात्मनः श्रेष्ठब्रह्म-वेत्त्रभिमानं सुवर्णमण्डितगवां तृष्णाञ्च विसृज्य मत्प्रश्नः समाधीयताम् ।नोचेद् 'हयः कीदृशो भवती'ति प्रश्नस्य 'हयो धावती'ति समाधानं प्रश्नकर्त्रे न कदाचित् सन्तुष्टिं दापयति । हय ईदृशो भवतीति प्रदर्श्य प्रमाणीकरणञ्च यद् विधीयते, सन्दर्भेऽस्मिन् तदेव समुचितं समाधान–मितिमेऽभिप्रायः ।

सर्वे जनाः *(उषस्तस्य तर्कपूर्णं वचनं समर्थयन्तः)* बाढं बाढम् ।

याज्ञवल्क्यः बन्धो ! सम्भाव्यताया अपि सीमा भवतीति च भवता न विस्मर्तव्यम् ।

उषस्तः एतावदपि न जानामि वा ? किं वा भवान् मयि बाल्यभावमेव मनुते ?

(सर्वे हसन्ति ।)

याज्ञवल्क्यः भवादृशं ब्रह्मनिष्ठमहमात्मवदेव मन्ये ।

उषस्तः अस्तु, त्यज्यतामयं प्रसङ्गः । सम्प्रति ममानुरोधो वर्तते यद्-'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतिवाक्येनाभिहितं यद् ब्रह्म

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कश्चित् प्रश्नः, समाधातुं क्षमते भवान् ?

याज्ञवल्क्यः *(सगाम्भीर्यम्)* बन्धो आर्तभाग ! किमर्थं मयि स्वयङ्घोषित-ब्रह्मविद्वरिष्ठत्वमाक्षिपति भवान् ? यदि मत्स्थाने भवानभविष्यत्तर्हि एतादृशमाक्षेपं सोढुमशक्ष्यत् किल ! नो चेद् मा विधीयतामेतादृशा-क्षेपभरितं सम्बोधनम् । काचित् पिपृच्छा चेत् स्वागतं व्याह्रियते मया, पृच्छ्यताम् ।

(राजा जनक शिरःकम्पनेन याज्ञवल्क्यस्य कथनशैलीं समर्थयन् स्मयते । अन्ये तु स्तब्धाः तिष्ठन्ति ।)

आर्तभागः एवमस्ति मत्प्रश्नः—

यत्किमपि इह वर्तते, तत्सर्वमेव मृत्योर्भोजनमस्ति । यद्यद् उत्पद्यते तत्तद् अवश्यं विनङ्क्ष्यति । अतो मां ब्रवीतु भवान् यत्, को देवः स यो मृत्युमपि कवलीकरोति ?

जनकः *(सहसोत्थाय)* मुनिराज आर्तभाग ! अतीव महत्त्वाधायकः प्रश्न उपस्थापितो भवता । धन्यवादा भवते ।

(राजा उपविशति । सर्वे सभासद उत्तराकांक्षिभावेन याज्ञवल्क्यं प्रति पश्यन्ति ।)

याज्ञवल्क्यः *(क्षणं विचारमग्नः सन्)* बन्धो ! भवता मृत्योर्यः सन्दर्भ उपस्थापितः, वस्तुतः स मृत्युरनलोऽस्ति । जलरूपिणी देवता मृत्युरूपमनलं भक्षयति । पुनश्च एतादृशं ज्ञानं जन्ममृत्योरवधारणां चिन्तनञ्च पराजित्य मानवाय जीवन्मुक्तिं दापयति, न तु मृत्योः पश्चादेव मुक्तिः ।

(राजा जनकः करतलवादनं करोति । अन्ये च तमनुसरन्ति ।)

आर्तभागः याज्ञवल्क्यमहोदय ! इत्थं भवान् केवलं जल्पन्यायेन वस्तुतत्त्वनिर्णयं कर्तुं मा प्रयतताम् । पुनरपरञ्च प्रश्नं करोमि ।

याज्ञवल्क्यः उच्यतां कः स प्रश्नः ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आर्तभागः मृत्योः सन्दर्भे कथयता भवता मोक्षविषये च अभिहितं परन्तु अहं जिज्ञासे यद् यदा तु कश्चन जीवन्मुक्तः शरीरं जहाति, तदानीं तत्प्राणाः क्व यान्ति ?

याज्ञवल्क्यः तदानीं तत्प्राणाः तन्मूलब्रह्मसत्तया सहैव एकीभवन्ति यथार्णवे हि लीयन्तेऽर्णवतरङ्गाः । अतो जीवन्मुक्तस्य मृत्युबन्धनविनाशे न क्वचिद् भवति तस्य गमनम् ।

आर्तभागः याज्ञवल्क्यमहोदय ! धन्यवादा भवते । समयेऽवशिष्यमाणे पश्चात् पृच्छ्यन्त एव अवशिष्टाः प्रश्नाः ।

(स्वासने समुपविशति । करतलवादनं भवति ।

उषस्तः *(अवरुद्धस्वरेण)* महाशय ! ममापि विद्यते प्रश्नः । स्वात्मनः श्रेष्ठब्रह्म-वेत्त्रभिमानं सुवर्णमण्डितगवां तृष्णाञ्च विसृज्य मत्प्रश्नः समाधीयताम् ।नोचेद् 'हयः कीदृशो भवती'ति प्रश्नस्य 'हयो धावती'ति समाधानं प्रश्नकर्त्रे न कदाचित् सन्तुष्टिं दापयति । हय ईदृशो भवतीति प्रदर्श्य प्रमाणीकरणञ्च यद् विधीयते, सन्दर्भेऽस्मिन् तदेव समुचितं समाधान–मितिमेऽभिप्रायः ।

सर्वे जनाः *(उषस्तस्य तर्कपूर्णं वचनं समर्थयन्तः)* बाढं बाढम् ।

याज्ञवल्क्यः बन्धो ! सम्भाव्यताया अपि सीमा भवतीति च भवता न विस्मर्तव्यम् ।

उषस्तः एतावदपि न जानामि वा ? किं वा भवान् मयि बाल्यभावमेव मनुते ?

(सर्वे हसन्ति ।)

याज्ञवल्क्यः भवादृशं ब्रह्मनिष्ठमहमात्मवदेव मन्ये ।

उषस्तः अस्तु, त्यज्यतामयं प्रसङ्गः । सम्प्रति ममानुरोधो वर्तते यद्- 'यत्साक्षादपरोक्षाद् ब्रह्म' इति श्रुतिवाक्येनाभिहितं यद् ब्रह्म

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्तते, तदेव सर्वान्तर आत्मास्तीति व्याख्याय्यताम्।

याज्ञवल्क्यः ब्रह्म आत्मा वेति प्रोच्यताम्, तत् साक्षाद् अपरोक्षं सर्वान्तरञ्च सद् भवति एव विद्यते। भवान् स्वयं खलु अत्र दृष्टान्तो वर्तते। प्राणनापानोदानक्रियाभिर्भवता स्वेनैवानुभूयमानमस्ति एतत्। प्राणनादिक्रियावति भवच्छरीरे यन्त्रान्त इव नैकाः क्रियाः सञ्चलन्ति परन्तु सर्वान्तरचेतनमात्मानं विना तन्न कथञ्चन सम्भवति।

जनकः *(उत्थाय)* मुनिराज याज्ञवल्क्य ! सन्दर्भेऽस्मिन् पुनरपि भूयस्यै परिचर्चायै समनुरुणध्मि।

(राज्ञोऽनुरोधं निशम्य सर्वेऽपि सभासद आश्चर्यान्विता भवन्ति।)

याज्ञवल्क्यः *(राजानं वीक्ष्य सविनयम्)* महाराज ! आत्मा नहि घोटक इव, यस्य प्रग्रहमाकृष्य सभायां समुपस्थापनं सम्भवेत्। अतो दृश्यं द्रष्टुं पार्यते परन्तु न तद्द्रष्टारम्। सर्वेषामाभ्यन्तराद् आत्मनो भिन्नं सर्वमपि दृश्यजातं मिथ्या वर्तते, नाशवद् वर्तते। इतोऽपि स्पष्टतया प्रोच्यते चेद् आत्मा अनिर्वचनीयो वर्तते। एतद्विपरीतस्तर्को यदि कस्यचिद् वर्तते, तथ्यस्यास्य खण्डनं कर्तुं कश्चन प्रभवति चेद्वा सुवर्णमण्डिता इमा गाः सद्यः प्रतिदाय स्वयं गोपरूपेण सहस्रमपि गाः तदाश्रमं प्रापयिष्यामि।

(दीर्घं निःश्वसति। समुपस्थिताः सर्वे करतलवादनं कुर्वन्ति। मुनयो विचारमग्ना दृश्यन्ते। मुनिः कहोलः सोत्साहमुत्तिष्ठति। तेन चकिताः सर्वे तं वीक्षन्ते।)

कहोलः याज्ञवल्क्यमहोदय ! मा उह्यतां ब्रह्मज्ञानगर्वः। प्रश्नार्थमहमिह समुपस्थितोऽस्मि।

याज्ञवल्क्यः बन्धो ! मद्व्याहारे गर्वभावोऽनुभूतश्चेत् क्षमां वन्वे। आत्मालोचनां कर्तुञ्च सन्नद्धोऽस्मि। आम्, उच्यतां कः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृच्छाविषयो भवतः ? स्वागताभिनन्दनं भवत्पृच्छायाः ।

कहोलः यत् साक्षाद् अपरोक्षं ब्रह्म सर्वान्तर आत्मास्ति, मत्कृते तस्य व्याख्या विधीयताम् ।

(सभासद्भ्योऽट्टहास आकर्ण्यते परन्तु कहोलः स्वप्रश्ने दृढः सन्नवतिष्ठते । याज्ञवल्क्यः किं ब्रवीमीति निश्चयशून्यदशामवाप्नोति । राजगुरुरश्वलोऽग्रेसरति ।)

अश्वलः *(कहोलमाकृष्य)* मुनिराज कहोल ! सद्य उषस्तेन पृष्टस्यैव प्रश्नस्यावर्तनेन याज्ञवल्क्यस्य पुरतो स्वबुद्धेरल्पताप्रदर्शनं किमर्थम् ? किञ्चन नवीनं पृच्छ्यतां स्वासनमास्यतां वा ।

(सर्वे साश्चर्यं पश्यन्ति । कहोलः स्वप्रश्ने दार्ढ्यं न जहाति । अश्वलः तं तिर्यग्दृष्ट्या निरीक्षते ।)

कहोलः *(अश्वलं प्रति)* राजगुरो ! बुद्धिमते सङ्केतमात्रं पर्याप्तम् । स्वस्थानं यातु भवान् । मया पृष्टः प्रश्नो नहि परिवर्त्यते ।

(अश्वलः स्वस्थानमध्यास्ते ।)

याज्ञवल्क्यः बन्धो कहोल ! प्रश्नस्य समत्वेऽपि उत्तरं पृथगस्ति । आत्मनः पारमार्थिकस्वरूपस्य विवेचनापेक्षया उद्भावितोऽयं भवत्प्रश्नः । वस्तुतः साक्षाद् अपरोक्षं ब्रह्म एवञ्च सर्वान्तर आत्मापि भवदात्मैव । सर्वान्तरात्मायं क्षुत्तृट्शो-क-मोह-जरा-मृत्युभ्यः सततं परोऽस्ति । एतादृशं खलु आत्मानं विज्ञाय हि भवबन्धनान्मुक्तिरधिगम्यते । अत आत्मा श्रवणादिसाधनैः साक्षात्कर्तव्यः । एष एव आत्मतत्त्व-साक्षात्कारस्योपक्रमः ।

(सभा स्तब्धा भवति । कहोलो न कञ्चनापि निरीक्षमाणो नतमुखः स्वासनमध्यास्ते । विचारमग्ना गार्गी चक्षुषी उन्मीलयति । किञ्चिद् विवक्षन्ती सा अग्रेसरति । एतद् दृष्ट्वा राज्ञी राज्ञा जनकेन सह शनैः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संलपति ।)

गार्गी *(परितः सर्वानभिवाद्य)* मुनिराज याज्ञवल्क्य ! अत्र यावानपि पार्थिवो धातुसमुदायोऽस्ति, स वस्त्रविस्तारतेव अप्सु ओतः प्रोतश्च वर्तते । अन्तर्बहिर्विद्यमाने सलिले व्याप्तोऽस्ति । विषयेऽस्मिन् भवतः को विचारः ?

याज्ञवल्क्यः सत्यमभिहितं भवत्या ।

गार्गी महाशय ! अहं बुभुत्सामि यत् सलिलं तत् कुत्र ओतं प्रोतञ्च वर्तते ?

याज्ञवल्क्यः *(विहस्य)* समासेन प्रोच्यमाने सलिलं तेजसि, तेजः पवने, स च अन्तरिक्षे, पुनस्तद् आत्मनि ओतं प्रोतञ्च वर्तते ।

गार्गी *(सगर्वम्)* तर्हि आत्मा कुत्र ओतः प्रोतश्च वर्तते ?

याज्ञवल्क्यः *(सरोषम्)* अतिप्रश्नान् मा प्राक्षीत् !

गार्गी *(भीत्या कम्पमाना)* त्यज्यतां तावत् स्वप्रश्नं प्रत्याददामि ।

(स्वस्थाने समुपविशति ।)

आरुणिः याज्ञवल्क्यमहोदय ! ब्रह्मसभायामस्यां स्वात्मानं सर्वोत्तमं ब्रह्मवेत्तारं मत्वा भवान् लक्षशो रूप्यकलभ्यैः कनकैर्मण्डिता गाः स्वायत्तीकर्तुं चेष्टमान आलक्ष्यते । वस्तुत एवंरीत्या डिण्डिमवादनं निरर्थकं खलु ।

(सभायां कोलाहलः श्रूयते । सर्वे सभासद आरुणिं प्रोत्साहयन्ति ।)

वयोवृद्धर्षिः *(शनैरुत्थाय)* मुनिराज आरुणे ! उचितं कथितं भवता । प्रश्नोऽपि ज्वालामुखीवत् स्फोट्यताम् । अस्मत्समर्थनमस्ति भवते ।

(सोच्चं करतलवादनं भवति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरुणिः *(याज्ञवल्क्यंलक्ष्यीकुर्वाणः)* श्रूयतांमत्प्रश्नः।तत्सूत्रंकिमस्ति, येन जन्म–जन्मान्तराणि एवञ्च आब्रह्मभुवनाल्लोका आवलीव ग्रथिता वर्तन्ते ? पुनश्च कः सोऽन्तर्यामी, यो लोक-लोकान्तरवर्तिनां पदार्थानां नियमनं करोति ?

(याज्ञवल्क्यः शिरोऽवनमय्य विचारमग्नो भवति। समीपस्थं पानपात्रं गृहीत्वा पानीयं पिबति । सकृद्दीर्घं निःश्वस्य पुनश्चिन्तनरतो भवति।)

वयोवृद्धर्षिः मुनिराज आरुणे ! भवता भृशं विचिन्त्य जटिलौ प्रश्नौ पृष्टाविति मन्ये । वयं निश्चित्याचक्ष्महे यद् इदानीन्तु याज्ञवल्क्यो भवत्प्रश्नयोः समुचितं समाधानं प्रस्तोतुं न क्षमत एव।

(हर्षातिरेकेण सर्वेषां वदनानि प्रकाशन्ते।)

याज्ञवल्क्यः मुनिराज आरुणे ! श्रूयन्तां समासेन स्वकीयप्रश्नानां समाधानम्।

(याज्ञवल्क्यस्य उत्तरदानतत्परतां निरीक्ष्य केचन आश्चर्येण दन्ततले रसनां दमयन्ति।)

वायुरूपसूत्रेणैव जन्म-जन्मान्तराणि, आब्रह्म–भुवनाल्लोकाश्च ग्रथिता वर्तन्ते। यतो हि, वायुरेव सर्वान् दधाति । सर्वधातरि तत्सूत्रे निबन्धनं परिहीयते चेत्तु वपुषोऽङ्गान्येव विशीर्णानि भवन्ति, सूत्रच्छेदे विद्रुमा मौक्तिकानीव वा।

एवञ्च अमृतस्वरूप आत्मैव अन्तर्यामी, यो लोकलोकान्तरवर्तिनः पदार्थान् नियमयति।

आरुणिः *(ईषन्नैकट्यं प्राप्य)* कीदृक् तावत् स आत्मा ?

याज्ञवल्क्यः यः पृथ्व्या अन्तस्तिष्ठति परन्तु पृथ्वी यं न वेत्ति, यस्य पृथ्वी शरीरम्, यः पृथ्वीमन्ततो यमयति, स

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एव अमृतस्वरूपोऽन्तर्यामी आत्मा । इयमेव दशा अप्तेजोवाय्वादिषु च वर्तते।

आरुणिः याज्ञवल्क्यमहोदय ! मत्प्रश्नान्तर्गतस्य आत्मनो विषये भवद्व्याख्यानमपूर्णं प्रतिभाति । अतोऽहं विशदं व्याख्यानमीहे।

याज्ञवल्क्यः श्रूयतां पुनस्तावत्–

यः प्राणेषु तिष्ठन्नपि प्राणा यं न विदन्ति, यस्य प्राणा एव शरीरम्, यः प्राणान्तवर्ती सन् प्राणान् यमयति, स एव अन्तर्यामी अमृतरूप आत्मा। पुनरेतदेव तथ्यं श्रोत्र–त्वग्–रसनादिषु च प्रवर्तते।

आरुणिः *(क्षणं विचिन्त्य मस्तकमुन्नमय्य)* महाशय ! भूयश्च श्रोतुं वाञ्छामि आत्मनः तर्कपूर्णं व्याख्यानम्।

याज्ञवल्क्यः *(प्रफुल्लः सन् स्मयमानः स्वात्मानं सङ्केत्य)* यो न गृह्यते चक्षुषा परं चक्षुर्येन रूपप्रत्यक्षीकरणाय प्रभवति, न च गृह्यते श्रोत्रेण श्रोत्रं येन शाब्दबोधाय प्रभवति, स एव अन्तर्यामी अमृतात्मा। एष एक एव हि सत्, एतद्भिन्नं समग्रमपि चराचरं जगद् नाशवत्त्वेन मिथ्या वर्तते।

(तारस्वरेण) मुनिराज आरुणे ! इतोऽप्यधिकं व्याख्यान–मपेक्ष्यते वा ?

आरुणिः *(याज्ञवल्क्यं प्रणम्य)* मुनिवर्य ! तुष्टोऽस्मि भवद्व्याख्यानेन। इतो नाधिकं व्याख्यानं काङ्क्षे।

(सभासद्भ्यः करतलवादनं भवति । राजा राज्यमन्त्रिणा सह संलापमाचरति । राज्यमन्त्री स्वयं जलपात्रमादाय याज्ञवल्क्यमध्युपगम्य पानपात्रं जलेन पूरयति। सभासदः साश्चर्यं तदवलोकन्ते। याज्ञवल्क्यः स्वेदप्रोञ्छनपूर्वकं पानपात्रेण जलं पिबति। राज्यमन्त्री पुनरपि जलमाधित्सति परन्तु याज्ञवल्क्यः शिरःकम्पनेन तन्निषेधति। तदानीमेव गार्गी स्वासन्दादुत्तिष्ठति।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुत्थितां गार्गीं विलोक्य राज्ञी राज्ञा सह संलापमारभते। उभावेव स्मयेते।)

गार्गी *(पुनरपि याज्ञवल्क्यमभिवाद्य सभासदो निरीक्षमाणा)* तत्त्ववेत्तारो विद्वज्जनाः ! अहं मुनिराजं याज्ञवल्क्यं पुनश्च किमपि पिपृच्छिषामि । यद्यपि मुनिराजोऽयं पूर्वमेव मां वचनशून्यामापीपदत्तथापि एतादृश्यां ब्रह्मसभायां नाम–प्रतिष्ठादीनामपगमनभयेन मौनाचरणं नोचितम् । अत्र तु ज्ञातव्या बोद्धव्या समाधेयाश्च भवन्ति शङ्कोपशङ्कासमस्याः । अन्वेष्टव्यं भवति जटिलप्रश्नानां समाधानम् । तदनु अभ्यासानुभूतिभ्यां स्वेनैव विधेया स्वीयाग्निपरीक्षा । अतः पुनश्च प्रष्टुं समुत्साहं धृतवती अस्मि ।

(करतलवादनं भवति । राज्ञी सङ्केतेन तां प्रोत्साहयति ।)

वृद्धा विदुषी *(प्रयत्यसमुत्थितासती)* वत्सेगार्गि! इदानींभवतीएववर्ततेऽस्माकमेकमात्रमाशाकेन्द्रम् । ब्रह्मशक्तिसाधनपुरःसरं पृच्छ्यतां प्रश्नः, येन विजयवैजयन्ती अस्मत्पक्षपातिनी भवेत् ।

गार्गी *(प्रोत्साहिता सती याज्ञवल्क्यं वीक्ष्य)* मुनिराज याज्ञवल्क्य ! द्युलोकादुपरि पृथ्व्या अधः तयोर्मध्ये च तिष्ठन् यः स्वयं द्युलोकः पृथ्वी च भूत्वा भूतं वर्तमानं भविष्यच्चेति सम्बोध्यते, स कुत्र ओतः प्रोतश्च वर्तते ?

याज्ञवल्क्यः स आकाशे ओतः प्रोतश्चास्ति ।

गार्गी *(निर्भयेन)* आकाशञ्च कुत्र ?

याज्ञवल्क्यः अक्षरे तद् ओतं प्रोतञ्च वर्तते ।

गार्गी कीदृग् वर्ततेऽयमक्षरः ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः *(करमुद्राभिरभिनयेन)* अक्षरोऽयं न स्थूलोऽस्ति, न च कृशः, न खर्वोऽस्ति, न च उन्नतः। नायं हुतभुगिव रक्तवर्णोऽस्ति, न च वारीव द्रवमयः।

(याज्ञवल्क्यस्य गलः शुष्कायते। अतः पानीयं पिबति।)

गार्गी मुनिराज याज्ञवल्क्य ! शनैर्भाष्यताम्, यथा गलोऽवरुद्धो न सञ्जायेत। भूयश्च प्रोच्यतामक्षरस्य विषये।

(शनैर्भाष्यतामिति गार्ग्याभिव्यक्ता सहानुभूतिः सर्वान् चकितान् करोति।)

याज्ञवल्क्यः श्रूयतां तावत्–

अक्षरोऽयं न छायास्ति, न च तमः। पुनरेष नहि वायुर्न च नभः। नायं रसो गन्धो वा। अक्षरोऽयं न चक्षुः, न श्रोत्रम्, न वाणी, न मनः, न तेजः, न च प्राण एव वर्तते।

गार्गी *(साश्चर्यम्)* तर्हि किं विद्यते तस्मिन् ?

याज्ञवल्क्यः अन्तर्बहिश्चेति कथनीयं तस्मिन् किमपि नास्ति।

गार्गी *(औत्सुक्यमुपचिन्वन्ती)* किं भुङ्क्ते सः ?

याज्ञवल्क्यः नहि किञ्चिद् भुङ्क्ते सः। न च कश्चित्तं भोक्तुं प्रभवति।

गार्गी तावत्तस्याक्षरस्य का स्थितिः ?

याज्ञवल्क्यः स एव शास्ति सर्वान्। तस्यैव शासने विश्वस्य सर्वोच्चा हिमशैलश्रेणी उन्नतिङ्गतास्ति। तेभ्य एव हिमगिरिशृङ्गेभ्य निःसृत्य कोशी–गण्डकी–कर्णाली–वाग्वती–कमलाप्रभृतयो महत्यः सरितः कतिचिद्युगेभ्यः पूर्वतोऽनवरतं प्रवहन्त्यः सन्ति। चन्द्रादित्यौ च एतस्मादेव शक्तिमधिगम्य उदयमस्तञ्च गच्छतः।

गार्गी मुनिराज ! वस्तुतोऽयमक्षरः क इति कृपया एकवाक्येन सुस्पष्टं वर्ण्यताम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः विदुषि गार्गि ! वस्तुतोऽयमक्षर एव परब्रह्म । परब्रह्मस्वरूपोऽक्षरोऽयमेकमात्रं सद् वर्तते ।

गार्गी *(नतशिरसाभिवाद्य)* मुनिराज याज्ञवल्क्य ! पराजितास्मि भवतः परन्तु स्वस्याः पराजयेऽपि विजयोऽलाभि मया । यतो हि, भवत्प्रदत्तोत्तरैर्मया परब्रह्मणोऽस्तित्वविषये बोधावसरो लब्धः । एवञ्च स्वात्मानं बोधमाध्यमं परिकल्प्य बोधस्य सौभाग्यमधिगतम् ।

(सर्वेऽपि सभासदश्चकिताः सन्तः करतलध्वनिं कुर्वन्ति । याज्ञवल्क्य इतस्ततः चलति । सभा क्षणं शान्ता भवति । राजा राज्ञी च मन्दं संलपतः । राजसङ्केतमवाप्य राज्यमन्त्री राजानमुपगच्छति । राजा तं किमपि ब्रूते ।)

राज्यमन्त्री *(अग्रे समुपस्थाय)* तत्त्ववेत्तारो विद्वज्जनाः । राज्ञ आज्ञानुरूपं सूच्यते यद् अद्यतन्यां ब्रह्मसभायां मुनिराजो याज्ञवल्क्य एव सर्वोत्तमः ....

(राज्यमन्त्रिणः कथनेऽसमाप्ते हि सहसोत्थाय शाकल्योऽग्रेसरः सन् वक्तुं प्रारभते ।)

शाकल्यः *(राज्यमन्त्रिणं लक्ष्यीकृत्य)* मन्त्रिवर्य ! नहि मृतोऽस्ति शाकल्यः । स च वक्तुमर्हति । शाकल्योऽयं कुरुपाञ्चालदेशीयानां ब्रह्मनिष्ठानां प्रतिनिधित्वेन विवक्षुरस्ति । कुरुपाञ्चालदेशीया विद्वज्जनाः करोत्थापनपुरःसरं समर्थनवचोभिः शाकल्यं प्रोत्साहयन्ति । तेन कोलाहलो जायते । सभाऽनियन्त्रिता भवति ।)

राज्यमन्त्री *(तारस्वरेण)* शान्तिः ! शान्तिः !

(सभागारे शान्तिः प्रसारिता भवति ।)

एकः समर्थकः ब्रह्मसभायामविरतायां हि मुनिराजः शाकल्यो वक्तुमर्हति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनकः *(उत्थाय राज्यमन्त्रिणं लक्ष्यीकुर्वन्)* मन्त्रिवर्य ! अस्तु तावत् । सभा यथापूर्वं सञ्चाल्यताम् ।

(राजा उपविशति । सभाया नैरन्तर्यमुद्घोष्य राज्यमन्त्री च स्वस्थानं प्रत्यायाति ।)

समर्थकाः *(करोत्थापनेन उच्चैः)* महाराज–जनकस्य !

सर्वे जनाः जयः !

(क्षणं जय–जयध्वनिर्गुञ्जति । तदनु सभा शान्ता भवति ।)

शाकल्यः *(गर्वान्वितः सन् याज्ञवल्क्यं वीक्ष्य)* ब्रह्मज्ञानाभिमानिन् महाशय ! उच्यतां भवत आत्मा कलेवरञ्च कुत्र प्रतिष्ठिते स्तः ?

याज्ञवल्क्यः बन्धो शाकल्य ! यथातथं मा ब्रवीतु उन्मदिष्णुरिव । नाहं ब्रह्मज्ञानाभिमानी । अहन्तु अहमेवास्मि स्वयमात्मा भवाँश्च अहमेव । साभिमानं वच्मि चेत्तु स्वात्मानं विस्मृत्य किं बहुना भवन्तञ्च अपरिगणय्य भाषणायासवद् भवति । अतः सावेशं भाषमाणेनापि अपरश्च आत्मवद् मन्तव्यः ।

(सभायां सर्वतः 'साधु साधु' इति समर्थनवचनानि आकर्ण्यन्ते । सभा पुनः शान्ता भवति ।)

बन्धो ! भवता पृष्टः प्रश्नः समुचितः खलु परन्तु तस्योत्तरं शब्देनैकेन यच्छामि— 'प्राणे' इति । एतेन भवान् सन्तुष्यति न वा ?

शाकल्यः *(अविनतभावेन)* तोषातोषयोः प्रसङ्गो नात्र अपेक्षाविषयः । मत्प्रश्ना इतोऽपि अवशिष्टाः सन्ति । निगद्यतां तावत् प्राणः कस्मिन् प्रतिष्ठितः ?

याज्ञवल्क्यः प्राणोऽपानेऽपानो व्याने, व्यान उदाने, स च समाने प्रतिष्ठिताः सन्ति । इतोऽप्यधिकं व्याख्यानं वाञ्छति किल भवान् ? नोचेत्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सन्दर्भेऽस्मिन् अहमेव भवन्तं पृच्छानि वा ?

शाकल्यः *(प्रकम्पितस्वरेण)* याज्ञवल्क्यमहोदय ! .... *(वाणी नहि प्रस्फुरति । स किङ्कर्तव्योपायराहित्येन कम्पितुमारभते । स्वशिरोऽपि स्वस्यैव देहे भारः प्रतिभाति। स कराभ्यां गलं स्पृशति। तच्छिरो वेगेन कम्पमानं सत् पार्श्वभागविलम्बि भवति। स तत्रैव भूमौ निपतति। सर्वे आश्चर्यङ्गच्छन्ति।चिकित्सकाः प्रधाव्यायान्ति।आकस्मिक-चिकित्सासाफल्यं भजते।)*

वृद्धः चिकित्सकः *(राजानमभिवाद्य)* महाराज ! मुनिराजस्य शाकल्यस्य पीडा सातिशायिनी अनुभूयते । इमं राजकीयं चिकित्सालयमेव नयाम ?

जनकः *(उत्थाय)* एवं नीयताम् । यथासम्भवं चिकित्सां विधाय जीवयतु इमम् ।

वृद्धः चिकित्सकः अस्तु महाराज !

(परिचारकाः शाकल्यमूढ्वा नयन्ति । सभा पूर्ववत् शान्ता भवति । राजा मन्त्रिणा सह संलपति ।)

राज्यमन्त्री *(पुरतोऽपसृत्य)* पूज्या विद्वद्वर्याः ! इतःपरं स्ववक्तव्यं प्रस्तूय महाराजेन जनकेन सभाविरामः समुद्घोषयिष्यते। कृपया तूष्णीमाकलय्य श्रूयताम्।

(सभायां शान्तिः प्रसार्यते ।)

जनकः *(उत्थाय)* विद्वद्वृन्द ! सम्प्रति मुनिवरं याज्ञवल्क्यं प्रष्टुं भवतां न कश्चित् प्रश्नोऽवशिष्ट इति मन्ये । अद्यतन्यां ब्रह्मसभायां समुपस्थाय सभाया गौरवं वर्धितवद्भ्यो भवद्भ्यः सर्वेभ्यो हार्दान् धन्यवादान् अर्पयामि । इह सभायामद्य अत्यन्तं महत्त्वशालिनी गभीरविषया च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मचर्चाभूत्। गा नेतुं शिष्यमादिष्टवति मुनिवरे याज्ञवल्क्ये साम्प्रतन्तु कस्यचिदपि असन्तोषो न भवेत्। अस्याः सभाया ब्रह्मचर्चायां भागं गृहीतवतः सर्वानपि विद्वज्जनान् प्रति हार्दिकीं कृतज्ञताञ्च अभिव्यज्य मुनिवरो याज्ञवल्क्य एव ब्रह्मविद्वरिष्ठोऽस्तीति च समुद्घोषयामि। एष न केवलं पर्वतबहुलस्य नेपालस्यैव अपितु विश्वस्यैव विभूतिभूतः प्रतिभावान् विद्वद्वरेण्योऽस्ति। समेषामेवास्माकं गौरवस्य विषयोऽयम्। किं बहुना ? एतावतैव अद्यतनी सभा विरम्यत इति च निवेद्य साम्प्रतं स्वकीयं वक्तव्यं समाप्नोमि। धन्यवादाः !!!

(चिरं करतलवादनं भवति। राज्यमन्त्रिणा अङ्गरक्षकैश्च सह राजराज्यौ गच्छतः। मुनीनामेकः सम्मर्दो याज्ञवल्क्यं परिवेष्टयति, अपरश्च अलसभावेन बाहुवितानपुरःसरं निरेति। अन्ये दर्शकाश्च ततो निःसरणं प्रारभन्ते। तदानीमेव वैशम्पायनः तच्छिष्यौ च याज्ञवल्क्यस्य पुरतः समुपतिष्ठन्ते। अक्षिलक्ष्यीकृते हि गुरौ याज्ञवल्क्यः प्रणन्तुं तच्चरणयोर्निपतति। वैशम्पायन आश्चर्यङ्गच्छति। परितः स्थिता अन्ये मुनयः तत्सर्वं क्रियाकलापं निरीक्षन्ते।)

वैशम्पायनः (प्रणिपतितं याज्ञवल्क्यमुत्थाप्य) मुनिराज याज्ञवल्क्य ! अद्यतनाद् अहञ्च भवच्छिष्यताङ्गतोऽस्मि। ब्रह्महत्यादोषदूषितयोर्मच्चरणयोर्भवतः शिरोनतिर्नोचिता खलु।

(स्ववक्षसि करौ निवेश्य) मया भवतो यद्यद् अहितं चिन्तितम्, अकार्यञ्च आचरितम्, समेषां तेषां प्रायश्चित्तार्थं मह्यं सकृद् अवसरःप्रदीयताम्।पूर्वमेवब्रह्महत्यादोषग्रस्तःसन्नपिगतानुगतिकतया शिष्यहत्याञ्च अकरवम्। अहं तदानीं भवन्तं परिचेतुमेव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाशक्नवम् ।

(निर्वहन्तीमश्रुधारां कटिबन्धनया प्रोञ्छन्)

तेषु दिवसेषु यत्किमपि अपराद्धं मया, तदर्थं सम्प्रति क्षमां याचे । एवञ्च अद्यतन्यां ब्रह्मसभायां भवान् एव ब्रह्मविद्वरिष्ठः समुद्‌ङोषित इति तदर्थं भवते साधुवादाँश्च अर्पयामि ।

(सर्वेएकतानेनवीक्षमाणाभवन्ति।वैशम्पायनशिष्यौसुचरक-प्रियदत्तौ च याज्ञवल्क्यमुपसृत्य प्रणमतः ।)

सुचरकः *(नतशिरसा)* मुनिराज याज्ञवल्क्य ! आवयोः पिशुनतयैव गुरुणाभवतोऽभद्रमकारि।आवयोरपराधकल्पनघटितायाःतदानीन्तन-घटनायाः कृते आवाञ्च क्षमायाच्ञां कुर्वहे ।

प्रियदत्तः *(याज्ञवल्क्यचरणयोः प्रणिपतितुकामः)* आम्, नूनमावाभ्यां भवन्तं प्रति अपराद्धम् । समग्रोऽपि दोष आवयोरेव । अतः क्षमां याचावहे । अधुना प्रायश्चित्तावसरं प्राप्नुयाव ।

याज्ञवल्क्यः *(वैशम्पायनं प्रति वीक्ष्य)* गुरुवर्य ! ....

वैशम्पायनः *(मध्ये निरोध्य)* मुनिराज !

नहि सम्बोध्यतामद्य गुरुवर्येति व्याहरन् ।
शिष्यतां प्रतिपन्नोऽस्मि गृह्णातु शरणङ्गतम् ॥

(याज्ञवल्क्यचरणौ स्प्रष्टुं चेष्टते ।)

याज्ञवल्क्यः *(गुरोः कम्पमानदेहोपरि स्वबाहू निवेश्य तं गृह्णन्)*

गुरुवर्य ! मयाधीता यजुर्मन्त्रा अनेकशः ।
विस्मरेयं कथं क्षिप्रं मा मैवमिभधीयताम् ॥

वैशम्पायनः **यजुर्ज्ञानं मया दत्तं वमनं कारितं हृतम् ।**
यन्मयाध्यापितं तत्र जातं तित्तिरिभोजनम् ॥

(पश्चात्तापेन स भूमौ भालताडनं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुरुते । दण्डञ्च दूरं क्षिपति । सुचरक-प्रियदत्तौ नतवदनौ तिष्ठतः । याज्ञवल्क्यः गुरुणा क्षिप्तं दण्डमुत्थाप्य तद्धस्ते ग्राहयति । वैशम्पायनः घृणाभावेन तं स्वदण्डं निरीक्षते ।)

याज्ञवल्क्यः गुरुवर्य ! दण्डोऽयं जडपदार्थः । नास्य विद्यतेऽन्तःकरणम् । अतोऽस्य को दोषः, येन भवान् इमं घृणास्पदं मन्यते ।

वैशम्पायनः *(दण्डविषयिणीं दृष्टिं स्वदक्षिणकरे निपातयन्)* तावद् मदीयोऽयं कर एव दोषभाग् वर्तते ।

याज्ञवल्क्यः नायं करश्च दोषभाक् । यतो हि, करोऽयं स्वयं चलितुं न शक्नोति ।

वैशम्पायनः *(नतशिरसा क्षणं विचिन्त्य)* तर्हि अहं स्वयं दोषी अस्मीति मे निश्चयः ।

याज्ञवल्क्यः अहं स्वयं वा आत्मा खलु । पुनरसौ कथं दोषी स्यात् ?

वैशम्पायनः *(बोद्धुं चेष्टमानः)* मुनिराज याज्ञवल्क्य ! को दोषी तावत् ? आत्मन आवरणमज्ञानं माया अविद्या वा ?

याज्ञवल्क्यः गुरुवर्य ! अयन्तु स्वानुभूतेर्विषयः ।

(वैशम्पायनः पश्चात्तापेन स्वकपाले करौ निवेशयति ।)

गुरुवर्य! प्रारब्धवशाद्यद्भाव्यमासीत्तदेवघटितम्। अतइदानीं पश्चात्तापेन विलपनञ्च नोचितम् । वस्तुतो वमनेन मन्त्राणां समाप्तावपि नहि मस्तिष्कं रिक्तताङ्गच्छतीति सत्यं खलु !

सुचरकः *(नतशिरसा)* आम्, सत्यमेव ।

(सर्वे मौनमाचरन्ति । दर्शका मूकवत्तन्मयतया पश्यन्ति ।)

याज्ञवल्क्यः गुरुवर्य ! वस्तुतो ब्रह्मज्ञानविषयिणो वैदिकमन्त्रा नहि तित्तिरीणां विषयः, अपितु मानवानां कृते वर्तन्ते । सपदि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नागच्छेत्तादृशं युगम्, यदा तित्तिरिभिश्च ब्रह्मज्ञानस्य विषयीकरणं सम्भवेत्।

(तित्तिरीणां प्रसङ्गमबुद्ध्वा बुद्ध्वा वापि सर्वे हसन्ति । सुचरक-प्रियदत्तौ नतवदनौ तिष्ठतः ।)

वैशम्पायनः मुनिराज याज्ञवल्क्य ! भृशं कष्टं सोढं स्याद् भवता मदाश्रमाद् निष्काशनानन्तरम्।

(अश्रूणि विमुञ्चति ।)

याज्ञवल्क्यः *(विहस्य)* कष्टम् ? मदीयेन वपुषा प्राप्तं स्याद् न तु मया।

सुचरकः बन्धो याज्ञवल्क्य ! तस्मिन्नहनि अस्माभिर्या युवतिः तत्र कमलातटे भवत्या सह संलपन्ती दृष्टा, तस्याश्च पाणिग्रहणं भवता विहितमिति सत्यं वा ?

याज्ञवल्क्यः *(सकृदतीतं संस्मृत्य)* आम्, तस्याः पक्षतः तत्पित्रा भृशमनुरुद्धोऽहं नेति वक्तुं नाशक्नवम्। अत उद्वाहः सञ्जातः। तस्या गर्भतः तनयैका एकः तनयश्च समुत्पन्नौ।

प्रियदत्तः तर्हि ज्येष्ठभार्यातः कियन्त्यः सन्ततयो जाताः ?

याज्ञवल्क्यः तस्या न कापि सन्ततिः समुत्पन्ना।

(याज्ञवल्क्यस्य पारिवारिकं वृत्तान्तं निशम्य सर्वे शनैरस्पष्टं संलपन्ति । तदानीमेव मन्दिरस्य शङ्खघण्टानादः श्रूयते । एवञ्च सान्ध्यगानस्य गुञ्जनमपि प्रारब्धमाकर्ण्यते ।)

(वैशम्पायनकरौ गृहीत्वा) गुरुवर्य ! गच्छाम सान्ध्यकृत्यानुष्ठानाय स्नातुं महाराजसरसि।

वैशम्पायनः *(शनैश्चलन्)* क्वास्तीदं सरः ?

याज्ञवल्क्यः इतः प्रतीच्यां दिशि। नातिदूरे वर्तते तत्। मिथिलामाहात्म्ये वर्णनं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राप्यतेऽस्य सरसः। गिरीशस्य ब्रह्महत्यादोषः, परशुरामस्य मातृहत्यादोषश्च च उभावेव दोषावेतस्मिन्नेव सरसि स्नानेनापगताविति जनश्रुतिश्च विद्यते।

वैशम्पायनः *(स्वीयं ब्रह्महत्यादोषं संस्मरन्)* हँ, व्रजेम तावत्तत्रैव।

(सर्वे निष्क्रामन्ति।)

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् ५

दूरदर्शिता

स्थानम् – कमलानद्याः तटवर्ती मध्यग्रामः
कालः – मध्याह्नाद् ईषत्पूर्वम्

मधुर्विशाले काष्ठफलके प्रतिक्षणम् ॐ इति लिखन् प्रोञ्छन् च वर्तते । प्रतीयते यत् स स्वप्रयोगशालायाम् ॐ इत्यक्षरमाध्यमेन तदानीं कस्यचन नवीनतथ्यस्याविष्करणाय कार्यनिरतो वर्तते । कदाचित् स किमपि मन्दं रौति चेत् कदाचिच्च गम्भीरमुद्रया चिन्तयति । कदाचित्तु सहसा प्रफुल्लः सन् हसति ।

तन्तुवायकमूढ्वा मैत्रेयी आयाति । मधोः क्रियाकलापं वीक्ष्य सा आश्चर्यान्विता भवति । तत्रैव सन्निधावुपविश्य सा तन्तुवायनं प्रारभते ।

मैत्रेयी वत्स ! किं लिखन्नसि ?

मधुः अ उ म् चेति त्रिभिर्वर्णैः संयुक्तम् 'ॐ' इत्येकाक्षरम् । इदं जाग्रत्स्वप्नसुषुप्तीनां प्रतीकञ्च वर्तते ।

मैत्रेयी वत्स ! त्वदीया आलापशैली एव अद्य किञ्चित् पृथक् प्रतीयमानास्ति, कथमेतत् ?

मधुः ज्येष्ठमातः ! ह्यस्तनदिवसं यावत् सहस्रश ओङ्कारान्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लिखितवान् स्याम्, परन्तु......... ।

मैत्रेयी परन्तु ! परन्तु किम् ? ब्रूहि तत् ।

मधुः परन्तु अद्यैव मया सैद्धान्तिकपक्षस्य व्यावहारिकरूपेण प्रयोगात्मक आत्मबोधो विहितः । ओङ्कारस्य स्वरूपद्वयं वर्तत इति तु इतःपूर्वं कदाचिदपि नैवाबोधि मया ।

(फलके लिखितमोङ्कारं प्रदर्शयन्) अत्र बहिस्थ ओङ्कारः साकारः ।

(हृत्स्पर्शनेन सङ्केतयन्) अत्रान्तरन्तःकरणे विद्यमानश्च निराकार ओङ्कारः ।

मैत्रेयी वत्स ! बहिः फलके दृश्योऽन्तःकरणेऽदृश्यश्च द्वावेव ओङ्कारौ समौ किल ?

मधुः उभावेव समौ ।

मैत्रेयी वत्स ! परह्यः त्वया सगुणनिर्गुणयोर्दृष्टान्तविषये पृष्टमासीत् । तदानीं पश्चात् समुचिते सन्दर्भे वदिष्यामीति मया कथितं परन्तु अद्य त्वं स्वयमवेदीः ।

(हर्षभावेन उज्ज्वलवदना भवति ।)

मधुः *(गाम्भीर्येण विचिन्त्य अनुभवन्)* ज्येष्ठमातः ! तर्हि तु यो निर्गुणोऽस्ति, सगुणरूपञ्च स एव बिभृयात् । तथैव सगुण एव निर्गुणत्वेन निराकारत्वेन च परिणमते किम् ?

मैत्रेयी सत्यमेतत् । एतदर्थं प्रकृत ओङ्कारो हि समुचितो दृष्टान्तः ।

(तैलोद्योगात् प्रत्यायाता वनिता तैलधानीमानीय कुड्यवपायां स्थापयति ।)

मधुः *(उच्चस्वरेण)* अग्रजे ! ओङ्कारोऽन्तःकरणवर्ती सन् निर्गुणः, बहिर्निःसृतः सन् सगुणश्च सञ्जायत इति जानाति वा भवती ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वनिता *(तत्समीपमेत्य औत्सुक्येन)* दर्शय दर्शय कथमिति ?

(मधुः फलके ,ॐ' लिखन् प्रोञ्छञ्च प्रदर्शयति ।)

मैत्रेयी *(तन्तुवायकचालनं विरम्य)* आम्, किमपि स्मृतं मया !

मधुः किं वा तद् ज्येष्ठमांतः !

(मधुवनिते मैत्रेय्या मुखमण्डले दृष्टिं पातयतः ।)

मैत्रेयी ओङ्कारोऽयं यद् अन्तरो बाह्यश्च प्रतीयते, तदानीमनयोरन्तर्विरोधोऽनुभूयते ।

मधुः किन्नाम अन्तर्विरोधः ?

मैत्रेयी आन्तरो बाह्यश्च सङ्घर्षः ।

(मधुवनिते आश्चर्यभावेन तत् शृणुतः ।)

मधुः *(गाम्भीर्येण विचार्य)* एतादृशी सङ्घर्षप्रक्रिया तु न कदापि विच्छिन्ना भवेत् !

मैत्रेयी नहि वत्स ! सङ्घर्षप्रक्रिया तु अवश्यं विच्छिद्यते ।

प्रघर्षणे यदाचार–बोधाभ्यासप्रयुक्तता ।
स्फुरति चेतसः शुद्धिः सच्चिदानन्दरूपता ॥
सत्यं शिवं सुन्दरञ्च भावस्यास्यानुभूतता ।
विच्छिद्यते तदा सर्वा सङ्घर्षप्रक्रिया मता ॥

मधुः ज्येष्ठमातः ! किन्नामधेयमस्याः स्थितेः ?

मैत्रेयी *(सहर्षम्)* मोक्षो जीवन्मुक्तिः परमात्मप्राप्तिर्वा नैकविधानि सन्ति अस्या नामधेयानि ।

(आरात् केकाध्वनिः श्रूयते । वनिता उत्थातुं चेष्टते । मधुः मूकवद् एकतानेन पश्यति । मयूरी दीर्घगलं तिर्यक्कुर्वती तत्रैव प्राप्नोति । वनिता उत्थाय धावति । मयूरी मैत्रेयीमुपगत्य गलवितानेन स्वस्याः तृषां सङ्केतयति । मैत्रेयी काष्ठपात्रे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पानीयं स्थापयति । मयूरी तत् पिबति । वनिता मयूर्या अण्डं हस्ते निधाय धावन्ती समायाति ।)

वनिता *(अण्डं दर्शयन्ती)* ज्येष्ठमातः ! अद्य तु मयूर्या अण्डं निःसारितम् !

(मधुः सौत्सुक्यमण्डं ग्रहीतुं करमग्रेसारयति । वनिता च तत्करेऽण्डं निक्षिपति ।)

मैत्रेयी मयूर्यण्डविषयकं प्रश्नमेकं करवाणि ?

वनिता कीदृक् प्रश्नः ?

मैत्रेयी तादृग् ज्ञानविषयको दार्शनिकः प्रश्नः, येन बुद्धिः तीक्ष्णायते।

मधुः *(मैत्रेय्याः प्रस्तावमपरिगणय्य अण्डं परिमातुकामः)* ज्येष्ठमातः ! इदमण्डन्तु अतीव भारयुतमस्ति । किं वर्ततेऽस्यान्तः ?

मैत्रेयी वत्स ! मया युवां प्रति प्रक्ष्यमाणः प्रश्नश्च अयमेव । उच्यतां तावत् किमस्ति अस्यान्तः ?

वनिता जलम् ।

मधुः नहि जलम् । अस्यान्तस्तु मयूर्याः सन्ततिर्वर्तते ।

मैत्रेयी उभयोरेव युवयोरुत्तरं समुचितम् । यतो हि, अण्डान्तवर्तिनो जलादेव अस्याः सन्ततिः कर्बुरा जायते ।

वनिता *(नैकट्यमधिगतां मयूरीं संस्पृशन्ती)* ज्येष्ठमातः ! एतादृशी बृहत्काया मयूरी एतादृशे लघीयसि अण्डे कथं निविष्टं स्यात् !

मैत्रेयी वत्से ! प्रश्नमिमं त्वां स्वान्तःकरणवर्तिनीमेव चेतनां पृच्छ ।

वनिता *(क्षणं नतमस्तका सती विचिन्त्य)* ज्येष्ठमातः ! ....

(स्वान्तःस्थाया भावनायाः प्राकट्यं विधातुं न प्रभवति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी ब्रूहि ब्रूहि कथन्तत् ?

वनिता न जाने । कथमिति कथयामीव प्रतिभाति परन्तु बहिर्वाणी न स्फुटति ।

मैत्रेयी *(मधुं सम्बोध्य)* वत्स ! त्वं कथय तावत् ।

मधुः अस्माकं चेतनान्तश्च मयूरी वर्तते ।

वनिता *(सशब्दं निःश्वस्य)* मयापि एवमेव विचारितमासीत् ।

मैत्रेयी परन्तु संसाररूपिणी मयूरीति वक्तव्यम् । बुद्धं युवाभ्याम् ?

मधुवनिते *(युगपत्)* बुद्धम् ।

(तत्क्षणं मयूरश्च मयूर्याः सामीप्यमवाप्य पक्षवितानपुरःसरं नर्तनं प्रारभते । तत्रत्याः सर्वेऽपि जनाः तद्वीक्षन्ते ।)

मैत्रेयी *(सौदासीन्यम्)* वत्स ! त्वं पितरं न प्रीणासि किम् ?

मधुः ज्येष्ठमातः ! कथं न ? अवश्यं प्रीणामि । ब्रूतां तावत् कदा प्रत्यायास्यति सः ?

मैत्रेयी प्रत्यायानवेला तु सञ्जाता एव परन्तु.........

वनिता *(मध्ये तद्वचो निरोध्य)* ज्येष्ठमातः ! अम्बा ब्रवीति स्म यत् पिता तु भवत्यामेव अधिकतरं स्निह्यतीति ।

मैत्रेयी *(साश्चर्यम्)* वत्से ! तर्हि अहमेव त्वदीयाम्बा भवामि, त्वदम्बा च मदूरूपं प्राप्नुयादिति अम्बां कथय ।

मधुः 'अहम्' इत्यपि परिवर्तनशीलं किम् ?

मैत्रेयी *(हासपरिलसितभावेन)* वत्स ! त्वदीयेयं कथनशैली हि मह्यं रोचते ।

वनिता ज्येष्ठमातः ! तर्हि मदीया कथनशैली ?

मैत्रेयी *(वनितायाः करौ प्रगृह्य)* त्वदीयापि । विश्वासश्च वर्धमानोऽस्ति यद् युवयोः तीक्ष्णायमाणया बुद्ध्या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उन्नतिङ्गच्छता आत्मचिन्तनेन च हिमशैलीयाया अधित्यकायाः तदधोवर्तिनः समतलभुवश्च गौरवं प्रवर्धमानमस्ति। भौतिक्या प्राविधिक्या च समुन्नत्या नभसि उड्डीयमाना आधुनिका जनाः चन्द्रमसं भौमं शुक्रञ्च समारोहन्तु परन्तु युवामात्मचिन्तनेन आत्मदर्शनक्षेत्रे समुन्नतिमधिगत्य स्वात्मान्तो हि प्राप्स्यथः । एवञ्च पुरुषार्थं साधयित्वा अपरैरिव भौतिकी प्राविधिकी समुपलब्धिश्च युवाभ्यां नूनं प्राप्स्यते।

वनिता ज्येष्ठमातः ! कः परिणामस्तदनु यदि आवां स्वात्मान्तः प्राप्तुं न प्रभविष्यावः ?

मैत्रेयी तर्हि तु सम्भवेद् यत् सर्वोच्चः तुहिनशिलोच्चयोऽपि वामनायेत । ततः समुद्भूताः कोशी-गण्डकी-कर्णाल्योऽपि लघ्वायेरन् । मूसी-माढा-विग्धी-विरजा-बलौंती-कमला-गेरुका-जलधि-वाग्वती-लखनदेईच्छावत्यश्च शुष्कायेरन् । तथैव चतुष्क्रोशाात्मिका अरण्यानी च निरस्तपादपा निष्पद्येत।

मधुः ज्येष्ठमातः ! आवां स्वात्मान्तः प्रवेष्टुं प्रभविष्यावः चेत् ?

मैत्रेयी वत्स ! हिमालयोपरि अधित्यकायां तदधोवर्तिन्यां समतलभुवि च प्रकाशितेन आत्मबोधातपसृष्टेन औष्ण्यभावेन अधित्यका, अधःस्था समतलभूश्च सम्यक् प्रकाश्येताम् । किं बहुना, समग्रमपि विश्वं प्रोज्ज्वलितं स्यात् !

मधुः कथन्तत् ?

मैत्रेयी एकेनैव दीपेन अन्यदीपानां प्रज्वालनमिव।

(वनिता मधुश्च अन्योन्यं पश्यतः । मङ्गलवाद्यध्वनिः श्रूयते। सर्वेऽवधानेन शृण्वन्ति। जलघटं वहन्ती कात्यायनी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहसायाति । सा जलघटं वितर्द्यां स्थापयति ।)

मधुः अम्ब ! कथमेतद् ध्वननं दूरादेव श्रूयमाणं वर्तते ?

कात्यायनी विजयोल्लासोऽयं त्वत्पितुः । सहस्रं स्वर्णमण्डिता गावश्च सामश्रवसा समानीयमानाः सन्तीति समाकर्ण्यते ।

वनिता *(साश्चर्यम्)* स्वर्णमण्डिता गावः !

(मङ्गलवाद्यमितोऽपि समीपतः श्रूयते । मैत्रेयी सपदि आसनानि समायोजयति । वनिता मधुश्च स्वागतार्थं गच्छतः । सम्मार्जयन्ती कात्यायनी मधुना तत्रैव त्यक्तं मयूर्यण्डं कुड्यवपायां स्थापयति ।)

मैत्रेयी भगिनि ! इत एव समागच्छन्तो बहवः स्युर्वा ?

कात्यायनी आम्, तथा हि श्रूयते ।

मैत्रेयी *(सहसा)* तावदहमपरस्माच्च सदनाद् मृगचर्माणि आनेष्यामि ।

कात्यायनी अस्तु अग्रजे !

(मैत्रेयी निरेति ।)

(तारस्वरेण) अग्रजे ! पानपात्राणि च समानीयन्ताम् । अत्रत्यैः पर्याप्तं न स्यात् ।

('अस्तु आनेष्यामी'ति वचनं श्रूयते । तदानीमेव एका महिला समागच्छति ।)

महिला भ्रातृजाये ! दीयतां सम्मार्जनी । अहं सम्मार्जयामि ।

कात्यायनी भगिनि ! सम्मार्जनमहं स्वयं करोमि । भवती जलघटात् पानपात्रेषु जलमादधातु ।

(महिला यथोक्तमाचरति ।)

महिला भ्रातृजाये ! क्व क्व विधीयते तावतीनां गवां पालनम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुनिराजः सहस्रं गा आनयन् वर्तत इति श्रूयते। सर्वासामपि गवां शफशृङ्गाणि स्वर्णाभरणैराभूषितानि सन्तीति च समाकर्ण्यते। तावन्ति स्वर्णानि च किं क्रियेरन् ?

कात्यायनी भगिनि ! मुनिराजे समायाते स एव निश्चीयात्तत्।

(मैत्रेयी मृगचर्माणि पानपात्राणि च उद्वायाति।)

महिला *(मैत्रेयीं प्रति)* भ्रातृजाये ! पानपात्राणि तु अत्रैव दीयन्ताम्। प्रक्षालनीयानि चेत् प्रक्षालनञ्च विधास्यामि।

मैत्रेयी भगिनि ! समुचिते समये समागता भवती।

(तस्यै पानपात्राणि प्रदाय वितर्द्यां मृगचर्माणि प्रसारयति। महिला पानपात्राणां प्रक्षालनं प्रारभते।)

महिला *(मैत्रेयीं प्रति)* भ्रातृजाये ! इतःपरं तु आश्रमेऽस्मिन् पयोदधिसर्पितक्राणां नद एव प्रवहेत्।

(अपरे च द्वे महिले समागच्छतः।)

महिले (कात्यायनीं युगपत् सम्बोध्य) भ्रातृजाये ! उच्यताम्, किं करवाव आवाम् ?

कात्यायनी कृपया चुल्लिकार्ये साहाय्यं क्रियताम्।

(कुड्यवपां प्रति सङ्केत्य) तत्रास्ति तैलभाण्डम्, रोटिकारचनायै रसवत्यां नीयताम्।

(महिले कुड्यवपायाः काष्ठमयं तैलपात्रं निःसार्य अन्तः प्रविशतः। वाद्यवादनं नेदिष्ठतः श्रूयते। स्वर्णमण्डितशफशृङ्गयैकया गवानुगम्यमानः सामश्रवाः तत्रैव प्राप्नोति। स मैत्रेयीकात्यायन्यौ नमस्कुरुते।)

मैत्रेयी सामश्रवः ! क्व तावद् मुनिराजः ?

सामश्रवाः गुरुवर्यः समागच्छन्नेव वर्तते।

(गौः शब्दायते।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(गां कीलके बद्ध्वा) गौरियं सहस्राणामन्यतमा । स्वर्णमण्डित-शफशृङ्गवत्योऽन्याश्च ऊनशताधिकनवशतं गावो शाल्मलीचत्वरे चरन्त्यः सन्ति । राजर्षेर्जनकस्य सभायां गुरुवर्यो विजयी भूत्वा 'ब्रह्मविद्वरिष्ठः' इति पदेन विभूषितोऽभूत् । इमा गावः तदर्थमेव पारितोषिकरूपेण गुरुवर्याय प्रदत्ताः ।

मैत्रेयी सामश्रवः ! ब्रह्मसभायां तस्यां काश्चन विदुष्योऽपि भागमगृह्णन्न वा ?

सामश्रवाः अवश्यम् । विदुष्या गार्ग्या तु गुरुवर्येण सह शास्त्रार्थेऽपि वारद्वयं भागो गृहीतः ।

कात्यायनी सामश्रवः ! भवता महाराज्ञ्योऽपि दृष्टाः किल ?

सामश्रवाः आम्, कथं न दृष्टाः स्युः । दृष्टा एव । राज्ञा सहैवासन् ताः ।

(याज्ञवल्क्यो वामदक्षिणपार्श्वतः चलद्भ्यां मधुवनिताभ्यां सहैव तत्र प्राप्नोति । राजप्रासादपक्षतः समागता अनुचराश्च दृश्यन्ते । मैत्रेयीकात्यायन्यौ याज्ञवल्क्यचरणयोः प्रणतिं निवेदयतः । याज्ञवल्क्य आसन्दमध्यास्ते । अन्ये सर्वेऽपि तं परित उपविशन्ति ।)

मधुः *(गां सङ्केत्य)* तात ! इयन्तु मम कृते ।

(विचिन्तयन्) परन्तु किन्नाम अस्याः कल्पयेयम् ?

वनिता 'कपिला' इति कल्पय ।

मधुः *(पित्राभिमुखः सन्)* तात ! स्वस्रा कल्पितं नाम गोरनुरूपमेव किम् ?

याज्ञवल्क्यः एवं गोरनुरूपं खलु ।

(भार्यावदनयोर्विलोक्य) युवां कुशलिन्यौ वा ?

मैत्रेयी सर्वं कुशलमेव भवत आशिषा ।

याज्ञवल्क्यः कात्यायनि ! ईषत्कृशताङ्गतासि किम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कात्यायनी ह्यः सोमवत्या अमावास्याया उपवासमाचरितवती आसम्। तस्मात्तथा दृष्टा स्याम्।

याज्ञवल्क्यः *(वृद्धं ग्रामीणं वीक्ष्य)* अत्र ग्रामे सर्वे कुशलिनो वा ?

वृद्धो ग्रामीणः मुनिराजस्य शुभाशिषा सर्वे कुशलिन एव।

(किं कथयानीति अनिर्णयेन क्षणं स्तब्धीभूय) मुनिवर्य ! एका पिपृच्छिषा वर्तते ?

याज्ञवल्क्यः किंविषयिणी सा ?, पृच्छ्यताम्।

वृद्धो ग्रामीणः वयमपि पालनाय इमा गाः प्राप्नुयाम वा ?

याज्ञवल्क्यः *(स्मयमानः)* महाशय ! एताः सहस्रं गावः, या मया राज्ञो जनकस्य ब्रह्मसभातः समानीताः, वस्तुतो हिमशैलीयाया अधित्यकाया तदधःस्थल्या निवासिनाञ्च सर्वेषां कृते वर्तन्ते। अतो नीयन्तां तावत्यो गावः, यावतीः पालयितुं शक्यते।

(वृद्धो ग्रामीणः प्रसीदति।)

मधुः *(साश्चर्यम्)* तात ! सहस्रमपि गावः पालनाय अन्येभ्यः प्रदीयन्ते वा ?

याज्ञवल्क्यः वत्स ! एवम्। सहस्रं खलु गावो हिमशैलीयासु अधित्यकासु तदधोवर्तिषु स्थलीषु च स्वातन्त्र्येण विचरितुं मोक्तास्मीति मे विचारः।

मधुः *(स्वचितां गां सङ्केत्य)* तामपि ?

याज्ञवल्क्यः *(मधुवदनं विलोक्य)* तामेकान्तु कृष्णसारहरिणैः सह त्वमेव पालय। अन्यासु काँश्चन प्राच्यां काँश्चन प्रतीच्यां काँश्चन उदीच्यां काँश्चन च अवाच्यां दिशि मोक्तास्मि।

वृद्धो ग्रामीणः मुनिराज ! एवं मोचनस्य प्रयोजनम् ?

याज्ञवल्क्यः महाशय ! अत्रास्मदीयासु हिमशैलीयाधित्यकासु तदधःस्थलीषु च इमा गावो लक्ष्मीरूपेण मातृस्वरूपेण च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूज्येरन्, अयमेव मदीयोऽभिलाषः । इह हिमशैलीयासु अधित्यकासु अधःस्थलीषु च यावत्पर्यन्तं गोमातरं प्रति श्रद्धामयी आस्था नहि न्यूनायते, तावदिह प्रत्यहं प्रातः स्वर्णरश्मिरुदेति । तुहिनाचलवर्तिन्यामधित्यकायां पर्वतीयोपत्यकायां नीचैः स्थल्याञ्च आवर्षं वसन्तर्तुर्वर्तिष्यते। संविधानत एव अत्रत्या न्यायव्यवस्था गोवंशं गोप्स्यति। यावत् सुधांशुसहस्रांशू उदेष्यतः तावदत्र गोहत्या निषिद्धा भविष्यति । प्रतिवत्सरं मान्यमानो यमपञ्चकान्तर्गतो गोपूजनदिवसश्च नैरन्तर्येण अत्रत्यं लोकप्रिय–सांस्कृतिक–पर्वणः स्वरूपं निर्वक्ष्यते।

वृद्धो ग्रामीणः मुनिराज ! सम्यग् अभिहितं भवता । भवतोऽभिलाषः पुष्पितः फलितश्च भूत्वा युगशः सञ्जीवेत्।

कात्यायनी आर्य ! तर्हि गोशफशृङ्गेषु संयोजिताः काञ्चनखण्डाः किं क्रियेरन् ?

याज्ञवल्क्यः युष्मच्चेतसोर्धनविषयिणी लिप्सा लालसा वा चेद् द्वित्राणां गवां काञ्चनखण्डान् गृह्णीतम्। नो चेत् सर्वासामपि गवां काञ्चनखण्डाः श्वो मन्दिराणां द्वार–छदि–गवाक्षादिषु कलाकृतिरूपेण शोभेरन्। बुध्यस्व एतद् यत् काञ्चनमपि तु मृदिव वर्तते । यथा मृत्तिकातो घटकलशादिभाण्डानि उत्पाद्यन्ते तथैव काञ्चनाद् आभूषणानि परन्तु भाण्डानि मृदेव चेद् आभूषणानामपि काञ्चनमात्रत्वमेव । तत्र तत्र कल्पितानि घट–कलश–वलय–ग्रैवेयकादिनामानि तत्तद्रूपाणि च परिचित्य अपाकरणीयानि भवन्ति । बुद्धं त्वया ?

कात्यायनी *(मैत्रेयीं प्रति वीक्ष्य)* अग्रजेव तु बोद्धुं न शक्नोमि !

मैत्रेयी भगिनि ! प्रयतस्व नु, मत्तोऽपि अधिकं बोद्धुं क्षमिष्यसे।

मधुः *(कुड्यवापतः प्रसूनमाहृत्य)* तात ! अस्मदीया मयूरी च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अण्डं निःसारितवती। दृश्यतामेतत्!

याज्ञवल्क्यः *(करेण गृह्णन्)* आम्, सत्यमेव।

वनिता तात! अस्ति अण्डस्यान्तः तच्छावकः।

(वनिताया वार्तामाकर्ण्य आश्चर्यमनुभवन्ति ग्रामीणाः।)

याज्ञवल्क्यः अहो! त्वन्तु प्रागेवावगतवती वर्तसे तथ्यमेतत्?

वनिता *(मैत्रेयीं प्रति प्रेक्ष्यमाणा)* ज्येष्ठमात्रा ज्ञापितमेतत्। तदनु एव आवाभ्यां ज्ञातं बुद्धञ्च।

याज्ञवल्क्यः *(मैत्रेयीं विलोकयन्)* आर्ये! अजातारम्भ–विवर्त–परिणामवादेषु अण्डमिदं कस्य दृष्टान्तः?

मैत्रेयी *(क्षणं विचिन्त्य)* विवर्तवादस्य।

याज्ञवल्क्यः *(सतोषम्)* शोभनम्।

मधुः *(पित्राननं सन्दृश्य)* कस्तावत् परिणामवादस्य दृष्टान्तः?

याज्ञवल्क्यः तक्ररूपेण पयसः परिणमनम्।

वनिता तात! अजातवाद एव किमर्थमवशिष्येत! अस्य दृष्टान्तः?

याज्ञवल्क्यः उल्मुकभ्रामणे चक्रदर्शनम्।

वनिता तात! एतेषां कः शोभनतमो वादः?

याज्ञवल्क्यः **शोभनोऽशोभनश्चापि स्वानुभूत्यनुकूलकः।**

आत्मनात्मनि विज्ञाते द्वन्द्वो नैवावशिष्यते॥
सञ्जायतेऽनुभूत्या हि ज्ञानं द्वन्द्वविनाशकम्।
शोभनाशोभनाभावे बोध एवावशिष्यते॥

(तदानीमेव कुतश्चिद् महिले तत्रायातः। ते मुनिराजं याज्ञवल्क्यं नमस्कुर्वाते। याज्ञवल्क्यश्च महिले प्रतिनमति।)

कात्यायनी *(महिले निरीक्षमाणा)* रोटिका निर्मिताः किं भवतीभ्याम्?

महिले *(युगपत्)* निर्मिताः।

कात्यायनी *(भर्तारं वीक्ष्य)* आर्ये! श्रान्तोऽस्ति भवान्। गृह्यतां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खाद्यकमेतत्।

याज्ञवल्क्यः भवतु गृह्णामि।

(उत्थातुं चेष्टमानो वामतो निरीक्ष्य) सामश्रवः!

सामश्रवा : आज्ञाप्यतां गुरुवर्य!

याज्ञवल्क्यः इतः स्वच्छन्दतया आसां गवां मोचनविषये श्वरेव तत्र वृत्तजनाश्रये पञ्चसभायोजनां चिकीर्षामि। तत्र स्थानसङ्कोचश्चेत् सभा स्थानेश्वरस्य अधःस्थल्यां समायोजयितेति मे विचारः। तत्र गत्वा ग्रामप्रमुखं शिवानन्दं ज्ञापय। तदनु ग्रामसूचकेन ग्रामपालेन वा येन सह मेलनं जायते, ग्रामीणान् सूचयितुं तमनुरुध्य प्रत्यायाहि।

सामश्रवाः यथाज्ञप्तं भवता गुरुवर्य!

(सामश्रवा निरेति। याज्ञवल्क्य उत्थाय जलपात्रं गृहीत्वा पाणिपादं प्रक्षालयितुं याति। ग्रामीणाश्च ततो निर्यान्ति।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् ६

प्रतिक्रिया

स्थानम् – उत्तरभागे निर्मितो नूतनः केवलानन्दाश्रमः
कालः – सन्ध्यानिकटवर्तिनी वेला

महाशिवरात्रिपर्वणः पूर्वदिवसः । दिवाकालादेव कार्पास्युपमेयानां हिमकणानामनवरतपातेन आश्रमं समन्ततः सकलं स्थानं धवलायित–मस्ति । तत्रत्या वृक्षवनस्पतयश्च हिमाच्छादिततया धवलिताः सन्ति । आश्रमान्तोऽधिश्रयण्यामग्निः प्रज्वलितो दृश्यते । मैत्रेयी कार्पासवर्तिकां रचयन्ती वर्तते । मधुवनिते च तत्रैवाधिश्रयणीमुभयतो समुपविश्य अग्नितापं गृह्णन्त्यौ स्तः ।

कात्यायनी द्वारमुद्घाट्य अन्तः प्रतिशति । अनावृताद् द्वाराद् वायुः कानिचिद् कार्पासीसदृशानि हिमलोष्टानि च गेहान्त आगमयति । द्वारं पिधाय सा स्वदेहसंश्लिष्टान् हिमखण्डान् अपाकुर्वती पातयति ।

कात्यायनी *(शैत्यबाधां सूचयन्ती)* न पार्यते बहिः स्थातुम् ।

(पुनश्च देहसंश्लिष्टान् हिमखण्डान् भूमौ पातयन्ती) क्षणं भाण्डमार्जनाय निर्गतावर्तिषि, हिमगिरिरिव धवला

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सञ्जाता ।

(अधिश्रयण्या नैकट्यमवाप्य अग्नितापं गृह्णाति ।)

अत्रापि एवं शैत्यं वर्तते चेत् शिवरात्रिमेलापके नेपालोपत्यकां गतानां शैत्येन कीदृशी दशा स्यात् ! अस्यैव ग्रामस्य वृद्धो दीनानाथस्तु गोसाइकुण्डञ्च गन्तास्मीति सङ्कल्प्य गतवान् आसीत् । वराको वृद्धो हिमेन पूर्येत चेत्...... !

(मधुवनितेऽवधानेन मातुर्वचनमाकर्णयतः ।)

मैत्रेयी परुत् परारि च तुषारपातस्य प्रतीतिमात्रमासीत् परन्तु ऐषमस्तु भृशं तुषारपातोऽनुबोभूयमानोऽस्ति ।

कात्यायनी अग्रजे ! बिल्वपत्रावचयार्थं गोचारणचत्वरेऽगमम् । तत्र कैश्चन वृद्धैरन्योन्यं क्रियमाणा चर्चा मया कर्णगोचरीकृता यद् बहुवत्सरेभ्यः पूर्वमपि क्षेत्रेऽस्मिन् एवमेव तुषारपात आसीदिति ।

वनिता *(मैत्रेय्या वदनं वीक्षमाणा)* ज्येष्ठमातः ! एतादृशः तुषारपातः केवलं हिमशैलीयप्रदेशेषु तन्निकटस्थलीषु च भवति, अन्यत्रापि वा ?

मैत्रेयी अन्यत्रापि भवति परन्तु उत्तरापन्थस्य अस्मिन् क्षेत्रे तु हिमशैलीय-वैशिष्ट्येनैव अधिकः तुषारपातो भवति । प्राचीनकाले तु न केवलमिहैव तुषारपातो भवति स्म, अपितु उड्डीय गङ्गासागरस्थलीं यावच्च प्राप्नोति स्म । परम् अवाचीने प्रदेशे औष्ण्यवर्धनहेतुना अद्यत्वे तुषारपातस्य न्यूनतास्तीति श्रूयते ।

मधुः ज्येष्ठमातः ! कुत्रत्यो गङ्गासागरः ? अस्माकं मिथिलाया एव वा ?

मैत्रेयी न न । अस्माकं गङ्गासागरः सर्गादौ

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गङ्गासागरसलिलेनैव निर्मितं विपुलं सरो ववृते। सम्प्रति मया सङ्केतितो गङ्गासागरस्तु विष्णुपुराणे समुट्टङ्कितो गङ्गासागरोऽस्ति, य आदिमे काले हिमशैलीयस्थल्या एव समीपवर्ती ववृते परन्तु साम्प्रतं दविष्ठायितोऽस्ति।अस्माकंहिमगिरेःप्रादुर्भूतानांकोशी-कर्णाली-गण्डकीनां सलिलमेव तत्र एकत्रीभवति।

मधुः ज्येष्ठमातः ! समीपस्थोऽपि गङ्गासागरः कथं दविष्ठोऽभवत्?

मैत्रेयी एतत्सर्वं भौगर्भिकविचलनजन्यं परिणमनं वर्तते।

कात्यायनी *(मैत्रेयीं प्रति)* स्वसः ! हिमशैलशृङ्गाणि च भौगर्भिकविचलनेनैव उत्तुङ्गानि सञ्जातानि स्युः। एतत् सत्यं किम्?

मैत्रेयी अवश्यम्। उचितं निगदितं त्वया।

वनिता ज्येष्ठमातः! हिमालयस्य च अभिधानं ,गौरीशङ्करः' इति कथम्?

मैत्रेयी हिमालयस्याङ्के निवासिनां जनानां कृते गौरीशङ्करयोः प्रतीकत्वेन हिमालयस्य अभिधानमिदम्।

कात्यायनी स्वसः ! अहन्तु हिमालयस्य ,गौरीशङ्करः' इत्यभिधानेन व्यवहारे हि महद्वैशिष्ट्यमस्तीति मन्ये। कियच्चारु अभिधानमिदम्!

मैत्रेयी भगिनि ! वस्तुतो गाम्भीर्येण विचारिते सति ,गौरीशङ्करः' इत्यभिधानं मनोरमं रूपकमात्रं वर्तते परन्तु गौरीशङ्करहिमालयस्य भूगर्भे आत्मज्ञानदर्शनस्य यद् अनन्तं स्रोत आच्छन्नं विद्यते, तद्वैशिष्ट्यन्तु असीमं खलु। आदिकालत एव तत्स्रोतसोऽनन्तः प्रवाहः प्रवहन् वर्तते। अत एव तु हिमालयस्याङ्केऽवस्थितोऽयं प्रदेशः तपोभूमिरभिधीयते,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुक्तिक्षेत्रं मन्यते, पाशुपतक्षेत्रमाचक्ष्यते । अपारं वर्तते हिमालयमाहात्म्यम्, अद्वितीया च हिमवत्संस्कृतिः। तस्मादेव साम्प्रतं यावदपि अत्रत्या मुनयः 'सा वै संस्कृतिर्विश्ववारा' इति आसंसारं व्याप्तेयं प्रथमा संस्कृतिरिति भावभावकं वैदिकसूक्तं गायन्तो दृश्यन्ते।

(सान्ध्यगानं कुर्वन् याज्ञवल्क्य आयाति । उद्घाटिते द्वारे पुनरपि तुहिनखण्डा अन्तः प्रविशन्ति । याज्ञवल्क्यो द्वारं पिदधाति । स चुल्लिमभितः समुपविशति । मधुः स्वस्थानादुपसृत्य पितृनिकटे वसति ।)

याज्ञवल्क्यः *(मैत्रेय्या मुखाकृतौ विलोक्य)* कीदृशीयं परिचर्चा प्रचलन्ती वर्तते ?

मैत्रेयी *(सविनयम्)* कीदृशी परिचर्चा भवेत् ? बालाभ्यां सह संलापमात्रम्।

याज्ञवल्क्यः जानामि वैदिकसूक्तविषयिणी चर्चावर्तिष्ट। बहित एव श्रुतं मया।

मधुः आम्, तात ! सद्य एव ज्येष्ठमात्रा कथितं यद् वैदिकी संस्कृतिर्विश्वव्यापकीभूता वर्तत इति।

मैत्रेयी *(मधुं प्रति वीक्ष्यमाणा)* अतिक्षिप्रं प्रविशति एतद्बुद्धौ, यद् एतत्पुरतः परिचर्च्यते। एषोऽपि राज्ञो जनकस्य आगामिन्यां ब्रह्मसभायां पितृसन्निभो ब्रह्मविद्वरिष्ठः प्रमाणीभूय पारितोषिकं लप्सीष्ट किम् ?

(याज्ञवल्क्यः तनयं विलोक्य विहसति । मधुः तूष्णीं सन्नेकतानेन पश्यन् भवति । वनिता आविष्टनिद्रया तन्द्रावस्थां प्राप्नोति । कात्यायनी तत्रत्यं संलापमाकर्ण्य प्रमोदते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मधुः **किमर्थं हसनं तात ! प्रभवेयं भवत्समः ।**
किं लभेंऽवसरं नाहं येनापत्स्ये भवादृशः ॥

याज्ञवल्क्यः *(स्वात्मानं संयम्य)*
सम्बन्धेनैव तातोऽहं त्वञ्च पुत्रोऽस्यसंशयम् ।
वयसा त्वं युवा नूनं स्थविरोऽहञ्च साम्प्रतम् ॥
ममानुरूप एव त्वं चैतन्यमावयोः समम् ।
आयात्यवसरोऽवश्यं त्वत्कृतेऽपि सुनिश्चितम् ॥

मधुः परन्तु कदा तात !

याज्ञवल्क्यः आत्मनात्मनो बोधानन्तरम्, कदलीस्तम्भवल्कमिव एकैकशः पृथक्कृत्य पञ्चकोशानां बोधानन्तरम् ।

(मधुः किङ्कथनीयमिति अविज्ञाय पुनरेकतानेन पितुर्वदने पश्यति ।)

कात्यायनी *(दीर्घं निःश्वसन्ती)* तावत्कालपर्यन्तं राजा जनको जीविता चेत्तु शोभनमेव ।

(याज्ञवल्क्यो भूयश्च हसति ।)

याज्ञवल्क्यः कात्यायनि! त्वं ,जनकः' पदस्यास्य अर्थं सम्यग् वेत्सि न वा ?

(अपरोऽपि कश्चन विशिष्टोऽर्थो भवेदिति विचिन्त्य कात्यायनी किमपि वक्तुं न पारयति ।)

मधुः तात ! अस्य अर्थस्तु ,पिता' इत्येव वा ?

याज्ञवल्क्यः वत्स ! अस्य सामान्यार्थस्तु 'पिता' एव परन्तु 'जनकः' इति नृपतेः कृते आदरवाचि पदं वर्तते । एतस्य वास्तविकाः पर्यायास्तु 'राष्ट्रपिता' 'राष्ट्रनायकः', 'लोकपालः', 'धर्मरक्षकः' चेति विद्यन्ते । जनक-शब्दे पूर्णतया अर्थालङ्काराः काव्यालङ्काराश्च वर्तन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(सर्वेऽपि आश्चर्यभावेन याज्ञवल्क्यवदनं विलोकन्ते ।)

मधुः तात ! तावत् पूर्वमपि नैके जनका बभूवुः किल ?

याज्ञवल्क्यः अवश्यं वत्स ! विश्व–करालप्रभृतयो नैके जनका बभूवुः । अयोध्याया राज्ञो दशरथस्य समकालीनात् शिरध्वजजनकादारभ्य वर्तमानं विदेहराजजनकं यावद् वंशपरम्परा परिगण्यते चेदपि अतिविस्तीर्ण इतिहासः समजायत ।

(मधुः किमपि शुश्रूषते । याज्ञवल्क्यादयः सर्वेऽनवरतं तमेव पश्यन्ति । स शुश्रूषमाणं विषयं स्मृत्वा सम्मोदमधिगच्छति ।)

मधुः तात ! अत्र मिथिलानरेशस्य निमन्त्रणमुरीकृत्य वैदेह्याः स्वयंवरार्थं नेपालोपत्यकातः समागतो नरेशः क आसीदिति कथितं भवता ?

(पूर्वं संस्मृतमपि विस्मृत्य पुनः शुष्मूर्षमाणः) आम्, स्मृतं मया, सुधन्वा सः । एवं वा तात !

याज्ञवल्क्यः एवम् एवम्, परन्तु कालगत्या स तदानीं जनकपुरे हि पञ्चत्वङ्गतः।अथनेपालोपत्यकायाःप्रजानांकृतेशिरध्वज-जनकः स्वानुजं कुशलध्वजं सम्प्रेष्य तत्रत्यं राज्यं व्यवस्थापयाञ्चक्रे ।

मधुः तात ! इतःपश्चाद् भविष्यमाणानां मिथिलानरेशानामादरार्थि नाम च जनक एव भवेन्न वा ?

याज्ञवल्क्यः एतत्तु भविष्यत्येव निर्भरति परन्तु निश्चिनु यद् हिमालयस्याङ्कवर्तिनि अधिराज्येऽस्मिन् आत्मवाद–दर्शनमात्मसात्कृत्य प्रवर्तनशीला राजान इह कोशी–कर्णाली–गण्डकी–वाग्वती–कमलादिसरितां स्थितिकालं यावज्जनिष्यन्ते ।

कात्यायनी *(सहर्षमात्मजमस्तकेन स्वमस्तकं संयोज्य)* वत्स !

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चिरञ्जीव।

मधुः अम्ब! ननु अहं चिरञ्जीवी अस्मि, कदाम्रियेऽहम्? जीर्णीभूय ध्वंसेरन् मम वासांसि, परमहन्तु अपरस्य नवीनवाससो धारणशीलः चेतनोऽस्मि।

मैत्रेयी वत्स ! नितरां सत्यमस्ति त्वत्कथनम्।

(उपविश्यैव निद्रामापन्ना सती चुल्ल्योपरि निपतन्तीं वनितां वीक्ष्य कात्यायनी सहसा तां प्रतिकरोति।)

कात्यायनी *(स्वस्याः प्रावारेण वनितायाः कृते उपधानीं प्रकल्प्य)* आदिनं जलाहरणं कृतवती, हिमान्याञ्च क्रीडितवती । तस्मात् सम्प्रति त्वरितं सुप्तवती।

मधुः अम्ब ! सा सुप्तवतीति मनुते भवती ?

कात्यायनी *(वनितां दर्शयन्ती)* इयन्तु समुन्मीलितलोचना दृश्यते। कथं नहि सुप्तवती भवेत् ?

मधुः अम्ब! वयं जाग्रति स्मः, सा तु स्वप्नेऽस्ति, पार्थक्यमेतावदेव। *(मैत्रेय्या वदने विलोकयन्)* नैवं वा ज्येष्ठमातः !

मैत्रेयी आम्, एतदेव तु स्थूलशरीरं सूक्ष्मशरीरञ्चेति कथ्यते।

मधुः नहि जाग्रति, न च स्वप्ने परन्तु गाढनिद्रायां सुषुप्त्यवस्थायाः शरीरं किमुच्यते ?

मैत्रेयी कारणशरीरम्।

याज्ञवल्क्यः *(ज्येष्ठभार्यां वीक्ष्यमाणः)* आर्ये ! धन्यासि त्वम्। त्वन्तु एवं गभीरानपि विषयान् पुत्रं मधुं शिक्षितवती असि।

मैत्रेयी आर्य ! तथाधिकन्तु नहि जानामि, यस्य प्रशिक्षणं कर्तुं शक्येत ! वस्तुतो भवत एव अनुकम्पायाः फलं सर्वमिदम्।

(कात्यायनी सपत्न्याः कृते भर्तुर्मुखात् धन्येति शब्दं निशम्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म्लानमुखी भवति । वाष्पार्द्रनयना सा तत उत्थातुं चेष्टते ।)

याज्ञवल्क्यः का वार्ता कात्यायनि ! किमभूत् ?

कात्यायनी *(स्वात्मानं विस्मृत्य)* किं भवेत्, मादृश्या मूकाया भाग्यहीनाया ! सन्तत्योः परिपोषणेन, गार्हकृत्यसम्पादनेन च बलीवर्द इव कर्मणि प्रवर्तनन्तु मदीया नियतिरेव ।

(सशब्दं रुदती उत्थाय बहिर्निर्याति । निर्याणकाले अनावृतकपाटाभ्यां पुनः किञ्चित्तुहिनशकलानि अन्तः प्रविशन्ति । मधुः समुत्थाय द्वारं पिदधाति ।)

याज्ञवल्क्यः *(उत्थाय समाह्वयन्)* कात्यायनि ! अयि कात्यायनि !

(बहितः श्रूयते– 'अहं स्वसेव धन्या भवितुं नाशकम् !')

मधुः *(उत्थाय निर्जिगमिषन्)* तात ! अहमानेष्यामि अम्बाम् ।

(निष्क्रामति ।)

मैत्रेयी स्त्रीजातेर्वैचारिकी न्यूनतेयम् । मास्त्वसौ भवच्चिन्ताविषयः । परह्यः तया मया साकं प्रकटितो विचारस्तु उचित एवेति मन्ये ।

याज्ञवल्क्यः को विचारः ?

मैत्रेयी तीर्थाटनस्य महती स्पृहास्ति तस्याः । सदा गार्हकृत्ये हि निरततया दीपादधस्तनं तम इव सञ्जातास्मीति ब्रवीति स्म । जलेश्वरं क्षीरेश्वरं कूपेश्वरं कपिलेश्वरं मिथिलेश्वरं वा किमपि स्थानं सम्यग् निरीक्षितुं भ्रमितुञ्च अवसर एव नैवालम्भीति वदति स्म । गतवत्सरे धनुषां नेष्यामीति कथितापि सा भवता तत्र न नीता, अपितु अहमेव भवता सह प्रस्थितवतीत्यपि श्रावयति स्म । एवंरीत्या प्रसङ्गेऽस्मिँश्च तच्चेतसि खेदोऽनुभूयते ।

याज्ञवल्क्यः गतवर्षीये मार्गशीर्षे विवाहपञ्चम्या मेलापके मया नीता सा कथमित्थमाख्यातुं शक्नोति ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी आम्, भवान् तत्र नीतवानेव ताम्। अस्मिन् वर्षे च गतश्रावणे दोलामहोत्सवं दर्शयितुं नेष्यामीति भवताभिहितमासीत् परन्तु तस्या एव मासिकस्त्रीधर्मेण सा स्वयं निरुद्धा।

याज्ञवल्क्यः तथा चेत्त्वं धन्यासीति मत्कथनेन तच्चक्षुषी किमर्थं दुग्धवतीव वहतः ?

(तत्क्षणमेव अन्तःप्रविष्टं मधुं सम्बोध्य) क्वास्ति तावत्त्वदीया जननी ?

मधुः अत्रायातुं नैषीत्। धनागारे वर्तते सा। तत्रैव उपविश्य रुदती अस्ति।

(स्वस्थानमधितिष्ठति।)

याज्ञवल्क्यः असकृद् बोधिता मया सा यद् 'एवं तुच्छं विषयमाधृत्य खेदं मा वह' इति परन्तु न मन्यते कथञ्चनापि। मैत्रेयि ! तस्यै त्वया योगवासिष्ठस्य कियतां प्रसङ्गानां श्रावणं समाप्तम्।

मैत्रेयी समग्रोऽपि ग्रन्थः सकृत्तु समाप्त एव।

याज्ञवल्क्यः ए .... तस्मादेव तु सा एकपक्षिणी भूत्वा चलन्ती वर्तते। केवलं कर्मणि निरता सती रोषस्य प्राकट्यं भावयति। मैत्रेयि ! द्विपक्षिणी सम्पादनीया सा। अनन्तरं हि पतत्त्रीव गगनविहाराय प्रभविष्यति।

मैत्रेयी अस्तु आर्य ! पुनश्च एकवारं तां योगवासिष्ठं श्रावयिष्यामि।

याज्ञवल्क्यः यावद् द्विपक्षिणी न भविष्यति, तावत्तां योगवासिष्ठं श्रावय। यतो हि, कर्म ज्ञानञ्चेति पक्षद्वयं विना उपरि उड्डयनसम्भवं खलु।

मैत्रेयी आर्य ! सम्यग् बुद्धं मया। इतःपरं तामहं योगवासिष्ठं पृथक्शैल्या श्रावयिष्यामि।

याज्ञवल्क्यः कया शैल्या ?

मैत्रेयी योगापत्तिपद्धत्या तां समाधिस्थां विधाय। *(मधुः स्वविचारे*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हि निमग्नोऽवलोक्यते ।)

मधुः *(सोत्साहम्)* तात ! ज्ञानमेव सर्वोत्कृष्टम् । नैवं वा ? ऋते ज्ञानाद् मानवो जीवनेऽस्मिन्नभीष्टं नाधिगच्छतीति भवता प्रोक्तमासीन्न वा ? उच्यताम् ।

याज्ञवल्क्यः आम्, अवश्यं प्रोक्तमासीत् परन्तु –

विनान्तःकरणं शुद्धं कुतो ज्ञानस्य सर्जनम् ।
कर्मापि कारणं तत्र तच्छुद्धौ तत्प्रवर्तनम् ॥

(मधुः स्वात्मनः पक्षिभावेन उभयतः करौ प्रसार्य सद्य उड्डयत इव नाटयति । मैत्रेयी–याज्ञवल्क्यौ तस्य बालभावं निरीक्ष्य हसतः । पूर्वं तत्रैव सन्निकटे कटे सुप्ता वनिता हसनध्वनिना जागर्ति ।)

वनिता *(नयने निष्पीडयन्ती मधुं विलोक्य)* किं कुर्वन्नस्ति एषः ?

मैत्रेयी पक्षीव उड्डयितुं चेष्टते ।

(आतुण्डपीडां हसति वनिता ।)

वनिता भ्रातः ! इत्थं त्वमुड्डीय क्व प्राप्स्यसि ? अग्रं मूलं वा प्रति ?

मधुः तत्रैव, यत्र नास्ति अग्रं मूलञ्च ।

(सर्वे हसन्ति ।)

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृश्यम् ७

दायभागः

स्थानम् – नवनिर्मितो ज्ञानकूपाश्रमः
कालः – पूर्वदृश्यसमयाद् केभ्यश्चिद् वर्षेभ्योऽनन्तरम्, मध्याह्नात् किञ्चित्पूर्वम्

(मैत्रेयी लेखनकार्ये निरतावलोक्यते । परितः पुस्तकानां पर्वताः सन्ति । पालिताः कपोताः, मयूराः, कृष्णसाराश्च दरीदृश्यन्ते। पक्षिणां कलरवः श्रोत्रगोचरीभवति। पुष्पविटपेषु पुष्पाणि सघनं विकसितानि विलसन्ति । प्रपुटकसन्धानाय पर्णसमुच्चया इतस्ततो विकीर्णाः सन्ति ।

नद्यां स्नात्वा प्रत्यागतो याज्ञवल्क्यः आर्द्रधौतं वरणे लम्बयति । मैत्रेयी लेखनाद्विरम्य आसन्दं व्यवस्थापयति । याज्ञवल्क्यः तत्र समुपविशति । स क्षणं तूष्णीमाकलय्य तिष्ठति । मैत्रेयी तन्मुखाकृतिं निरीक्षते ।)

मैत्रेयी *(औत्सुक्येन)* आर्य ! का वार्ता ? अद्य किमर्थं न किञ्चिद् ब्रवीति भवान् !

(याज्ञवल्क्यः स्मितं कर्तुं चेष्टते परं न वदति ।)

पथि क्वचिद् उष्णप्रदेशीया भुजङ्गास्तु नानुगताः किल ?

याज्ञवल्क्यः नहि नहि आर्ये ! तथाविधं न किञ्चित् सञ्जातम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी तर्हि मौनमाचरणस्य गाम्भीर्यभावस्य वा प्रयोजनम् ? किं वा एतत्प्रयोजनम् ?

याज्ञवल्क्यः आर्ये ! वस्तुतोऽहं मौनमेव जिघृक्षामि, समाहितो बुभूषामि, स्वस्य स्वात्मन्येव प्रविलयमीहे परन्तु...

मैत्रेयी *(रहस्यं विविदिषन्ती)* आर्य ! परन्तु किम् ? कात्यायनीविषयिणी चिन्तेयं भवतः ?

याज्ञवल्क्यः *(उभयतो विलोक्य)* आम्, कुत्र सा ?

मैत्रेयी सा तु बालाभ्यां सह जानकीकुण्डं प्रति स्नानार्थं प्रस्थिता ।

याज्ञवल्क्यः आर्ये ! चिरकालतो मन्मानसं समाक्रान्तमेव विषयमभिव्यनज्मि । अत्रागमनमार्गे साम्प्रतञ्च एतस्मिन्नेव विषये मच्चिन्तनधारा संवहन्ती अवर्तिष्ट । एतस्य प्रकटनाद् ऋते मानसी शान्तिरेव विच्छिन्नानुभूयते ।

मैत्रेयी श्राव्यतां तावत् कीदृगयं विषयः ?

याज्ञवल्क्यः *(दीर्घं निःश्वस्य, पलितानि श्मश्रूणि संस्पृशन्)*

नारिकेलं जटाश्लिष्टं न बुभूषामि निश्चितम् ।
फेनिलबीजभावं वा हित्वा ब्रह्मत्वमाश्रितम् ॥
वार्धक्येन समाक्रान्तः चिन्तयामि निरन्तरम् ।
कार्पासीत्वं बुभूषामि स्वस्मिन् वै शाल्मलीतरोः ॥

मैत्रेयी *(साश्चर्यम्)*

ज्ञानकूपस्य दीपोऽयमखण्डत्वेन दीपितः ।
निर्वाप्यते कथं केन कारणेन प्रदीपकः ॥
आवाभ्यामपराद्धं किं जिहासेयं समुद्गता ।
प्रेम्णा संसेवितः सम्यक् भवान्नित्यं यथा तथा ॥

(किञ्चिद्विचार्य) अनुजायाः कात्यायन्या विषये यदस्ति, ननु घात-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिघातरूपेण सञ्जायमानं जीवनचक्रस्य स्वाभाविकं प्रवर्तनं तत् । सापि स्त्रीप्रज्ञैव । साम्प्रतं प्रेयःकामिनी अपि सा पश्चात् प्रज्ञापरिपाकेन श्रेयःकामिनी भविता, ब्रह्मवादिनी भविता। साम्प्रतं यावत्तु तस्याश्च ज्ञानं किञ्चिद् वृद्धिङ्गतम्। योगवासिष्ठस्य आध्यात्मिकरूपकैः स्वकीयं जीवनमाप्लावयन्ती अद्यत्वे सा स्वात्मना स्वात्मानं परिचीयमाना च वर्तते । परह्यस्तनस्यैव प्रसङ्गोऽयं यदहं पञ्चकोशविषयमधिकृत्य संलपन्ती आसम्, सा तु समाहिता सती जीव–साक्ष्यहङ्कार–कूटस्थादीनामनुभवसोपाने समारूढा समजायत । स्वकृतासु कतिपयत्रुटिषु सा पश्चात्तापमनुभूयमाना दृश्यते । तस्याञ्च मैत्रीभावः स्फुरन्नस्तीति आलक्ष्यते।

याज्ञवल्क्यः आर्ये ! सत्यामपि एवं स्थितौ न स्पृहयामि आजीवनं गार्हस्थ्यं परिपालयितुम् । अहन्तु ज्ञानकूपस्य अखण्डप्रदीप्तानलज्वालां वोढमानः स्वातन्त्येण स्वच्छन्दं विश्वं बिभ्रमिषामि।

मैत्रेयी आर्य ! तथा चेद् भवदीयं लक्ष्यं संन्यासस्य जिघृक्षा वा ?

याज्ञवल्क्यः *(सहर्षं स्मयमानः)* आर्ये ! त्वं मन्मनोरथं सम्यग् ज्ञातवती असि । आम्, अहं गार्हस्थ्यात् संन्यासाश्रमं समारुरुक्षुरस्मि। *(यज्ञोपवीतं गृह्णन्)* जाग्रत्–स्वप्न–सुषुप्तिरूपेण सूत्रत्रयेण सह साम्प्रतं न किञ्चित् स्नेहभावोऽनुभूयते।

(शिखादेशे करस्पर्शं विदधानः) नहि मनोवाक्कर्मणामैक्यभावस्य प्रतीकरूपिण्या शिखया सह मन्मोहो वर्तते, न च अमुना दाहसंस्कार्येण देहेन सह । इतःपरं तु नूनं मया पारिव्राज्यं परिग्रहणीयम्। स्वात्मनः खलु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यबोधस्वरूपेण परमहंसेन सह विचरणीयं वर्तते । नैष्कर्म्येण सह लोककल्याणाय लोकसंग्रहः करणीयोऽस्ति। यतो हि, साम्प्रतमहं गृहवृन्ताद्विविक्तोऽस्मि ।

मैत्रेयी *(अश्रुपूर्णनयना सती)* तावद् भवान् मां कात्यायनीं तनयौ च परित्यजति वा ?

याज्ञवल्क्यः आर्ये ! परन्तु युष्माकं सम्यग् व्यवस्थितिसम्पादनं विना हिमशैलीया-मिमामधित्यकामस्मादधोवर्तिनीं समस्थलीं ज्ञानकूपञ्च सद्यो नहि परित्यजामि किल !

मैत्रेयी आर्य ! अस्मत्कृते व्यवस्थितिस्तु समीचीनैव सञ्जायमानास्ति । पुनरभिनवा समीचीना च काचिद् व्यवस्थितिरस्माभिरपेक्षिता वा ?

याज्ञवल्क्यः ननु सपत्नस्त्रीत्वेऽपि युवां सोदरे स्वसाराविव मिथो मिलिते स्थः परन्तु नखमांसवत् सुसंयुक्तोऽपि सम्बन्धोऽयं ममानुपस्थितौ निकटभविष्यति कां दशाङ्गमिष्यतीति वक्तुं न पार्यते । अतो यावदपि मदीयं चलाचलं वित्तं वर्तते, तस्य दायभागं विभज्य युवाभ्यां दित्सुरस्मि । एतावता युवयोर्मध्ये कलहबीजं नावशिष्येत । किञ्चन चिन्ताविषयमूढ्वा मम च परिव्रजनं न भविष्यति । मत्कारणेन युवयोर्मध्ये सञ्जनितः सापत्नसम्बन्धोऽपि नित्यमेव समुन्नेष्यमाणः सुस्थितिं सम्पादयिष्यति ।

(मैत्रेयी अश्रूणि समुत्सृजन्ती कटिबन्धोत्तरीयेण प्रोञ्छति ।)

आर्ये ! किमर्थं रोदिषि ?

मैत्रेयी *(रोदनमिश्रितस्वरेण)* आर्य ! नयनाम्बु निःसरत्येव सहसा । किङ्करवाणि !

याज्ञवल्क्यः *(दयितस्वरेण)* आर्ये ! मदीयेऽद्वितीयेऽभिलाषे, चिरन्तने

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोरथे, चरमे लक्ष्येऽस्मिन् त्वदीया मौक्तिकोपमेया अमी नयनाम्बुबिन्दवो प्राकारद्वारनिःसरणमिव न सम्पद्येरन् इति कामये।

मैत्रेयी *(स्वात्मानं समाश्वासयन्ती)* आर्य ! भवता विधास्यमानेन दायभागेन सह मदीयं किं प्रयोजनम् ? मयि कीदृग् नारीत्वं परिचिन्तितं भवता ?

याज्ञवल्क्यः *(क्षणं विचिन्त्य)* आर्ये ! कथमेवं वदसि ? मया तु तवैव हितकामनया युवयोर्मध्ये दायभागविभागः चिकीर्षितः।

मैत्रेयी आर्य ! भवदभिप्रेतोऽर्थ उद्देश्यञ्च सम्यगवगतं मया।

याज्ञवल्क्यः तर्हि किन्तावत्त्वदीयं मतमिह मदीये चिन्तने ?

मैत्रेयी *(गाम्भीर्यमाकलयन्ती)* आर्य ! मत्प्रश्नो जिज्ञासते यद् यदि वसुसम्पन्नेयं सकला च वसुधा मदधीना भवेत्, तर्हि किमियं मैत्रेयी अमरा सम्पद्येत ?

(याज्ञवल्क्यः शिरोऽवनमयति । क्षणं मौनं साधयन् स ऐकाग्र्येण मैत्रेयीवदनं वीक्षते ।)

आर्य ! पूर्वं मत्प्रश्नः समाधीयेत । वित्तस्य आश्रमस्य च भागग्रहणेन मदर्थं जीवन्मुक्तिः समधिगम्यते वा ?

याज्ञवल्क्यः *(गाम्भीर्येण क्षणं विचिन्त्य)* वित्तेन नहि अमृतत्वं सम्भवति, न च जीवन्मुक्तिः। यतो हि—

सम्पोष्य सततं सम्यग् भौतिकीं हि समुन्नतिम् ।
वित्तेन भ्राम्यते जीवो दुर्भोगं परितो भृशम् ॥

मैत्रेयी **अमृतत्वस्य नाशास्ति वित्तेन बुध्यते यथा।**
कुर्यां किं ग्रहणेनास्य जीवितं याप्यते वृथा ॥

अत एव मत्कृते तु अमृतत्वं हि मूल्यवत्तरं वर्तते। अमृतत्वस्य सम्प्राप्तिः खलु मद्वाञ्छाविषयः । तदेव च मदीयमेकमात्रं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लक्ष्यम् ।

(याज्ञवल्क्यः समुत्थाय प्राङ्गणे इतस्ततः परिभ्रमति। मैत्रेयी पत्रपुटकानि सन्दधाति । सा भूयो भूयः स्वभर्तृवदनञ्च पश्यति ।)

याज्ञवल्क्यः आर्ये ! अमरताम्, अमरत्वम्, अमृतत्वं वा यत्किमपि ब्रूहि, तदवाप्तेरनन्यं साधनं ननु आत्मबोध एव ।

(मस्तकं परिभ्राम्य पृष्ठतो विलोकयन्) एवंरीत्या त्वं केवलं स्वात्माभिमुख्यं भज, आत्मबोधो जायते ।

मैत्रेयी आर्य ! एष तु स एव पुरातन उपदेशः पुरावृत्तः किल !

याज्ञवल्क्यः *(विहस्य)* आर्ये ! त्वं पुरातनं मन्यस्व, अभिनवं वा ! एतत् सरलं मन्यस्व, कठिनं वा ! विश्वस्मिन् विश्वेऽमृतत्वावाप्तेरनन्यं साधनन्तु आत्मतत्त्वसाक्षात्कार एव । तदर्थं श्रवणचिन्तनादिकञ्च अपेक्षितम् । लोके परमात्मन्निति नाम्ना यो गीयते, वस्तुतः सोऽपि आत्मैव । परमात्मनः साम्राज्यन्तु स्वान्तःस्थं खलु । स च त्वं स्वयमेव असि ।

मैत्रेयी कथमेतद् आर्य !

याज्ञवल्क्यः आर्ये ! त्वं स्वयमेव अनुभूयाः ।

(मैत्रेयी चक्षुषी निमील्य समाहिता भवति ।)

अम्भसोऽन्वेषणे हिमानीप्राप्तिः, हिमान्वेषणे च अम्भसामवाप्ति-र्भवति । वस्तुतोऽम्भो हिमानी च एकमेव वस्तु । एवमेव आत्मनोऽन्वेषणे परमात्मा, परमात्मनोऽन्वेषणे च स एव आत्मा समधिगम्यते । अत आत्मा हि परमात्मा, परमात्मैव च आत्मा वर्तते । तस्माद् वयं सर्वेऽपि आत्मस्वरूपमधिष्ठिताः सन्तोऽमुष्मिन्नेव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लीनतामापद्यामहे। तेनैव हेतुना यत्र क्वचन किमपि वर्तते, सर्वमेतद् आत्मैव।

(मैत्रेयी चक्षुषी उन्मीलयति।)

मैत्रेयी *(सुस्पष्टतां भावयन्ती)* आर्य ! स्थितिकालेऽपि तत्सर्वमात्मैवेति यदुक्तं भवता, कथमिव एतद्ग्रहणं सम्पद्येत ?

(याज्ञवल्क्यः प्रत्युत्तरं विनैव कुटीरान्तः प्रविश्य एकं बृहदाकारकं शङ्खं स्वीकृत्य प्रत्यायाति।)

याज्ञवल्क्यः आर्ये ! अहं शङ्खनादं करोमि। एतन्नादस्य बाह्यध्वनिं गृह्णीष्व।

(शङ्खं वादयति। मैत्रेयी एकतानेन तच्छृणोति।)

अगृह्णः किम् ?

मैत्रेयी *(सविस्मयम्)* न नादशब्दस्तु अग्राह्योऽस्ति।

याज्ञवल्क्यः आम्, अग्राह्योऽस्तीति सत्यमेतत्, परं नादसमकालं तद्ग्रहणं सञ्जातं न वा ?

मैत्रेयी तत्तु सञ्जातम्।

याज्ञवल्क्यः सम्प्रति क्वास्ति तावत् स नादशब्दः ?

मैत्रेयी स तु शब्दत्वे संश्लिष्टोऽभूत्।

याज्ञवल्क्यः *(निकटे लम्बिताद् मकायनिर्व्यूहाद् एकं मकायकन्दं गृहीत्वा तद्बीजावरकमपाकृत्य मकायबीजानि दर्शयन्)*

आर्ये ! मकायकन्दे संश्लिष्टानि मकायबीजानीव नादशब्दः शब्दत्वे संश्लिष्टोऽभूत् किम् ?

मैत्रेयी तथा तु न।

याज्ञवल्क्यः अथ किम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी तथा चेत् स नादशब्दः शब्दत्वेन सह एकरसः सन्नलीयत, शून्यत्वङ्गतः।

याज्ञवल्क्यः आर्ये ! अस्मिन्नेव सन्दर्भे महत्त्वाधायकमेकं प्रश्नं पृच्छामि।

मैत्रेयी *(ऐकाग्र्येण मूकवत्तन्मयतया भर्तृमुखं पश्यन्ती)* आज्ञाप्यतामार्य !

याज्ञवल्क्यः आर्ये ! ब्रूष्व तावत् सन्दर्भेऽस्मिन् त्वया यत् शून्यस्य नाम गृहीतम्, तत्सत्ताविषये त्वदीया कीदृशी अवधारणा वर्तते ?

मैत्रेयी आर्य ! अहं भवद्वार्तां बोद्धुं नाशकम्।

याज्ञवल्क्यः *(शनैर्भाषमाणः)* यदा यदा त्वं स्नानार्थं जानकीघट्टं प्राप्नोः त्वत्पूर्वं पश्चाच्च तत्रागता बहवो जनाः त्वया सदा तत्रावलोकिताः । मन्यस्व, एकस्मिन् दिने एका घटना सञ्जाता यत्तत्र झञ्झावातः समुद्भूतः। तत्प्रभावेण न केवलं पशुपक्षिणोऽपितु कश्चिदपि पदार्थः तत्र दृग्गोचरीकृतो भवेत्। तत्र त्वया केवलं शून्यमात्रमनुभूतमिति विचारय।

(भाषमाणः स मध्ये विरमति ।)

मैत्रेयी *(भर्तुः कथनानुरूपं दृश्यं परिकल्पयन्ती)* ततः ततः ?

याज्ञवल्क्यः ततः त्वं स्वगेहमागत्य तदानीन्तन्याः शून्यतानुभूतेः परिचर्चां प्रारभथाः।

मैत्रेयी *(पुनस्तत्कथनानुरूपं प्रसङ्गं परिचिन्तयन्ती)* आर्य ! कल्पनाया अस्या अभिप्रायः ?

याज्ञवल्क्यः आर्ये ! अस्या अभिप्रायो वर्तते यद्, यस्य एकरसत्वेन त्वया सङ्केतः कृतः, यच्च त्वया शून्यमात्रमनुभूतम्, वस्तुतः तादृशः सङ्केतोऽनुभवश्च केन कृतः ?

मैत्रेयी *(किङ्कथनीयताबोधराहित्येन क्षणं मौनमाचर्य)* मया कृतः, स्वेनैव मया जीवेन चेतनेन आत्मना । यदि अहं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वयं जीवः चेतन आत्मा वा नाभविष्यम्, अहन्तु अत्रत्यो भित्तिस्थः प्रस्तर इव तत्ताडवृक्ष इव वा अन्तःकरणराहित्येन मनोबुद्धिचित्ताहङ्कारैर्विना जडीभूताभविष्यम्।

(इतस्ततो विलोकयन्ती तर्णकबर्हिणौ दर्शयन्ती) यदि तर्णकी मयूरी एव वा किं नाभविष्यम्, मनोबुद्धिचित्ताहङ्कारापरपर्यायभूतेन अन्तःकरणेन च युक्ता सत्यपि तदानीं आत्मनात्मानं परिचेतुं नाशक्ष्यम्।

याज्ञवल्क्यः *(सहर्षम्)* आर्ये ! सत्यमभिहितं त्वया। त्वदीयेयमवधारणा सत्यानुगुणा खलु।

मैत्रेयी *(हसितुकामा)* एवं वा ?

याज्ञवल्क्यः *(गाम्भीर्येण)* कथमयं प्रश्न 'एवं वे'ति ? सत्यमेव त्वत्कथनम्। त्वत्कथनन्तु अनलस्य उष्णतेव दाहकतेव दीपकतेव च निर्विवादं सत्यमस्ति। अनलोऽनुष्णः तमोमयो दाहकताशून्यश्चेति यदि कश्चिद् आह, तत्रास्मदीया सम्मतिर्भवितुं नार्हति। तर्केण साधिते सति वा सम्मतिर्भवेत् ? चिन्तय तावत्।

मैत्रेयी *(क्षणं किङ्कथनीयताज्ञानरहिता सती)* आर्य ! सत्यसन्दर्भेऽनावश्यकतया विहितः तर्कस्तु कुतर्करूपताङ्गच्छति किल !

याज्ञवल्क्यः *(सामोदं विहस्य)* आर्ये ! तव कथनस्यास्य तात्पर्यम् ?

मैत्रेयी अनलोऽनुष्णोऽस्तीति असम्भवमत्र सम्मतिप्रदानम्।

(शङ्खनादध्वनिना समाकृष्टा बालाः सन्धाव्य समागच्छन्ति। ते कोलाहलं कुर्वन्त उपवितर्दि पङ्क्तिबद्धा भवन्ति। तदानीमेव एका वृद्धा च तत्र समायाति।)

याज्ञवल्क्यः आर्ये ! मया विहितं शङ्खनादमाकर्ण्य एते ग्रामीणा बाला

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैवेद्यभक्षणार्थमिह समुपागताः। पश्यैषा वृद्धा च समायाता। किमपि खाद्यमस्ति वा गृहान्तः ? आनीय भोजय एतान्।

(बालाः पङ्क्तौ पुरतः स्थातुमहमहमिकां प्रदर्शयन्ति । मैत्रेयी तत उत्थाय गेहान्तः प्रविशति ।)

वृद्धा *(विषधरं नेदीष्ठं वीक्ष्य भयाक्रन्ता सती सोच्चं शब्दायमाना)* अहो ! कियान् महान् विषधरः !!!

(बालाश्च भीतिमनुभवन्ति । वृद्धा ततः पलायते ।)

मैत्रेयी *(तत्र सम्प्राप्य वितर्द्यासन्नं विवरं निपुणं निरीक्ष्य हसन्ती)* ए वृद्धमातः ! कुतोऽयं विषधरः ! अयन्तु अस्मत्पुत्रेण मधुना पालितस्य कृष्णसारशावकस्य दाम अस्ति।

(सर्वे पुनस्तत्रैव एकत्रीभूय हसितुं प्रारभन्ते ।)

वृद्धा अहन्तु दामनि एव विषधरं दृष्टवती किम् ! ग्रामान्तरे शान्तारामस्य माता विषधरदंशनेन पञ्चत्वङ्गतेति ह्य एव श्रुतवती आसम् । अतोऽत्र दाम्नो विषधररूपेण वीक्षणमपि भृशं भयावहं सञ्जातम्।

याज्ञवल्क्यः *(तन्नैकट्यं प्राप्य)* आर्ये ! रज्जुसर्पगतानां भ्रान्तिविषयकाणां तर्क-वितर्काणां ज्ञानाय, बोधाय, अनुभूत्यै च यदि समेषामपि भ्रान्तजनानां सामर्थ्यमभविष्यत्तर्हि तु इयं मनुष्ययोनिः कीयती गरीयसी असेत्स्यत् !

मैत्रेयी आर्य ! तथा चेत्तु सच्चिदानन्दभावेन सर्वोन्नते हिमशैलशृङ्गे पुनरेकं शृङ्गमपचायितं स्यात् । समग्रं विश्वं केवलानन्दस्य पुष्पोपवनं सञ्जातं स्यात् । प्रत्येकं जनो नैजं बोधस्वरूपं समनुभूय समदर्शी सम्पन्नः स्यात्।

याज्ञवल्क्यः आर्ये ! समुचितमभिहितं त्वया।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(मैत्रेयी गेहान्तः प्रविश्य रोटिकादिकं समानीय सर्वेभ्यो वितरति । सर्वे प्रमोदमापद्यन्ते ।)

कश्चन बालकः *(रोटिकामश्नन्)* ज्येष्ठमातः ! कुत्र गतोऽस्ति मधुः ?

मैत्रेयी स तु तरणक्रीडार्थं जानकीकुण्डं प्रति गतोऽस्ति ।

अपरो बालकः पूर्वमेव ज्ञातवन्तश्चेद् वयमपि तु तेनैव सह तत्र गताः स्याम ।

वृद्धा कात्यायनी अपि तु न दृश्यते ।

मैत्रेयी सापि तनयाभ्यां सहैव गतास्ति ।

एका बालिका वनितापि तत्रैव गता किम् ?

मैत्रेयी आम्, सापि तत्रैव तत्रैव गता ।

(नैवेद्यमश्नन्तः सर्वे निष्क्रमितुमारभन्ते ।)

याज्ञवल्क्यः आर्ये ! तर्हि त्वं दायभागं न मन्यसे ?

मैत्रेयी आर्य ! दायभागस्य प्रथान्तु मन्ये परं विनशनशीलस्य वित्तस्य दायभागं स्वयं नाङ्गीकरोमि । विनाशरहितस्य नित्यस्य ज्ञानस्य दायभागः प्रदीयते चेत्तु अवश्यं सामोदं स्वीकरोमि ।

याज्ञवल्क्यः आर्ये ! यस्य वस्तुनो दायभागविभजनमेव असम्भवम्, तत्कथं प्रदेयं स्यात् ?

मैत्रेयी आर्य ! तर्हि 'प्रिये ! मुग्धे !' इत्यादिवचोभिर्भवता मयि यः स्नेहभावः प्रदर्शितः, किं तस्य प्रयोजनम् ?

याज्ञवल्क्यः आर्ये ! विगतेऽपि वत्सरे एवमेव प्रश्न आसीत्तव । सन्दर्भेऽस्मिन् सम्प्रति भूयश्च स्वाभाविकरूपेण त्वया तादृगेव प्रश्नोऽयं पुनरावर्तितः किल !

मैत्रेयी *(स्मर्तुकामा)* आम्, परन्तु अस्य यत् समाधानं तदानीं भवता प्रदत्तम्, तस्मिन् मया सम्यग् दृष्टान्तो नैवावाप्तः ।

याज्ञवल्क्यः आर्ये ! तावत्त्वत्समक्षं प्रयोगात्मकरूपेण एकं प्रबलं दृष्टान्तं प्रस्तौमि, येन त्वयि विषयेऽस्मिन् पूर्णप्रत्ययः समुदेष्यति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(तारस्वरेण) सामश्रवः ! अयि सामश्रवः !

(सामश्रवाः तत्र समायाति ।)

सामश्रवाः *(अभिवाद्य)* आज्ञाप्यतां गुरुवर्य !

याज्ञवल्क्यः सामश्रवः ! अयोनिर्मितं मर्कटोन्माथं वाहयित्वा आनीयताम् ।

सामश्रवाः अस्तु गुरुवर्य !

याज्ञवल्क्यः मर्कटी च समानीयतां सामश्रवः !

मैत्रेयी मत्कृते दृष्टान्तप्रस्तवनायैव मर्कटोन्माथमानेतुं भवता सामश्रवाः समादिष्टः किम् ?

याज्ञवल्क्यः आम्, त्वयि मम स्नेहविषयक एष प्रश्नः पुनरुत्थाप्यत इत्यहं पूर्वमेव ज्ञातवान् आसम् ।

मैत्रेयी मर्कटी च एतत्प्रयोजनायैवं पालिता वा ?

याज्ञवल्क्यः सत्यमनुमितं त्वया । अवश्यमेव एतत्प्रयोजनायैव तु पालिता सा ।

मैत्रेयी आर्य ! तर्हि भवता मयि साम्प्रतं यावत् प्रेम न कृतं किल ?

याज्ञवल्क्यः अवश्यं कृतम्, परन्तु तत्प्रेम तव कृते नासीत् । तत्तु मया स्वीयं प्रयोजनं साधयितुमेव विहितमासीत् ।

मैत्रेयी आर्य ! नहि अवबुद्धं मया भवत एतत्कथनम् ।

याज्ञवल्क्यः आर्ये ! एतत् स्वात्मनैव स्वयं प्रयुङ्ग्धि । तदनु भोत्स्यसे ।

मैत्रेयी आर्य ! मयि तु एतत् सत्यं सेद्धुं न शक्नुयात् । यतो हि, अहं स्वस्याः प्रयोजनायैव न, अपितु भवत्कृते च भवन्तं प्रीणामि ।

याज्ञवल्क्यः आर्ये ! स्वस्य प्रयोजनायैव मया सह त्वत्प्रेमग्रन्थिरनुबद्धो वर्तते, न तु मत्प्रयोजनाय ।

मैत्रेयी आर्य ! भवति मम अधिकतरं प्रेम अस्तीति अग्निसाक्ष्यतया वक्तुं शक्नोमि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याज्ञवल्क्यः *(शिरः कम्पयन्)* असम्भवमेतद् असम्भवम्।

मैत्रेयी किमर्थम्? कथञ्च एतद् असम्भवम्?

याज्ञवल्क्यः *(गाम्भीर्यमाकलयन्)* आर्ये! वस्तुतो विशदं विश्लेषणेन अनुसंहिते सति एतत् स्पष्टं भविष्यति यत्—

पत्युः कामाय नह्यत्र प्रियत्वं पत्युरीक्ष्यते।
जायायाञ्च पतिप्रेम जायायै नहि वीक्ष्यते॥

मैत्रेयी मम प्रयोजनायैव भवान् मत्प्रियोऽस्तीति भवदाशयः किम्?

याज्ञवल्क्यः *(कूर्चं सम्मर्दयन्)* आम्। एवमेव मम प्रयोजनाय च त्वं मत्प्रिया वर्तसे।

मैत्रेयी *(सखेदं भर्तृवदनं वीक्ष्य)* आर्य! कीदृग् अनर्थवचनमिदं पुनः शृण्वन्ती अस्मि अहम्?

(शिरोऽवनमय्य अश्रूणि मुञ्चति।)

याज्ञवल्क्यः *(मैत्रेयीमुपगत्य तस्या अवनतशिरः समुत्थापयन्)* आर्ये! त्वन्तु भुवः सप्तसोपानोपरि समुद्गतासि। अत इदानीं त्वन्नयनयोरिमेऽश्रुबिन्दवः शोभां नाधिगच्छन्ति।

मैत्रेयी *(प्रावारेण अश्रूणि प्रोञ्छन्ती)* आर्य! एतादृग् भवद्वचनमाकर्ण्य तु भुवः सप्तसोपानोपरि समुद्गतापि अहं तत्समसोपानानि अधोगमनानुभूत्यै बलात् प्रेरितास्मि।

याज्ञवल्क्यः *(स्मयमानो कूर्चं सम्मर्दयन्)* आर्ये! तथा चेत् सकृद् अस्मदीयां तां मधुरात्रीं स्मर। वर्षणेऽवरुद्धे तारकाशकलमस्मत्प्रकोष्ठान्तः पतितमिव तमिस्रापि सा ज्योत्स्नीव निष्पन्नासीत्। अञ्चलाच्छादितवदना त्वं सुषुप्सतः पर्यङ्कमधिष्ठितस्य मम निकटे समुपविष्टासीः।

(मैत्रेयी तदानीन्तनमितिवृत्तं स्मारं स्मारं लज्जाभावेन स्मयितुं चेष्टमाना एकतानेन भर्तृकूर्चं वीक्षते।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मैत्रेयी *(लज्जमाना अञ्चलेनेव प्रावारेण शीर्षमाच्छादयन्ती)* आर्य ! स्थविरेऽस्मिन् तदानीन्तनस्य तरुणवयसः सन्दर्भं समुद्भाव्य किमर्थं स्मारयति भवान् ?

याज्ञवल्क्यः *(इतस्ततः चलन्)* तर्कप्रयोजनेन दृष्टान्तप्रस्तवनाय समस्यासमाधानाय।

(मैत्रेयीमुपसृत्य तत्कपोलौ संस्पृशन्)

आर्ये ! वलिभाविमौ कपोलौ तदानीं पक्वं रामफलमिव आस्ताम् । स्मरसि मैत्रेयि ! तस्यां रात्रौ चुम्बनावसरे त्वं कथमिव असाहज्यमनुभूतवती आसीः !

(पुनरितस्ततः परिभ्रमति ।)

मैत्रेयी *(सहसा सवेपथु कपोलौ स्पृष्ट्वा भर्तृकूर्चं पश्यन्ती)* आर्ये ! एतद् भवत्कूर्चं तदानीं तीक्ष्णमासीत् ।

याज्ञवल्क्यः तथा चेत्तदानीं तुभ्यं मदीयं तीक्ष्णकूर्चं नहि रुचितं स्यात् ।

मैत्रेयी *(मुखाकृतिं विकार्य)* कण्टकमिव वेधनशीलं कूर्चं कस्यै रोचेत ?

याज्ञवल्क्यः *(अविरतं विहसन्)* आर्ये ! तदानीं मया स्वस्यैव कामाय त्वं चुम्बिता आसीः । मदर्थे तव प्रीतिरासीच्चेत्तदानीं तुभ्यं मदीयं तीक्ष्णकूर्चमपि रुचितं स्यात् परन्तु तत्तुभ्यं नारोचत । अतः सुस्पष्टं वर्तते यत्, स्वस्याः खलु कामाय त्वं मां प्रियममन्यथाः। उच्यताम्, एतत् सत्यं न वा ?

मैत्रेयी *(सव्रीडम्)* किमुच्यासम् ! पुरुषपक्षीयः प्रसङ्गस्तु मत्कृतेऽधुना भ्रमागारमिव सञ्जायमानोऽनुभूयते ।

(अतीतप्रसङ्गान् स्मरन्ती मौनं साधयति ।)

याज्ञवल्क्यः तावत्त्वं मातृपक्षस्यैव वार्तां शुश्रूषसे ?

मैत्रेयी अनुगृह्यते चेद् अवश्यं शृणोमि । मातृपक्षस्तु पुरुषपक्ष इव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परुषो न भवेत् किल !

याज्ञवल्क्यः *(हसन्)* आर्ये ! मातृपक्षस्य सन्दर्भे यदि प्रोच्येत, नहि सन्ततेः कामाय सन्ततिः प्रिया भवति, आत्मनस्तु कामाय सन्ततिः प्रिया भवति।

मैत्रेयी (रदनमध्ये रसनां दमयन्ती) हरे राम ! पुनरिदं कीदृग् अनर्थवचनमश्रौषम् ?

याज्ञवल्क्यः *(सहसा पृष्ठतोऽभिमुखः सन्)* नहि अनर्थवचनमिदम् । इदन्तु अर्थपूर्णं वर्तते।

(पुनर्मैत्रेयीमुपगत्य) आर्ये ! तस्मादेव तु आत्मा खलु...

मैत्रेयी *(मध्ये हि तद्वचनमवरोध्य व्यङ्ग्यभावेन)* आर्य ! तर्हि तु अस्मत्पालितया मर्कट्या स्वशावकस्य स्ववक्षसि संश्लेषणमपि स्वप्रयोजनायैव अस्ति किम् ?

याज्ञवल्क्यः एवम् । एतं दृष्टान्तं पुरस्कृत्यापि अहं स्वतर्कस्य याथार्थ्यं साधयिष्यामि। यतो हि, मर्कटीव स्ववक्षसि शिशुं निधाय स्नेहशीलः प्राणी लोके विरल एव परन्तु अहं प्रमाणीकर्तुं वाञ्छामि यद् मर्कटी च स्वप्रयोजनाय, स्वार्थसाधनायैव वा शिशौ स्निह्यति।

मैत्रेयी आर्य ! एतत्तु असम्भवं प्रतीयते। सपत्नसन्ततौ स्नेहशीलाया ममापि मातृहृदयं वर्तते चेत्...

याज्ञवल्क्यः *(मध्ये मैत्रेयीवचनं निरोध्य)* परन्तु आर्ये ! त्वयापि स्वस्याः कामायैव मधुवनितयोः स्नेहभावः स्थापितोऽस्ति । स्वार्थसाधनायैव तत्। बुध्यसे ?

(मैत्रेयी 'हरे शिव राम राम !' वदन्ती श्रवौ पिदधाति।)

मैत्रेयी *(श्रवाभ्यां करावपाकृत्य)* कीदृगसावनर्थोक्तिः श्रूयमाणास्ति मया ! मधुवनिताभ्यां सह च मदीयं किंविधं प्रयोजनं,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कीदृशः स्वार्थभावो वा भवेत् ?

याज्ञवल्क्यः आर्ये ! वारिवाहे वारि वर्तते, वारिणि च विद्युत् । एतत्सर्वं विरोधाभासनियमसङ्गतं वर्तते । अत एव आश्चर्यमयञ्च वर्तते परन्तु...

(विचारमग्नतामापद्यते ।)

मैत्रेयी परन्तु किम् ?

स्नेहसूत्रं द्रढीकृत्य स्वकामायैव सर्वदा ।
स्वार्थेन केवलेनाहं सम्पन्ना पापिनी किल ?

याज्ञवल्क्यः (समाश्वासयन्)

मा गमः संरभं क्षिप्रं गाम्भीर्येण विचिन्तय ।
कस्यचिन्नहि कामाय प्रियो भवति कश्चन ॥

वस्तुत आत्मनस्तु कामाय सर्वं प्रियं भवति । धनसम्पद् भवतु, भूमिक्षेत्रादिकं देवतादिर्विश्वप्राणिसमुदायो वा भवतु, एतत्सर्वं स्वकामायैव प्रियं भवति ।

(सामश्रवा मर्कटीं समानीय समायाति । मर्कट्या स्वशावकमुरसि संश्लेष्य वोढास्ति । प्रशिक्षिता मर्कटी सामश्रवसः सङ्केतमवाप्य मैत्रेयीयाज्ञवल्क्यौ प्रणमति । तच्छावक 'ईं ईं'–ध्वनिना शब्दायते । तदानीमेव चत्वारो जना अयोमयं मर्कटोन्माथमूढ्वा आनयन्ति । उन्माथस्य अधोभागश्च अयःफलकरचितोऽस्ति । फलकस्य नीचैरग्निप्रज्वालनानुकूलाः त्रयोऽयोदण्डा अनुयुक्ताः सन्ति । लघ्वायतनोऽपि उन्माथोऽयं मञ्जुलः संलक्ष्यते । उन्माथं तत्रैव एकस्मिन् कोणे संस्थाप्य तद्वाहकाः तत्रैव समुपतिष्ठन्ते । मर्कटी उन्माथं प्रविविक्षति परन्तु तत्कपाटं पिहितं वर्तते । याज्ञवल्क्य उन्माथं परिक्रममाणो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मर्कट्यै मर्कटान्नं प्रयच्छति । मर्कटान्नं भक्षयन्त्या मर्कट्याः कपोलौ फुल्लन्तावलोक्येते ।)

सामश्रवाः सामश्रवः ! उन्माथस्य नीचैरग्निः प्रज्वाल्यताम् ।

मैत्रेयी यथाज्ञापयति गुरुवर्यः ।

(चुल्लितः प्रज्वलन्तमलातमानीय मर्कटोन्माथस्याधः त्रिदण्डमध्ये स्थापयति । याज्ञवल्क्यः तत्कपाटमनावृणोति । उरःश्लिष्टशावका मर्कटी उन्माथं प्रविशति । अयोमयस्य उन्माथं प्रविशति । उन्माथपृष्ठं शनैः शनैरग्नितप्तं भवति ।)

मैत्रेयी *(साश्चर्यम्)* आर्य ! शावकवत्यै मर्कट्यै किमर्थमिमं दण्डं ददानोऽस्ति भवान् ? उन्माथे सुतप्ते हि सशावकेयं मर्कटी नूनं पञ्चत्वङ्गमिष्यति ।

याज्ञवल्क्यः उन्माथो न तावत् प्रताप्यते येन सा तच्छावकश्च पञ्चत्वङ्गच्छेताम् । केवलं त्वत्प्रश्नं समाधातुं प्रायोगिकदृष्टान्तप्रस्तवनाय हि प्रबन्धोऽयं विहितोऽस्ति । विषयेऽस्मिन् त्वं निश्चिन्ता भव ।

मैत्रेयी आर्य ! एष ऐन्द्रजालिकः प्रयोगस्तु नैव वा ?

याज्ञवल्क्यः *(हसन्)* आत्मज्ञानं न केवलं दर्शनमात्रम्, अपितु विज्ञानञ्च वर्तते । तन्त्रमन्त्रसाहाय्येन नव-नवमायिकप्रयोगेण मानवानां व्यामोहकस्य ऐन्द्रजालिककृत्यस्य नास्तीह कश्चनावकाशः ।

(मैत्रेयी तूष्णीमवतिष्ठते । सर्वे पुरोवर्तिनि दृश्ये दृष्टिं पातयन्ति । उन्माथपृष्ठे तप्यमाने मर्कटी उद्वेलिता भवति । सा उन्माथपृष्ठोपरि उपवेष्टुमशक्ता सती वरणस्थान् अयोदण्डान् गृह्णन्ती तत्र लम्बितुमारभते । वरणदण्डेषु च तप्तेषु ततोऽपि संरभमाणा सा तापवेदनया

 CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रन्दनमभ्याददाति। अश्रुपूरितनयना मैत्रेयी एकतानेन तद्दृश्यं प्रेक्षमाणा भवति। याज्ञवल्क्य उन्माथं परिभ्रमति। तदानीमेव मधुवनिताकात्यायन्यः तत्र सम्प्राप्य तद्दृश्यावलोकनेन आश्चर्यमनुभवन्ति।)

मधुः तात ! किमेतत् क्रियमाणं वर्तते भवता ?

(याज्ञवल्क्य अविरतमितस्ततो भ्रमति।)

वनिता तात ! मर्कटी अग्नितापेन दग्धा स्यात् !

कात्यायनी स्वसः ! किमिदं नाटकम् ?

मैत्रेयी *(रोदनमिश्रितस्वरेण)* प्रेमपरीक्षेयं सञ्चाल्यमाना वर्तते।

मधुः कस्य ?

मैत्रेयी सन्तत्या सह प्रसूजनयित्रोः।

(सर्वे सविस्मयं स्तब्धाः तिष्ठन्ति । मर्कट्यै तापपीडा दुःसह्या भवति । सा ततोऽपि सोच्चं ससंभ्रमञ्च क्रन्दति । उन्माथस्य अन्तराधाररूपा वरणदण्डाश्च अग्नितापेन इयतीं तप्तताङ्गच्छन्ति यत् तारस्वरेण शब्दायमाना सा शावकञ्च स्ववक्षसो वियोक्तुं चेष्टते परन्तु तच्छावकः ततोऽपि दार्ढ्येन तद्वक्षसि श्लिष्यति । बलीयसी मर्कटी बलात् स्ववक्षसः तं वियुनक्ति । अनन्तरं स्वशावकस्यैव वपुषि चरणौ विन्यस्य शीतलतानुभूतिं कामयते, स्वदेहमात्रस्य रक्षायै चेष्टते । मर्कट्याः शावको वेदनया भृशमाक्रन्दते। याज्ञवल्क्यः सद्य उन्माथकपाटमनावृणोति। मर्कटी स्वप्राणान् संरक्षन्ती सपदि उन्माथाद्निःसृत्यविटपीच्छायामाश्रयते।मैत्रेयी 'शिवशिव!' इति अभिदधती उन्माथाद् मूर्च्छितं मर्कटीशावकमाकृष्य पानीयं पाययति । सम्मीलितलोचनोऽपि तच्छावकः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पानीयपानेन शीतलतामनुभूय स्वचक्षुषी उन्मीलयति । सर्वे मूकवत्तन्मयतया तन्निरीक्षमाणा भवन्ति ।)

याज्ञवल्क्यः मैत्रेयि ! सम्प्रति स्वकीयं प्रश्नं स्वयं समाधेहि ।

मैत्रेयी *(विटपीच्छायामाश्रयमाणां मर्कटीं स्वपार्श्वस्थं तदर्भकवदनञ्च सकृत् समीक्ष्य लज्जाभावेन)* आर्य ! ... *(वचोऽवरुद्धं भवति ।)*

याज्ञवल्क्यः *(मैत्रेयीमुपसृत्य)* आम्, ब्रूहि ब्रूहि !

मैत्रेयी आर्य ! किङ्कथयेयम् ? इतःपरं तु किमपि कथनाय अवकाश एव नावशिष्टः ।

याज्ञवल्क्यः **नहि सर्वस्य कामाय सर्वं भवति वै प्रियम् ।**
आत्मनो ननु कामाय प्रियत्वं सततं स्मृतम् ॥
अतो बुध्यस्व तथ्यमेतत् आर्ये !, मा च विस्मर कदाचित् ।

मैत्रेयी *(गभीरं विचिन्त्य)* तर्हि तु आत्मज्ञान–बाह्यज्ञानयोरन्तर्विरोधो भवेत् !

याज्ञवल्क्यः अवश्यं परन्तु आत्मज्ञानप्रयोजनाय जिज्ञासुना आत्मप्रियेण भाव्यम्, नोचेत्तु चान्द्रमसे धरातले मानवयानमवतीर्णं भवेत्, मङ्गलतले पुमान्पदार्पणं वा, आत्मज्ञानस्य यथातथलोकप्रियतामाधृत्य लोके महाभारतानुगुणानां युद्धानां बाहुल्यं जायत एव ।

मधुः *(तातमुपसृत्य)* तात ! तर्हि आत्मानं परिचेतुमात्मबोध एव गरीयान् वर्तते किम् ?

याज्ञवल्क्यः निश्चप्रचम् ।

(तदानीमेव एकोऽधिकृतवर्यः तत्रायाति ।)

अधिकृतः *(अभिवाद्य)* मुनिराज ! विदेहराजेन गुरूपूर्णिमोपलक्ष्ये अत्र भवतः समक्षं केचिद् उपहाराः सम्प्रेषिताः सन्ति । आशीषः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिलकञ्च ग्रहीतुं श्वस्तनदिवसेऽत्रैवाश्रमे महाराजस्य समागमनं भवितेति च सूचयामि।

(उपहारान् वहन्तः चत्वारो जनाः तत्र समायान्ति। उपहारान तत्रैव वितर्द्यां संस्थाप्य ते तान् प्रदर्शयन्ति। सर्वेषां दृष्टिः तैरेवोपहारैराकृष्यते। मर्कटी च समुपसृत्य पक्वमेकं रसालं स्वीकरोति। मैत्रेयी मर्कटशावकाय मोदकद्वयं प्रयच्छति। याज्ञवल्क्यः तत्रोपस्थितेभ्यः सर्वेभ्य एकैकं मिष्टान्नं वितरति।)

याज्ञवल्क्यः *(कात्यायनीं वीक्ष्य)* कात्यायनि ! श्वस्तनदिवसस्य कृते यथोचितं प्रबन्धं विधेहि।

कात्यायनी अस्तु, विधास्यते।

मधुः तात ! श्वस्तने दिवसे तत्त्वज्ञानिनं जनकं किं याचै ?

याज्ञवल्क्यः तत्त्वज्ञानस्यैव दीक्षां याचस्व।

वनिता *(पुरत उपगम्य)* तात ! अहञ्च तं किं याचे ?

याज्ञवल्क्यः त्वञ्च तत्त्वज्ञानस्यैव दीक्षां याचेथाः।

(मैत्रेयी मधुं वनिताञ्च स्वस्थानं प्रति समाकृषति।)

मैत्रेयी एवम्। आत्मविदो भूपतेस्तु अस्माभिरपि आत्मज्ञानस्यैव दीक्षाभ्यर्थनीया, येन वयमसत्यात् सत्यं प्रति, तिमिराद् मरीचिं प्रति, मरणाद् अमरतां प्रति च परिप्रेरिताः स्याम।

(याज्ञवल्क्य एकाग्रभावेन मैत्रेयीवदनं वीक्षते। कात्यायनी मैत्रेय्या वचो ग्रहीतुं चेष्टते। मधुवनिते गम्भीरमुद्रया चिन्तननिरतेऽवलोक्येते। अभ्यागताः सर्वे शनैर्निर्यान्ति।)

(पटाक्षेपः)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपसंहारः

महाप्रस्थानम्

स्थानम् – जनकपुरम्, पूर्वतन एव ज्ञानकूपाश्रमः
कालः – प्रातस्तनः

लिम्पनपूर्वकं सविशेषं सज्जीकृतोऽस्ति आश्रमः । देहल्यां पूर्णकलशौ शोभायमानौ वर्तेते । तत्रैव एकस्मिन् कोणे समुपविष्टाः सामश्रवाः तत्सखायश्च मङ्गलध्वनिं समुच्चारयन्तः सन्ति । वनिता पुष्पमालाग्रथनशीला वर्तते । मयूराः कृष्णसाराश्च आश्रमस्य देहलीं प्रति पश्यन्तः सन्ति ।

कात्यायनी मधुश्च आयातः । आश्रमस्य देहलीं प्रति वीक्षमाणा मयूराः कृष्णसाराश्च मार्गमध्यादपसरन्ति । वनिता अक्षिभ्यामश्रूणि विमुञ्चन्ती हस्तेन पुष्पमालामादाय अन्तः प्रविशति ।

मधुः *(सानुरोधं मन्दस्वरेण)* अम्ब ! अहमपि पित्रा सहैव गच्छामि । विनिवेदयामि यद् मह्यञ्च गमनानुमतिः प्रदीयतामिति । पित्रा सह गच्छेयं चेत्तस्मै च साहाय्यं भविष्यति । तस्य कृते पानाशननिवासानां प्रबन्धञ्च विधास्यामि । मातृभ्यां भवद्भ्यां क्रियमाणां सेवाञ्च अहमेव करिष्यामि । अतः सविनयं निवेदयामि यद्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मामपि पित्रा सह प्रेषणाय उपायः परिकल्प्यताम्। अम्ब ! सपदि प्रदीयतामनुमतिः।

(निपतन्ति अश्रूणि प्रोच्छति।)

कात्यायनी *(अश्रूणि समुत्सृजन्ती)* वत्स ! सत्यमेतत्, तथापि त्वन्तु सद्यः खलु अङ्कुरितं सद् विकसनशीलं पत्रं वर्तसे। अतो नाहं त्वां पित्रा सह प्रेषयितुं शक्नोमि, न च त्वत्पिता एव एतत् स्वीकुरुते।

मधुः तथा चेत्, पिता एव शाखातो विविक्तं सत् पवनेन सह उड्डयितुकामं दलं वा ?

कात्यायनी *(अश्रूणि प्रोच्छन्ती)* न जाने ! एतदेव स्यात्।

(अविरतं तनयवदनं विलोक्य) वत्स ! ननु त्वदीयन्तु अल्पं खलु वयः।

मधुः अम्ब ! भवती मदीयं वयो न विचारयतु। यतो हि—

अवस्थामात्रमेवेदं जीवनस्य वयः सदा।
पुरा सम्प्रति पश्चाच्च आत्मा न वर्तते कदा ?

तस्मादयमात्मा सर्वास्ववस्थासु सत्तावान् सन् सर्वाभ्योऽवस्थाभ्यः पृथक् च वर्तते। अतो किमर्थं भवती मदीयमिदं वयः ज्ञानस्यान्वेषणाय बाधकं भवतीति मनुते ?

(मैत्रेयी हस्तेऽर्चनथालिकां नीत्वायाति।)

मैत्रेयी वत्स ! पित्रा आहूतोऽसि त्वम्।

(मधुरन्तः प्रविशति।)

कात्यायनी अग्रजे ! भवती पाथेयस्य पोटलिकां स्यूतेऽतिष्ठिपत् किल ?

मैत्रेयी आम्, अतिष्ठिपे परन्तु भर्जिततण्डुलाः स्वल्पाः स्युः। अतः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुनः प्रस्थद्वयपरिमितान् तण्डुलान् गुडस्य लोष्टयुगलञ्च आधाय पोटलिकां सुबद्धां कुरु ।

कात्यायनी अस्तु अग्रजे !

(कात्यायनी अन्तः प्रविशति । मैत्रेयी तुलसीमठं प्राप्य तुलसीः पञ्चायतनदेवाँश्च अभ्यर्च्य घण्टां वादयति । सामश्रवाः तत्सखायश्च पाठं समाप्य यात्रासामग्रीं सज्जीकुर्वन्ति ।)

मैत्रेयी *(उपगम्य)* सामश्रवः ! वाराणसीं यावद्धि भवद्भिर्मुनिराजो न त्यज्यताम् । यदि मध्यमार्गादेव एषः प्रत्यागमनाय आदेक्ष्यते चेदपि विश्वनाथदर्शनस्य गङ्गास्नानस्य च व्याजेन सहैव गत्वा सेवध्वम् । ततः तीर्थाटनाय जनकपुरं प्रति आगन्तॄणां माध्यमेन मध्ये मध्ये समाचारश्च सम्प्रेष्यताम् ।

सामश्रवाः अस्मिन् विषये चिन्ता मास्तु । वयं गुरुसेवया वञ्चिता न भवितास्मः ।

(पिप्पलादः तच्छिष्याश्च प्रविशन्ति ।)

सामश्रवाः *(अग्रेसरन् आश्चर्यभावेन)* अत्र के भवन्तः ?

पिप्पलादः अहं पिप्पलादः, एते च मच्छिष्याः ।

(परितो विलोकयन्) क्वास्ति योगीश्वरो याज्ञवल्क्यः ?

(तत्रत्याः सर्वेऽभ्यागताः तान् अभिवन्दन्ते । मैत्रेयी सहसा अन्तः प्रविशति ।)

सामश्रवाः *(विचार्य)* अत्र भवन्तः तीर्थाटनाय समागता वा ?

पिप्पलादः आम्, वयं जनकपुरधाम्नो मार्गेण उत्तरापन्थं प्रति प्रस्थानाय समागताः । मिथिलाधिपतेर्जनकस्य दर्शनार्थं तत्र सम्प्राता वयं योगीश्वरेण याज्ञवल्क्येन संन्यासदीक्षा गृहीतेति निशम्य तस्य दर्शनार्थमिह समागताः स्मः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामश्रवा: तावद् भवन्तः शुभे मुहुर्तेऽत्र सम्प्राप्ताः ।

पिप्पलादः कथम् ?

सामश्रवा: गुरुवर्योऽद्य सद्यो गार्हस्थ्यात् संन्यासाश्रमं प्रवेष्टुकामो वर्तते ।

पिप्पलादः/ तच्छिष्याश्च *(युगपत्)* एवं वा !

पिप्पलादः *(औत्सुक्येन सामश्रवसं प्रति)* अत्र भवतो नाम ?

सामश्रवा: सामवेदस्य विधिश्रवणे मम रुचेराधिक्येन गुरुवर्यो मां सामश्रवेति आह्वयति ।

(सखीन् सङ्केत्य) एते मत्सखायः ।

पिप्पलादः *(औत्सुक्यं प्रवर्धयन्)* सामश्रवः ! अहं भवन्तमेव पिपृच्छिषामि यद् योगीश्वरेण याज्ञवल्क्यस्मृतेरतिरिक्तत्वेन च याज्ञवल्क्यगीतेति योगशास्त्रविषयकस्य ग्रन्थस्य लेखनं प्रारब्धमिति श्रूयते स्म । ग्रन्थोऽयं समाप्तः किल ?

सामश्रवा आम्, तस्य सम्पादनकार्यं प्रचलद् एव वर्तते । पुनश्च शुक्लयजुर्वेदस्य, शतपथब्राह्मणस्य, आरण्यकोपनिषदश्च सङ्कलनसम्पादनादिकार्यं गुरुवर्येण सद्यः प्रारब्धं वर्तते ।

पिप्पलादः *(स्वशिष्यान् विलोक्य)* योगीश्वरेण ज्ञानस्य दर्शनस्य च यत् स्रोतो हिमशैलभुवः प्रदेशात् प्रस्फोटितम्, तद् विश्वशान्त्यै, मानवकल्याणाय, जीवन्मुक्तयेऽपि अमूल्यमद्वितीयञ्च कर्म सेत्स्यति । धन्यो योगीश्वरो याज्ञवल्क्यः !

शिष्याः धन्यो धन्यो योगीश्वरो याज्ञवल्क्यः !

(संन्यासवेषस्य याज्ञवल्क्यस्य प्रविष्टिर्जायते । सर्वे परिवारसदस्याश्च तमनुगच्छन्तः समायान्ति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामश्रवा *(निर्दिशन्)* दृश्यताम्, समागतो गुरुवर्यः ।

(सर्वे प्रणमन्ति ।)

याज्ञवल्क्यः *(पिप्पलादमुपगम्य)* अत्र भवान् कः ?

पिप्पलादः योगीश्वर ! अहम्.... अहम्.....

(वाक्यं न स्फुटति ।)

याज्ञवल्क्यः उच्यतां का वार्ता ?

पिप्पलादः योगीश्वर ! अरण्येऽहं पिप्पलतरोर्नीचैरुषित्वा तत्पत्राणि चर्वयन् खादित्वा दैहिकीं वृद्धिङ्गतोऽस्मि । तेनैव जना मां 'पिप्पलादः' इति व्याहरन्ति । मम पितरौ कावास्तामिति अद्यावधि न ज्ञायते परन्तु केचिद् वृद्धजना मां 'भवदीयो भागिनेयः' इति ब्रुवन्ति । अद्य मम महत् सौभाग्यं यत् स्वर्णावसरेऽस्मिन् भवद्दर्शनं प्राप्तम् ।

याज्ञवल्क्यः *(पिप्पलादं परिष्वज्य)* पिप्पलाद !

पिप्पलादः *(परिष्वक्तः सन्)* मातुल !

(सर्वे साश्चर्यं पश्यन्ति ।)

याज्ञवल्क्यः *(परिष्वजनात् पिप्पलादं विमुञ्चन्)* पिप्पलाद ! आकस्मिक-घटनाक्रमस्य एको बिन्दुरेव जीवनम् । अयं हि वितन्यते सरित्पतेः तरङ्गवत्, प्रभाकरस्य किरणा इव वा । पुनराकुञ्चनञ्च समुद्भवति अस्य तत्र तत्र तरङ्गवत्, किरणवद्वा । अहं याज्ञवल्क्यः, भवाँश्च पिप्पलादः, परन्तु एकस्मादेव बिन्दोः समुद्भूतः तरङ्ग आहोस्वित् किरणाः । भवेद् व्यवहारदशायां भवान् भागिनेयोऽहञ्च मातुलः परन्तु वस्तुतो भवान्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अहम्, अहञ्च भवान् । नास्तीह किञ्चन पार्थक्यम्-

व्यवहारदशायां हि सम्बन्धस्यास्य कल्पनम् ।
एकोऽपि चेतनो भाति नानात्वेनास्त्यसंशयम् ॥

पिप्पलादः मातुल ! अद्यापि जागरितास्ति आत्मज्ञानस्य बुभुक्षा । अतो भवन्तमेव अनुगन्तुमाज्ञां प्राप्नुयाम् ।

पिप्पलादः/ शिष्याश्च वयमपि ।

मधुवनिते *(मिथो विलोकयन्त्यौ युगपत्)* आवाञ्च ।

(याज्ञवल्क्यः सर्वेषांवदनानिवीक्ष्यक्षणंविचिन्तयति।मैत्रेयी-कात्यायन्यौ वाष्पभरितानि नयनानि प्रोञ्छतः ।)

याज्ञवल्क्यः मया तु संन्यासग्रहणं कृतम् । सांसारिकेण व्यवहारेण सह कीदृक् सम्बन्धः स्याद् इतः ! व्यवहारस्तु स्वतो निवृत्तो मदीयः । इदानीन्तु अक्षोटवल्कमिव स्वयं निवर्तमानोऽस्मि ।

पिप्पलादः मातुल ! तावद्दीयतां चरमा दीक्षा ।

याज्ञवल्क्यः स्वयं भवान् आत्मज्ञानी वर्तते । अहं किं प्रदद्याम् ?

पिप्पलादः *(शिरोऽवनमय्य)* मातुल ! साम्प्रतञ्च आत्मबोधामृतपानाय तृषार्तोऽस्मि ।

याज्ञवल्क्यः पिप्पलाद ! भवन्तः प्रथमं हिमगिरेः प्रभागेषु समारोहणमिव समुन्नतिं यान्तु । तदनु वहन्तु च कैवल्ययात्रायै कोशी-कर्णाली-गण्डक्य इव । गुरोर्दर्शनेन आत्मोपदेशश्रवणमात्रेण च आत्मबोधो न जायेत । यतो हि-

श्रवणादुपदेशस्य मननञ्च समाचरेत् ।
मननानन्तरं भूयो निदिध्यासनमाचरेत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्यगधीत्य सिद्धान्तान् व्यवहारेऽनुपालयेत् ।
अनुभूतिस्ततो 'बोधः केवलोऽहमि'ति भवेत् ॥

अयमेव तु तत्त्वबोधः ।

पिप्पलादः *(अञ्जलिं बद्ध्वा)* योगीश्वर ! अन्येषां पुरतो गुरुरेवापि अहं मैत्री-करुणामुदिताकारस्य भवादृशस्य ब्रह्मिष्ठस्य पुरतः केवलमेकोऽबोधशिष्योऽस्मि । उपदिश्यताम्, अक्षरशः परिपालयामि भवद्वचनम् ।

(राजगुरुः, सत्यकामः, एकोऽपरमुनिश्च तत्र सम्प्राप्नुवन्ति । तथैव एको ग्रामीणनिकरश्च तत्रैव समायाति । तत्रागताः सर्वेऽपि याज्ञवल्क्यं प्रणमन्ति ।)

सत्यकामः मुनिराज ! मिथिलाधिपतेर्जनकस्य सन्देशं समानीय भवत्समक्षं समागतावावाम् ।

याज्ञवल्क्यः उच्यतां का सा राजाज्ञा ?

एको मुनिः मुनिवर्य ! भवतोऽन्तिमं दर्शनानुग्रहं प्राप्तुं दार्शनिकं प्रवचनं श्रोतुञ्च महाराजेन स्वाभिलाषः प्रकटितो वर्तते । अत्र भवतो यादृशी आज्ञा !!

याज्ञवल्क्यः राजाज्ञेयमवश्यं पालयिष्यते । एतदेव निवेद्यतां महाराजः ।

सत्यकामः, स मुनिश्च *(युगपत्)* भवतु मुनीश्वर !

मधुः *(अश्रूणि विमुञ्चन्)* तात ! अहञ्च प्रतिष्ठे भवता सह ।

वनिता *(सशब्दं रुदती)* अहमपि तात !

याज्ञवल्क्यः *(मधुवनितेवीक्ष्य)*सम्प्रतियुवयोस्तुहिमशैलस्यविततेषुक्षेत्रेषु मृल्लोष्टस्फोटनस्य असौ समयः । स्वस्कन्धयोर्हिमगिरिमूढ्वा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चलनस्य अवसरोऽयम् । पुरुषार्थसाधनस्य तदधिगमस्य च इयं वेला ।

अन्तर्मुखत्वमापाद्य परिश्रमेण सत्वरम् ।
ऋणमोचनवेलेयं मातृभूमेश्चरन् वरम् ॥

कार्येऽस्मिन् देहलीदीपोऽपि नहि कदाचिद् विस्मर्यताम् । स्वान्तःस्थमात्मानमन्विष्य बाह्यं व्यावहारिकं जगत् केवलं साक्षिभावेन निरीक्ष्यताम् । स्वात्मनैव विरचितेभ्यः पाषाणमयेभ्यः पञ्चास्येभ्यो न कदापि भयमनुभूयताम् । यतो हि, ते खलु पञ्चास्या युवयोरेव सृष्टिः । न ते युवां धावयितुं क्षमन्ते, न च आक्रमितुम् । सांसारिके खलु व्यवहारे सद्भ्यामपि युवाभ्यां सदा नलिनीदलस्थितं सलिलमिव निर्लिप्तता भावनीया । एवं यदा तु आत्मनैव स्वरूप-स्थितिमनुभवितुं प्रभवितास्थः, तदानीमनुभूयमाना सच्चिदानन्दरूपता हि युवयोरन्यतमा महती समुपलब्धिः सेत्स्यति ।

(सामश्रवाः समीपवर्तिनीं पयोघटिकां विलोकयन् गुरोर्नैकट्यं प्राप्नोति ।)

सामश्रवाः गुरुवर्य ! इयमेव शुभवेला महाप्रस्थानाय ।

याज्ञवल्क्यः *(सर्वेषां मुखाकृतीर्निरीक्ष्य)* अस्तु तावत्, सानन्दं स्थीयताम् । प्रस्थीयते सम्प्रति मया ।

(तत्रत्यान् सर्वानभिवाद्य गन्तुं चेष्टते । मङ्गलध्वनिः प्रारभ्यते । मैत्रेयी कात्यायनी मधुर्वनिता च कुसुमानि स्रक् सुपेयञ्च समानीय उपायान्ति । याज्ञवल्क्यः तत्सर्वं स्वीकुरुते । शुभवेलायां स संन्यासवेषः सन् प्रव्रजति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्रुणार्द्रीकृतलोचना जनाः किञ्चिद्दूरं यावत्तमनुयान्ति।

पिप्पलादमुनिर्महर्षेर्याज्ञवल्क्यस्य जयकारं प्रारभते-

योगीश्वरस्य याज्ञवल्क्यस्य !

जय ! जय !! जय !!!

सर्वे च तत्रत्याः ते जयकारं कुर्वन्ति । क्षणं जयजयध्वनिर्निशम्यते।

(पटाक्षेपः)

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशेष–शब्दार्थ–गमनिका

अञ्चलम्	–Veil	[घुम्टो]
अरण्यानी	–Bush	[झाडी]
अवलेहः	–Pickle	[चटनी]
आढकी	–Arhar Daal	[रहरदाल]
उन्मदिष्णुः	–Mad	[पागल]
उन्माथः	–Prison	[खोर]
कक्षः	–Armpit	[काखी]
कञ्चुकम्	–Under-shirt	[भोटो]
कटिबन्धना	–Traditional Belt	[पटुकी]
कीलकः	–Nail	[कीलो]
कुड्यवपा	–Wall-hole	[खोपो]
कूर्चम्	–Beard	[दारी]
तैलधानी	–Woodmade Oil	[चौंठो]
गोपः	–Cow-herd	[गोठालो]
जनाश्रयः	–Rest-toft	[चौतारो]
डिण्डिमः	–Hand-drum	[डम्फु/डिबडिबे]
तन्तुवायकम्	–Charkha	[चर्खा]
तिक्तपत्री	–Mug-wort	[तितेपाती]
दाम	–Bind-rope	[दाम्लो]
दीपपुटकः	–Wick	[दियो]
नदः	–Small River	[खोलो]
निःसरणम्	–Gate-stick	[तगारो]
निःस्वनः	–Neigh	[घोडा हिनहिनाएको]
निर्व्यूहः	–Bundle	[झुप्पो/झुत्तो]
पर्णासिः	–Mint	[बाबरी]
पुष्कराह्वः	–Starling	[सारुङ् चरो]
पृष्ठम्	–Back Shoulder	[पिठ्युँ]
प्रपुटकम्	–Leaf-plate	[टपरी]
प्रस्थः/म्	–Hillock	[थुम्को]

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फेनिलः	–Soap-nuts	[रिठ्ठो]
बुस्तः/म्	–Fruit-peel	[फलको बोक्रो]
भ्रातृजाया	–Brother's Wife	[भाउजू/बूहारी]
मकायकन्दः	–Corncob	[मकैको घोगो]
मात्रालयः	–Birth-house	[माइतीघर]
मेलापकम्	–Fair	[मेलो]
रामफलम्	–Persimmon	[हलुवाबेत]
वरणः	–Wall	[बार/पर्खाल]
वरणवप्रः	–Terrace	[कान्लो]
वलिभः	–Wrinkle	[चाउरी परेको]
वितर्दी	–Baranda	[पिंढी]
शष्पम्	–Grass	[घाँस]
सम्मार्जनी	–Broom	[कूचो]
सुधाखण्डः	–Chalk	[खरी/चक]
सृणिका/लाला	–Saliva	[र्‍याल]
स्कन्धः	–Corner	[काप]
स्कन्धः	–Shoulder	[काँध]
स्थली	–Ground	[मैदान]
हट्टः	–Market	[हाट]
नीलाङ्कः	–Beat black and blue	[नीलडाम]
पलम्	–Unit of mass in traditional system	[६४ मासा]
प्रस्थःरम्	–Unit of mass in traditional system	[पाथी]
सीमप्रस्थः	–Upper edge in boundary between lower and upper surface	[डिल]

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपाल प्रज्ञा-प्रतिष्ठान

9 789937 723176

CC-0. Nepal Sanskrit Academy, Kathmandu